अवध किशोर सिंह द्वारा गोपाल प्रिण्टिंग वर्क्स
११८।१, कार्नवालिस स्ट्रीट, कलकत्ता से मुद्रित।

॥ श्रीः ॥

थ निरुक्त द्वितीय भागस्य प्रथमादि तृतीयाध्यायानां

विषयसूची

-*:(०):*-

॥ ॐ श्रीगणेशाय नमः ॥

निरुक्तम् (निघण्टुभाष्यम्)



अथ वृत्ति-भूमिका।

आदितः पाणिनीयन्तु शिक्षा ज्योतिस्ततश्छन्दः।
पञ्चाध्यायी-निघण्टोश्च निरुक्तमुपरि स्थितम्॥
प्रणम्य तत् प्रवक्ष्यामि स्कन्दायामिततेजसे।
स मे दिशतु सुप्रीतो धाग्धियोः शिष्टसम्मतिम्॥

अथ किमर्थं वेदो वेदाङ्गानि च प्रवृत्तानि? सर्वकामप्राप्त्या-मोक्षान्तः पुरुषार्थो वक्तव्य इति वेदः प्रवृत्तः। तत्परिज्ञानाय ङ्गानि प्रवृत्तानि। तानि पुनरमूनि प्रतिनियतार्थविषयवृत्त्या-मास्कन्दन्ति। तद्यथा—

शिक्षा तावत् "आत्मा बुद्ध्या समेत्यार्थान्"—इत्येवमादिना मेण स्वरव्यञ्जनाभिव्यक्तिलक्षणम्, पूर्वाह्णमध्यन्दिनापराह्णेषु पाध्येयम्, अधीतस्य च स्वरसौष्ठवयुक्तस्य यज्ञकर्मणि प्रयोगः,—न्येवमादि अर्थजातं निरुवाच। तथा ह्यधीतः प्रयुज्यमानश्चा-र्थावाय नान्यथेत्येवमर्थवत्ता शिक्षायाः। एवं ह्याह—'मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह। स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्। (शि० ५२)—इति। वेदाध्ययनानुपङ्गतश्चेतिहासपुराणशास्त्राणां लौकि-

कानां ग्रन्थविस्तररचनानाम्। अतएवाध्ययनपरिज्ञानं शिक्षाऽधिगताध्ययनविधेः॥

वेदस्याक्षरकोशपादव्यवस्थालक्षणपरिज्ञाने छन्दोविचितिरा द्रियते। इयताक्षरकोशेनेयद्भि पादैर्गायत्री, इयद्भिस्त्रिष्टुप्, इति नहि अविज्ञातच्छन्दसा प्रयुज्यमानो मन्त्रः कर्मण्यर्थक स्यात्। एवं ह्याह—"यो हवा अविदितार्षेयच्छन्दोदैवत ब्राह्मणेन मन्त्रेण याजयति वाध्यापयति वा स्थाणुं वर्च्छति गर्तं वा पद्यति प्रवा मीयते पापीयान् भवति यातयामान्यस्य छन्दांसि भवन्ति"—इति। अतोऽनुषङ्गतो वक्त्रादिलक्षणपरिज्ञान लोकेऽत्र लौकिकमिति ह्याह॥

सम्यगधीतस्य परिज्ञातछन्दसोऽमुष्मिन् कर्मणि विनियोग इति कल्प आद्रियते। यद्यथा। इषेत्वेतिच्छिनत्ति ऊर्जेत्वेत्य नुमार्ष्टीति। न हि कल्पानभिज्ञ प्रयोगान् विजानीयादिति॥

श्रुतिचोदितकर्माङ्गभूतकालपरिज्ञानाय ज्योतिषम्। अनुषङ्गतश्चातो प्राणिना शुभाशुभकर्मफलविपाककालपरिज्ञानम्॥

व्याकरणाद्विभक्त्यादिपरिज्ञानम्। एव ह्याह—"प्रयाजा सविभक्तिकाः कर्तव्या"। तथाचेदं दर्शयति—"सप्त्यादयो विपर्द्धन्ते"—इति। न च व्याकरणानभिज्ञो विभक्तीर्जानीयाद्गृहितुं वा मन्त्रान्। तत एव चानुषङ्गतो लोके लौकिकान् परिज्ञानमेवं छन्दस्येव भाषायामिति प्रविभागो नान्तरीयको नन्तरेण व्यवस्थितः॥

अत उक्ताध्ययनविधेरनछन्द प्रविभागस्योक्तविनियोगस्योप-

क्षितकर्माङ्गभूतकालस्योपदर्शितलक्षणस्यैतैरङ्गैर्वेदस्यार्थपरिज्ञानविषये निरुक्तं नामेदमङ्गमारभ्यते। प्रधानञ्चेदमितरेभ्योऽङ्गेभ्यः सर्वशास्त्रेभ्यश्चार्थपरिज्ञानाभिनिवेशात्। अर्थो हि प्रधानम्। तद्गुणः शब्दः। स चेतरेषु व्याकरणादिषु चिन्त्यते। कल्पेष्वपि विनियोगश्चिन्त्यते। स च पुनरर्थाभिधानवशेन मन्त्राणाम्। यो यमर्थमभिधानेन संस्कर्तुं समर्थो मन्त्रः, स तत्र विनियुज्यते। तदुक्तं—"अर्थाभिधानसंयोगान्मन्त्रेषु शेषभावः स्यात् (३, २, १)"—इति। न च निरुक्तादृतेऽन्यदङ्गमन्यद्वा वाह्यं शास्त्रमस्ति, तात्पर्येण यदशेषान् शब्दान् निर्ब्रूयात्। यदपि च कचित् कचिदन्यशास्त्रे शब्दनिर्वचनम्, अतएव तदित्युपलक्ष्यम्। यथा शब्दलक्षणपरिज्ञानं सर्वशास्त्रेषु व्याकरणात्, एवं शब्दार्थनिर्वचनपरिज्ञानं निरुक्तात्। वस्तुमात्रमेव हि इतरेषु शास्त्रेषु स्वाभिमतबुद्धिविषयमेव किञ्चिच्चिन्त्यते ब्राह्मणमपि च विध्यर्थवादरूपमशेषमन्त्रार्थशेषभूतमेव। मन्त्रब्राह्मणार्थपरिज्ञानवद्वाध्यात्माधिदैवाधिभूतपरिज्ञानद्वारेण धर्मार्थकाममोक्षाख्योऽखिलपुरुषार्थः। न चानिरुक्तो मन्त्रार्थो व्याख्यातव्य इति। तस्मादर्थपरिज्ञानाभिनिवेशादिदमेव प्रधानमित्युपपन्नम्। अथास्यैवमखिलपुरुषार्थोपकारवृत्तिसमर्थस्य संग्रहः।

तद्यथा,—नामाख्यातोपसर्गनिपातलक्षणम् (१), भावविकारलक्षणम् (२), नामान्याख्यातजानि सर्वाणि च यथोपन्यस्य पक्षप्रतिपक्षतो विचार्यावधारणम् (३), सर्वाण्याख्यातजानि कानिचिदेवानेकधातुजान्यपीति मन्त्राणामर्थवत्त्वानर्थवत्त्वे विचार्य

शास्त्रारम्भप्रयोजनद्वारेणार्थवत्तावधारणम् (४), पदविभागपरि-
ज्ञानप्रतिज्ञानयोर्धावलम्बिप्रदर्शनाय आदिमध्यान्तानेकदैवतलिङ्ग-
सङ्कुलेषु मन्त्रेषु याज्ञिकपरिज्ञानद्वारेण दैवतपरिज्ञानप्रतिज्ञा (५),
अर्थज्ञप्रशंसा (६), अनर्थज्ञावधारणम् (७), वेदवेदाङ्गव्यूहः (८),
सप्रयोजननिघण्टुसमाम्नायविरचनम् (९), प्रकरणत्रयविभागेन
नैघण्टुकप्रधानदैवताभिधानप्रविभागलक्षणम् (१०), निर्वचनलक्ष-
णद्वारेण शब्दवृत्तिविषयोपदेशः (११), अर्थप्राधान्यात् लोपोपधा-
विकारवर्णलोपविपर्ययोपदेशेन सामर्थ्योपप्रदर्शनायादिमध्यान्त-
लोपोपधाविकारवर्णलोपविपर्ययाद्यन्तवर्णव्यापत्तिवर्णोपजनोदा-
हरणचिन्ता (१२), अन्तस्थान्तर्धातुनिमित्तेन सम्प्रसार्यासम्प्र-
सार्योभयप्रकृतिधातुनिर्वचनोपदेशः (१३), भाषिकप्रायोवृत्तिभ्यो
नैगमशब्दार्थप्रसिद्धिः (१४), नैगमप्रायोवृत्तिभ्यो भाषिकशब्दार्थ-
प्रसिद्धिः (१५), देशव्यवस्थया शब्दरूपव्यपदेशः (१६), तद्धित-
समासनामनिर्वचनलक्षणम् (१७), शिष्यलक्षणम् (१८), विशेषेण
व्याख्यया तत्पर्यायभेदसङ्ख्यासन्दिग्धोदाहरणनिर्वचनव्यव-
स्थया नामाख्यातोपसर्गनिपातानां विभागेन नैघण्टुप्रकरणानु-
क्रमणम् (१९), अनेकार्थानवगतसंस्कारानुक्रमणम् (२०), परोक्षकृ-
तप्रत्यक्षकृताध्यात्मिकमन्त्रलक्षणम् (२१), स्तुत्याशीःशपथाभिशा-
पाभिख्यापरिदेवनानिन्दाप्रशंसादिभिर्मन्त्राभिव्यक्त्युपदेशः (२२),
निदानपरिज्ञानव्याख्यापनायानादिष्टदैवतोपपरीक्षणायाध्यात्मोप-
देशप्रकृतिभूमत्वम् (२३), इतरेतरजन्मत्वम् (२४), स्थानत्रयभेदशः-
तिसृणामेकैकस्यामाहाभाग्यादनेकनामधेयप्रतिलम्भः (२५),

पृथगभिधानन्तूत्पत्तिसम्बन्धाद्वा (२६), देवतानामाकारचिन्तनम् (२७), भक्तिसाहचर्यसंस्तवकर्मसूक्तभाक्त्वहविर्भाक्त्वग्रहणभाक्त्वानि (२८)—(३३), पृथिव्यन्तरिक्षद्युस्थानदेवतानामभिधेयाभिधानव्युत्पत्तिप्राधान्यश्रुत्युदाहरणम् :(३४), तन्निर्वचनविचारोपपत्त्यवधारणानुक्रमेण व्याख्याय दैवतप्रकरणनिर्णयः (३५), विद्यापारप्राप्त्युपायोद्देशः (३६), मन्त्रार्थनिर्वचनद्वारेण देवताभिधाननिर्वचनफलं दैवतताद्रूप्यम् (३७)—इत्येष समासतो निरुक्तशास्त्रचिन्ताविषयः ॥

तस्यैषा गवाद्या देवपत्न्यन्ता पञ्चाध्यायी सूत्रसंग्रहः। सा च पुनरियं साक्षात्कृतधर्मभ्यो महर्षिभ्य उपदेशेन मन्त्रार्थमुपश्रुत्य श्रुतर्षिभिरवरशक्तिदौर्बल्यमवेक्ष्य तदनुजिघृक्षया वाच्यार्थसामर्थ्यादभिधेयानुनीय मन्त्रार्थावबोधाय छन्दोभ्यः समाहृत्य समाहृत्य समाम्नाता। सैषा छन्दोऽवयवभूता छन्दोधर्मिण्येव यथायथापन्नस्तागौर्गोधर्मा इति ॥

॥ श्रीसीतारामाभ्यां नमः ॥

पूर्वषट्कः ।

—:०:—

अथ निरुक्तम् प्रथमाध्यायस्य

प्रथमपादः ।

॥ ॐ॥ समाम्नायः समाम्नातः स व्याख्यातव्यस्तमिमं समाम्नायं निघण्टव इत्याचक्षते निघण्टवः कस्मान्निगमा इमे भवन्ति छन्दोभ्यः समाहृत्य समाहृत्य समाम्नातास्ते निगन्तव एव सन्तो निगमनान्निघण्टव उच्यन्त इत्यौपमन्यवोऽपि वा हननादेव स्युः समाहता भवन्ति। यद्वा समाहृता भवन्ति यान्येतानि चत्वारि पदजातानि नामाख्याते चोपसर्गनिपाताश्च तानीमानि भवन्ति तत्रैतन्नामाख्यात-योर्लक्षणं प्रदिशन्ति भावप्रधानमाख्यातं सत्त्वप्रधानानि नामानि तद्यत्रोभे भावप्रधाने भवतः पूर्वापरीभूतं भाव-माख्यातेनाचष्टे व्रजति पचतीत्युपक्रमप्रभृत्यपवर्गपर्यन्तं मूर्तं

सत्वभूतं सत्वनामभिर्ज्या पक्तिरित्यद इति सत्त्वानामु-
पदेशः ॥ १ ॥

अयञ्च तस्या द्वादशाध्यायी भाष्यविस्तरः । तस्य इदमादि-
वाक्यम् —"समाम्नायः समाम्नातः"—इति । गवादिर्देवपत्न्यन्तः
शब्दसमुदायः समाम्नाय उच्यते । समाङ्पूर्वस्य म्नातेरभ्यासार्थस्य
कर्मणि कारके समाम्नायः । समभ्यस्यते मर्य्यादयाऽयमिति
समाम्नायः । स च ऋषिभिर्मन्त्रार्थपरिज्ञानायोदाहरणभूतः
पञ्चाध्यायी शास्त्रसंग्रहभावेन एकस्मिन्नाम्नाये ग्रन्थीकृत इत्यर्थः ॥

तस्य किमिति? "स व्याख्यातव्य."। स च यो [यः]। समा-
म्नातः छन्दस्यैवावस्थितो गवादिभिरन्यैर्वा निरुक्तैर्यः समाम्नातः ।
अयञ्च एतस्मिन्निरुक्ते स एव उभयलक्षणोऽपि व्याख्यातव्यः ॥
आह, कथमेतद्गम्यते असमाम्नानव्याख्यानमप्यत्राभिप्रेतमिति?
समाम्नानार्हाणां वा किमर्थमसमाम्नानमिति उच्यते—निर्वचन-
लक्षणोपदेशात् । निर्वचनप्रसक्तानाश्वमृगकर्णदक्षिणालक्ष्मीनिघण्टु-
भद्राथ·शब्दप्रभृतीनामेवमाद्यानां निर्वचनोपदेशात् ज्ञायतेऽसमान-
व्याख्यानमप्यत्राभिमतमिति । यत्पुनरेतदुक्तं समाम्नानार्हाणां वा
किमर्थमसमाम्नानमिति । अत्र ब्रूमः,—न हि समाम्नानार्हाणा-
मन्तोऽस्ति, नेषां सर्वेषां समाम्नाने शास्त्रान्त एव न स्यात्,
अतश्चाध्ययनश्रवणज्ञानशक्तिहानदोषः प्रसज्येत । शक्यश्च तावल्ल-
क्षणोद्देशोदाहरणभूतनिघण्टुशब्दसमवायेनाधीतवेदेन · मेधाविना
तपस्विना लक्षणवि.निशोगार्थच्छन्दोदैवतनिदानविदाभियुक्ते-

नागमवता मन्त्रार्थोऽभ्यूहितुमित्येतावतैव निघण्टुषु शब्दसमुदायः समाम्नातः। तस्मादुपपन्नमसमाम्नातव्याख्यानमप्यत्राभिमतमिति। असमाम्नानञ्च सर्वेषां शास्त्रातिगौरवभयादिति। "व्याख्यातव्यः" विसृज्य इमान्यत्र नामानि, इमान्याख्यातानि, उपसर्गा इमे निपाता इमे, इदं सामान्यलक्षणम्, इदं विशेषलक्षणम्, इमान्येकार्थानि, इमान्यनेकार्थानि, इमान्यवगतसंस्काराणि, इदमभिधानम्, इदमभिधेयम्, इदमभिधानस्य निर्वचनमित्येवंविधया मर्यादया परिपाट्या यथासमाम्नात आख्यातव्यो निर्वक्तव्य इत्यर्थः॥

"तमिमं समाम्नायं निघण्टव इत्याचक्षते"। तं च योऽसमाम्नातश्छन्दस्येवावस्थितोऽगवादिरन्यैराचार्यैः निरुक्तैः समाम्नातः, तमिमं च निघण्टव इत्याचक्षते। अन्येऽप्याचार्या इति वाक्यशेषः। निरूढाहीयमेतस्मिञ्छन्दःसमुदाये सञ्ज्ञेत्यभिप्रायः॥

"निघण्टवः कस्मात्"—इति। निघण्टुशब्दव्युत्पिपादयिषया प्रश्नः॥

निर्विवक्षयैदमाह—"निगमा इमे भवन्ति"। येष्वभिधाननिर्वचनप्रारम्भकेष्वाचार्यः अयं यास्को निरुक्तकारः कस्माच्छन्दमुत्तरत्र न कुर्यात्, तेष्वपि व्याख्याकाले कस्मादिति शब्दः समुत्पाद्यः। तथाहि व्याख्यासाफल्यं भवति। निगमा इमे भवन्ति। निश्चयेनाधिकं वा निगूढार्था एते परिज्ञाताः सन्तो मन्त्रार्थान् गमयन्ति ततोनिगमसञ्ज्ञा निघण्टव एव इमे भवन्ति॥

आह,—कः पुनरेतेषु विशेषो येनैत एव ज्ञापयन्तीति। उच्यते,—यस्मादेते गवादयः "छन्दोभ्यः समाहृत्य

समाम्नाता"। छन्दांसि मन्त्राः तेभ्य उपलक्षितसामर्थ्या समाहृत्य ग्रन्थीकृता इत्यर्थः। आह,—कस्मात् पुनरेतावन्त एव ग्रन्थीकृता इति। उच्यते,—इतो यस्मादेतैरेव छन्दस्युपस्थितैरविनिविष्टधियामपि मेधाविना तपस्विना लक्षणविनियोगार्षच्छन्दोदैवतनिदानविदामपि सता मन्त्रार्थपरिज्ञानायोद्यमभङ्गं क्रियते, दुःपरिज्ञानत्वात् तेषाम्, एतेषु परिज्ञातेषु अप्रतियत्नेन शक्यते मन्त्रार्थं परिज्ञातुमिति अत उच्यते न एव ज्ञापका भवन्तीति। अतएतत्प्रयोजनसामर्थ्यां समाहृत्य समाम्नाता इति॥

निगमयितार इति प्रत्यक्षवृत्तिः। यस्मान्निगमयितार एते निगन्तव इति निघण्टव इत्युच्यते। उक्तञ्च,—"वर्णागमो वर्णविपर्ययश्च द्वौ चापरौ वर्णविकारनाशौ। धातोस्तदर्थातिशयेन योगस्तदुच्यते पञ्चविधं निरुक्तम्"॥ वक्ष्यति चायमपि,—वर्णविपर्ययवर्णव्यापत्तिलक्षणम्। त एते निगन्तवः सन्तो निघण्टव उच्यन्ते। इत्येवमतिपरोक्षवृत्तयो निर्वक्तव्याः। प्रायेण चोणादिषु परोक्षवृत्तयः शब्दाश्चिन्त्यन्ते। तत्र तेषां लक्षणमुपेक्षितव्यम्। येषामपि लक्षणं नास्ति, तेषामपि तत्र कल्प्यम्। अपरिसमाप्ता ह्युणादय इति लक्षणविदः प्रतिजानते सर्वथापि लक्षणासम्भवे पृषोदरादिपाठसिद्धिरेव द्रष्टव्या। तत्र हि यथाध्ययनमेव शब्दाः साधीयांसो भवन्त्यमित्याहारानभिघातायेति हि लक्षणविदो मन्यन्ते। इत्यौपमन्यवः आचार्यो मन्यत इति वाक्यशेषः। उपरतमन्युरुपमन्युस्तस्यापत्यमौपमन्यवः। कीर्त्तिप्रथनार्थमौपमन्यवग्रहणम्॥

"अपि वाऽऽहननादेव स्युः समाहता भवन्ति"। अपि चैवं यथोक्तम्। अपि चैवमन्यथा निघण्टवः स्युः। कथमिति? आहननादेव। न निगमनादित्यभिप्रायः। विद्यमानमपि निगमनमविवक्षितमेतस्मिन् पक्षे। अनेकक्रियायोगेऽपि हि सति काञ्चिदेव क्रियामङ्गीकृत्य नामधेयप्रतिलम्भो भवति। तदुत्तरत्र वक्ष्यामः। आह, किमेतेष्वाहतमिति? उच्यते,—समाहता भवन्ति। समः स्थाने नीत्येव नियुक्तः। दर्शयिष्यति चायमुपसर्गोच्चत्वयं निरित्येव समित्येतस्य स्थाने इति। आङ् विद्यमानएवाव्याहतो मर्यादार्थप्रकाशनाय हन्तेः पाठार्थे वर्त्तमानस्यानेकार्थे—

त्वाद्धातुना वर्णव्यापत्त्या आङ्शब्दस्य हकारस्थाने वकारः।
अथ कोऽर्थः एतस्मिन् पञ्चाध्यायीसंग्रहे मर्यादया पठिता इति
भवन्ति? तस्मात्समाहृता समाहृत्य एते सन्त उपसर्गं यस्य
यौपसर्गाभ्याहारवर्णव्यापत्तिभिर्निष्पन्नः इत्युच्यन्ते। प्रसिद्धश्च
पाठार्थे हन्ते प्रयोग, यत्र हि एकारो भवन्ति—'ब्राह्मणे इद-
माहतम्' 'मन्त्रे इदमाहतम्'—इति। अर्थप्राधान्यादर्थनिर्वचनवशेन
शब्दविपरिणामोऽपि प्रदर्शितः॥

"यद्वा, समाहृता भवन्ति"। पूर्ववदेवोपसर्गव्यत्यय उपसर्गा-
भ्याहारोऽप्यापि। धातुस्तु हरतिरेव। सम् एतस्मादित्यर्थः।
एतस्माद्धा एते समाहृता भवन्ति छन्दोभ्यः, तस्मात् समाहरण-
क्रियायोगात् समाहृत्य एते समाहृताः। अत्र पूर्ववदेवोपसर्ग-
व्यत्ययादिप्रयोगेण निष्पन्नः इत्युच्यते। एतस्मिन्नपि निगमन
समाम्नायविषये निष्पत्तु विदमार्थ [illegible] कृत्वा समाहरण-
क्रियायोगहेतुको नाम [illegible] उक्त। एवमेव निरुक्तार्थो
[illegible] वा [illegible] ॥

विशेषलक्षणव्यवस्थाभावात्। न हि तत्र विशेषलक्षणव्यवस्था काचिदस्ति योऽयमेकोऽवतिष्ठेत, अन्ये व्यावर्त्तेरन् अपि चोक्तं वार्त्तिककारेण। "यावतामेव धातूनां लिङ्गं रूढिगतं भवेत्। अर्थश्चाप्यभिधेयस्थस्तावद्भिर्गुणविग्रहः"—इति। रूढिशब्दगतानाञ्च धातूनां रूढिशब्दवाच्येऽर्थे क्रियायोगे सति एतदभावे तु क्रियाया रूढिशब्दे वर्त्तमानमपि धातुलिङ्गमकिञ्चित्करम्। स एव क्रियाभावः तदाश्रयनिर्वचनव्यावर्त्तको भवति। ता एताः तिस्रः क्रिया निगमनसमाहननसमाहरणाख्याः निघण्टुषु विद्यन्ते, तदभिधायिन्यपि च रूढिशब्दनिरुच्यमाने गमिर्हन्तिर्हरतिश्चाद्यपूर्विकया सन्निपत्य वदन्ति'—'समानुरूपं मयैतं निर्ब्रूहि' 'मयैतं निर्ब्रूहि' इति। गमिस्तत्र गकारमात्मीयं व्यापन्नं मन्यते घकारं तथा हन्तिहरती हकारं व्यापन्नं घकारं मन्यते। तस्मादयमनेकैर्धात्वर्थैर्निघण्टुशब्दो निरुक्त एवश्चार्तायाभिधाननिर्वचनप्रदर्शनाय॥

"तद्यान्येतानि चत्वारि पदजातानि नामाख्याते चोपसर्गनिपाताश्च तानीमानि भवन्ति"। इहैतावदेवोक्तं समाम्नायो निघण्टव इति, समाम्नायशब्दपर्य्यायप्रसक्तस्य च निघण्टुशब्दस्य व्युत्पत्तिरुक्ता, न तु निघण्टुशब्दस्यार्थतत्त्वमवधारितं, तदवधार्य्यत इति पर्य्यनुयुक्तस्तच्छन्दः। किं पुनस्तदिति? यान्येतानि चत्वारि पदजातानि, या एताश्चतस्रः पदजातयः। क? लोके वेदे च। कतमानि तानि? नामाख्याते चोपसर्गनिपाताश्च। किन्तेषामिति? इमानि चत्वार्य्यपि पदजातानि सन्त्येतस्मिन् शास्त्रे। किमिति निघण्टुसमूहानि भवन्ति? नित्यमेवानु-

विधीयमानानि भवन्तीत्याह। न कदाचिदपि न भवन्ति, नित्यं भवन्त्येवेत्यभिप्रायः॥ चत्वारीति चतुर्ग्रहणमवधारणार्थम्, नैकं पदजातं, यथार्थः पदमैन्द्राणामिति, नापि द्वे, यथा सुबन्तं तिङन्तञ्च, नापि त्रीणि, निपातोपसर्गावेकतः कृत्वा, नापि पञ्च, षड्वा, यथा गतिकर्मप्रवचनीयभेदेनेति॥ पदजातानीति पदगणा इत्यर्थः। जातशब्दो हि गणे प्रसिद्धः। तद्यथा। गोजातम-श्वजातमिति। तद्वदिहापि। तत्र, नामपदगणः, स्त्रीपुन्नपुंसक-लिङ्गप्रविभागेन, तथाऽऽख्यातपदगणः, कर्तृवचनभाववचनकर्म-वचनप्रविभागेन, तथोपसर्गगणः, आङादिः, तथा निपातगणः, इवादिः। एवमभिप्रेत्योक्तं चत्वारि पदजातानीति। अत्र नामाख्यातयोः पूर्वमभिधानं प्राधान्यात्, अप्राधान्यादुपसर्ग-निपातानां पश्चात्। उभे अपि नामाख्याते निपातोपसर्गनिर-पेक्षे अपि सती स्वमर्थं ब्रूतः, न तूपसर्गनिपातानां नामाख्यात-निरपेक्षाणामर्थोऽस्ति। वक्ष्यति हि,—"न निर्बद्धा उपसर्गा अर्थान्निराहुरिति शाकटायनः"—इति। वाच्ये, न चैते अर्थ-नार्थवती। द्योत्ये, नोपसर्गनिपाता इति चाप्राधान्यम्। नामा-ख्यातयोस्तु कर्मोपसंयोगद्योतका भवन्तीति। तस्मादुपपन्नं भवति प्राधान्यान्नामाख्यातयोः पूर्वमभिधानम्, अप्राधान्याच्च पश्चादुपसर्गनिपातानामिति। नामाख्याते इतरेतराकाङ्क्षित्व-मुभयोर्नामाख्यातयोः समासेनाभिधानम्। कथमितरेतराका-ङ्क्षित्वमिति? यज्ञदत्त इति हि नामशब्दस्तावदेव साकाङ्क्षो भवति, यावत् पचति पठति इत्याद्याख्यातशब्दैर्न निराकाङ्क्षी-

क्रियत इति, तथा पचतीत्याख्यातशब्दस्तावदेव साकाङ्क्षो भवति, यावन्न यज्ञदत्तशब्दः पचति यज्ञदत्त ओदनमिति, इतरेतराकाङ्क्षित्वमुभयोर्नाख्यातयोः, समानकार्य्यत्वं चैतयोर्लक्ष्यते। चाच्येनार्थेनार्थवत्त्वमित्यर्थः समस्येते नामाख्याते इति। नाम्नः पूर्वनिपातोऽल्पाच्तरत्वात्। नामपदवाच्यर्थाश्रयक्रियोपलक्ष्यत्वाचाख्यातस्य पश्चान्निपातः उपसर्गनिपाता इति। उभयेषामुपसर्गनिपातानां नामाख्यातयोर्थविशेषद्योतकत्वात् समानकार्य्यत्वमित्यतः समस्यन्ते। आख्यातसहयोगित्वादुपसर्गाणामाख्यातानन्तरं पाठः, परिशेषाणां निपातानां पश्चात् अपरिमिताश्च निपाता इति॥

"तत्रैतन्नामाख्यातयोर्लक्षणं प्रदिशन्ति"। तत्र तस्मिन्, लोकवेदप्रसिद्धे पदचतुष्टये निघण्टुशब्दसमानसञ्ज्ञोपलक्षिते, ये तावन्नामाख्याते तयोस्तावदेतल्लक्षणं प्रदिशन्ति। कतमत्? यदेतद्वक्ष्यमाणमित्यभिप्रायः। प्रदिशन्ति . प्रविभज्येदं नाम्नां लक्षणमिदमाख्यातस्येत्येवं दिशन्ति उपदिशन्त्याचार्या इति वाक्यशेषः। आह, लक्षणोपदेशः कस्मात्? अनुक्रमणेनैव सिद्धत्वात्। अनुक्रमणेनैव हि वक्ष्यति "इमानि पृथिवीनामधेयान्येकविंशतिः (२, २, १०)" "हिरण्यनामान्युत्तराणि पञ्चदश (२, ३, १)" कान्तिकर्माण उत्तरे धातवोऽष्टादश (३, २, १०)", गतिकर्मण उत्तरे धातवो द्वाविंशं शतम् (३, २, १०)"—इति। तत एव विज्ञास्याम इमानि नामानीमान्याख्यातानीति। तस्मादयमनर्थको लक्षणोपदेशः? नानर्थकः। कस्मात्? अथापि हि लक्षणं

समाम्नातान्यसमाम्नातानि च व्याप्य वर्त्तते। यत्पुनरेतदुक्तमनुक्रमणादेव विज्ञास्याम इति। अत्र ब्रूमः,—निर्देशोऽसौ न हि लक्षणम्, निर्देशश्च परिच्छिन्नविषयः। स तर्हि किमर्थ इति? शास्त्रे रूपस्वभावोपप्रदर्शनार्थः। तस्मादसमाम्नातार्थोऽयमादितो लक्षणोपदेशो युक्त इत्युपपन्नम्॥

आह,—तात्पर्य्येणैवेदमन्तरेण समाम्नातवदसमाम्नातानि कस्मान्नोपदिश्यन्ते, अपि च तथा सूपदिष्टानि भवन्तीति? उच्यते,—तथाह्युपदेशगौरवं भवति, ग्रहणशक्तिहानञ्च। अपि चोक्तम्। "ऋषयो ह्युपदेशास्य नान्तं यान्ति पृथक्शः। लक्षणेन तु सिद्धानामन्तं यान्ति विपश्चितः॥"—इति। तस्मादुपदेशगौरवभयाद् ग्रहणशक्तिहानदोषाच्च समानलक्षणोपदेशः क्रियते इति।

आह,—किं पुनस्तल्लक्षणमिति? उच्यते,—"भावप्रधानमाख्यातं, सत्त्वप्रधानानि नामानि"। नामपदवाच्यार्थाश्रयक्रियायङ्गयो भावः। पाकरागत्यागाग्न्य.। स यत्र प्रधानं, गुणभूता क्रिया, तदिदं भावप्रधानम्। किं पुनस्तदिति। आख्यातम्। आख्यायतेऽनेन गुणभावेन वर्त्तमाना अनेककारकप्रविभक्ता स्फुरमाणेव प्रधानद्रव्यभावामिव्यक्त्युन्मुखीभूता क्रिया। तस्याश्च प्राधान्येन प्रवर्त्तमानो भावः स्वात्मलाभप्रधान इत्याख्यातः।

आह,—कथं पुनर्गुणभूता क्रियेति? उच्यते,—तदर्थत्वात्। .. दि सा। भावार्था भावसिद्ध्यर्थमात्मलाभमनुभूय

कारकेषु तण्डुलादौ पाकाख्यं भावमभिनिष्पाद्यावसितप्रयोजनैकदेश एव तिरोभवति। यस्य च यदर्थ आत्मलाभस्तत्तद्गुणभूतं भवति। भावसिद्ध्यर्थश्च क्रियाया आत्मलाभस्तस्माद् गुणभूतेति गम्यते। भावसिद्ध्यैव चानुमीयते क्रिया परोक्षापि सती॥

आह,—कथं पुनः परोक्षा क्रियेति? उच्यते,—न हि सेन्द्रियाणामन्यतमेन स्वरूपस्था सती कदाचिदपि सन्निकृष्यते। किं तर्हि? तदवसाने योऽभिनिष्पद्यते भावः, तेन लिङ्ग्यते। नूनमभिनिर्वृत्ता क्रिया यथा भावोऽयमभिनिष्पादित इति नाभिनिर्वृत्ता चेदभविष्यद् यथैव सा क्रियानिर्वृत्तेर्नाभवदयं भावः, एवं साम्प्रतमपि नाभविष्यत्, अस्ति चायम्। तस्मादभिनिर्वृत्ता क्रियेत्येवमनुमीयते। तदेतदाख्यातं क्रियावाचकमपि सद्भावार्थत्वात् क्रियाया भावं प्रधानमुच्यत इति एवमेके मन्यन्ते। एके पुनर्भावप्रधानमाख्यातमिति प्रकृत्यर्थप्रधानमिति मन्यन्ते। प्रकृत्यर्थविशेषणं हि प्रत्ययार्थाद्य इति। भावः, कर्म, क्रिया, धात्वर्थः, इत्यनर्थान्तरम्। स यत्र प्रधानं गुणभूतानि साधनानि तदिद भावप्रधानम्। किं पुनस्तत्? आख्यातम्। आख्यायन्ते स्त्रीपुन्नपुंसकानि क्रियागुणभावेन वर्त्तमानान्यनेन क्रिया च तेषामुपरि प्राधान्येन वर्त्तमानेत्याख्यातम्॥

आह,—कथं पुनरत्र क्रियायाः प्राधान्यमिति? उच्यते,—सा ह्यत्र शब्दवाच्या। अर्थगृहीतानि तत्साधनानीति। अतः प्राधान्यमत्र क्रियायाः। इतश्च प्राधान्यम्। कुतः? विशेष-

प्रत्ययाधानात्। पचतीति प्रथमपुरुषैकवचनान्ते आख्यात- शब्दो वर्त्तमानकालकर्तृविषयो यत्किञ्चिद्विवक्षितविशेषमेव पक्त्रादिसाधनमात्मन आश्रयभावेनोपलक्षयन्ननेकक्रियाशक्ति मत्यपि पक्त्रादौ साधने पचिक्रियायामेव विशेषप्रत्ययमादधाति, नान्यासु क्रियासु, नापि विशिष्टे पक्त्रादौ साधने। यश्च यस्मिन्नर्थे विशेषेण वर्त्तते शब्दः, स एव तस्य प्रधानम्। विशेषेण च क्रियायामाख्यातशब्दो वर्त्तते, गुणभावेन कारके। तस्माद्विशेष प्रत्ययाधानाद्भावप्रधानमाख्यातमित्युपपन्नम्। अपि च क्रिया व्यापारविज्ञानपरतया पृष्टः—'किं करोति देवदत्त'? क्रियाख्यान- परतयैव प्रत्याचष्टे—'पचतीति'। न त्वोदनमिति पूर्वमुक्त्वा ततः पचतीति ब्रवीति॥

अथ कथमुच्यते भावप्रधानमाख्यातमिति? शृणु,—अमूर्त्ता हि क्रिया निरूपाख्या, सा हि कारकैरभिव्यज्यमाना कारकशरीरे च सती शक्यते निर्देष्टुम्। इतरथा हि अशरीरा सती सा न गृह्येत, अग्रहणे च सति कथमिव निर्दिश्येत। तत्रैव सति, कारकसमूहेनाभिव्यज्यमाना क्रिया यस्मिन् साधने विशिष्टमात्मीयं कार्य्यमारभते पाकाख्य तदभिधानशब्दोपपदैव साक्षाद् ग्रहणा- सम्भवान्निर्दिश्यते। न ह्यनाश्रिता कदाचिदपि गृहीतपूर्वाकृतिरिति साक्षाद् ग्रहणासम्भव। तस्मादोदनकर्मकाख्यां देवदत्तकर्तृकौ- दनशब्दोपपदैव निर्दिश्यते,—ओदनं पचति देवदत्त इति। तत्रा- विवक्षितस्वार्थ ओदन शब्दः। अपि च क्रियाव्यापारविपृच्छिष- यैव पृष्टः—किं करोतीति, क्रियाव्यापारमात्रमेव प्रत्याचष्टे—

पचतीति। ततः किमिति, पर्य्यनुयुक्ते शब्दान्तरेणापाकरोति देवदत्त ओदनमिति। तस्माच्छब्दान्तरवाच्यत्वात् साधनस्य पचतीत्यत्र क्रियैव प्रधानमित्युपपन्नम्। यत् पुनरेतदुक्तमोदनमिति पूर्वमुक्त्वेति, तत्र ब्रूमः,—स हि पर्य्यनुयुयुक्षां साधनगतां भाविनीमाशङ्कमानः पर्य्यनुयोगमात्मनो बुद्ध्यवस्थं कृत्वा तदपाकरणार्थमोदनमिति पूर्वं ब्रवीत्येवं तत्रापि द्रव्यविशेषपरिज्ञानार्थो द्वितीयः पर्य्यनुयोगोऽनुक्तो द्रष्टव्यः। तस्मात् पचतीति शब्दवाच्यत्वादत्र क्रियायाः शब्दान्तरवाच्यत्वात् द्रव्यस्य क्रियैव प्रधानमिति। इतश्च न द्रव्यप्रधानमाख्यातम्। एकस्मिन् वाक्ये द्वयोराख्यातयोरसमवायात्। पचतिपठतीत्युभयोः प्राधान्यादितरेतरेण समवायो नास्ति। न हीतरः शब्द इतरत्र गुणी भवति। द्रव्यशब्दे च समवायात्, समवैति द्रव्यशब्देनाख्यातशब्दः। पचति देवदत्त इत्युक्ते पचिक्रियागुणभूतो लक्ष्यते देवदत्तः। तस्मादुपपन्नं भावप्रधानमाख्यातमिति। अपिचोक्तम्। "क्रियावाचकमाख्यातं लिङ्गतो न विशिष्यते। त्रीनत्र पुरुषान् विद्यात् कालतस्तु विशिष्यते"—इति। तत् पुनरेतच्चतुःप्रभेदमाख्यातं भवति। कर्त्तरि, भावे, कर्मणि, कर्मकर्त्तरि चेति। पचतीति कर्त्तरि। भूयते, पच्यते इति भावकर्मणोः। पच्यते स्वयमेवेति कर्मकर्त्तरि। चतुर्ष्वप्येषु वार्थानि द्रव्याण्यप्रधानानीति क्रिया एव प्रधानम्। तामभिदधत् तयैव लक्ष्यमाण आख्यातसञ्ज्ञो भवतीत्युक्तम्। आख्यातजत्वान्नाम्नां प्रतिज्ञाक्रमं भित्त्वा पूर्वमाख्यातलक्षणमुक्तम्, पश्चान्नामलक्षणमुच्यते। किं पुनस्तत्?

प्रत्ययाप्रधानात्। पचतीति प्रथमपुरुषैकवचनान्ते आख्यात-शब्दो वर्त्तमानकालकर्तृविषयो यत्किञ्चिदविवक्षितविशेषमेव पक्त्रादिसाधनमात्मन आश्रयभावेनोपलक्षयन्ननेकक्रियाशक्ति-मत्यपि पक्त्रादौ साधने पचिक्रियायामेव विशेषप्रत्ययमादधाति, नान्यासु क्रियासु, नापि विशिष्टे पक्त्रादौ साधने। यश्च यस्मिन्नर्थे विशेषेण वर्त्तते शब्दः, स एव तस्य प्रधानम्। विशेषेण च क्रियायामाख्यातशब्दो वर्त्तते, गुणभावेन कारके। तस्माद्विशेष-प्रत्ययप्राधान्याद्भावप्रधानमाख्यातमित्युपपन्नम्। अपि च क्रिया-व्यापारविज्ञानपरतया पृष्टः—'किं करोति देवदत्त.' ? क्रियाख्यान-परतयैव प्रत्याचष्टे—'पचतीति'। न त्वोदनमिति पूर्वमुक्त्वा ततः पचतीति ब्रवीति ॥

अथ कथमुच्यते भावप्रधानमाख्यातमिति ? शृणु,—अमूर्त्ता हि क्रिया निरुपाख्या, सा हि कारकैरभिव्यज्यमाना कारकशरीरे च सती शक्यते निर्देष्टुम्। इतरथा हि अशरीरा सती सा न गृह्येत, अग्रहणे च सति कथमिव निर्दिश्येत। तत्रैवं सति, कारकसमूहेनाभिव्यज्यमाना क्रिया यस्मिन् साधने विशिष्टमात्मीयं कार्य्यमारभते पाकाख्यं तदभिधानशब्दोपपदैव साक्षाद् ग्रहणा-सम्भवान्निर्दिश्यते। न ह्यनाश्रिता कदाचिदपि गृहीतपूर्वाऽऽकृतिरिति साक्षाद् ग्रहणासम्भवः। तस्मादोदनकर्मकार्य्या देवदत्तकर्त्तृकौ-दनशब्दोपपदैव निर्दिश्यते,—ओदनं पचति देवदत्त इति। तत्रा-विवक्षितस्वार्थ ओदन शब्दः। अपि च क्रियाव्यापारपिपृच्छिष-यैव पृष्टः—किं करोतीति, क्रियाव्यापारमात्रमेव प्रत्याचष्टे—

पचतीति। ततः किमिति, पर्य्यनुयुक्ते शब्दान्तरेणापाकरोति देवदत्त ओदनमिति। तस्माच्छब्दान्तरवाच्यत्वात् साधनस्य पचतीत्यत्र क्रियैव प्रधानमित्युपपन्नम्। यत् पुनरेतदुक्तमोदनमिति पूर्वमुक्त्वेति, तत्र ब्रूमः,—स हि पर्य्यनुयुयुक्षां साधनगतां भाविनीमाशङ्कमानः पर्य्यनुयोगमात्मनो बुद्ध्यवस्थं कृत्वा तदपाकरणार्थमोदनमिति पूर्वं ब्रवीत्येवं तत्रापि द्रव्यविशेषपरिज्ञानार्थो द्वितीयः पर्य्यनुयोगोऽनुक्तो द्रष्टव्यः। तस्मात् पचतीति शब्दवाच्यत्वादत्र क्रियायाः शब्दान्तरवाच्यत्वात् द्रव्यस्य क्रियैव प्रधानमिति। इतश्च न द्रव्यप्रधानमाख्यातम्। एकस्मिन् वाक्ये द्वयोराख्यातयोरसमवायात्। पचतिपठतीत्युभयोः प्राधान्यादितरेतरेण समवायो नास्ति। न हीतरः शब्द इतरत्र गुणी भवति। द्रव्यशब्दे च समवायात्, समवैति द्रव्यशब्देनाख्यातशब्दः। पचति देवदत्त इत्युक्ते पक्तिक्रियागुणभूतो लक्ष्यते देवदत्तः। तस्मादुपपन्नं भावप्रधानमाख्यातमिति। अपिचोक्तम्। "क्रियावाचकमाख्यातं लिङ्गतो न विशिष्यते। त्रीनत्र पुरुषान् विद्यात् कालतस्तु विशिष्यते"—इति। तत् पुनरेतच्चतुःप्रभेदमाख्यातं भवति। कर्त्तरि, भावे, कर्मणि, कर्मकर्त्तरि चेति। पचतीति कर्त्तरि। भूयते, पच्यते इति भावकर्मणोः। पच्यते स्वयमेवेति कर्मकर्त्तरि। चतुर्ष्वप्येषवयवार्थानि द्रव्याण्यप्रधानानीति क्रिया एव प्रधानम्। तामभिदधत् तथैव लक्ष्यमाण आख्यातसञ्ज्ञो भवतीत्युक्तम्। आख्यातजत्वान्नाम्नां प्रतिज्ञाक्रमं भित्त्वा पूर्वमाख्यातलक्षणमुक्तम्, पश्चान्नामलक्षणमुच्यते। किं पुनस्तत्,

सत्वप्रधानानि नामानि। लिङ्गसङ्ख्ययोरत्र सद्भाव इति सत्त्वम्। तथा लक्षणोपपत्तेः। तयोः प्रधान गुणभूता क्रिया नामान्येव तानि। नमन्त्याख्यातशब्दे गुणभावेन, नमन्ति वा स्वमर्थमाख्यातशब्दयान्ये गुणभावेनेति नामानि। यथैव ह्याख्याते विद्यमानमपि द्रव्यमविवक्षितमेवमिहापि विद्यमानापि क्रिया अविवक्षिता। द्रव्यपरत्वान्नामशब्दस्य तद्धिक्रियाजनितमुत्तरकाल क्रियाशेष भूतमभिधाय धात्वर्थोऽस्मो व्यावर्त्तते ॥

आह,—अथ पुनर्नास्ति क्रिया विद्यत इति, विद्यमानापि वा विवक्षितेति? उच्यते। प्रकृति, प्रत्यय, विभक्तिरिति त्रेधा विभज्यमानमेतावद्देवतथाम। तत्र प्रकृतिर्धातुरित्येकोऽर्थः। धातुश्च पुन क्रियावचन स च नास्ति विद्यत इति तदभिधेय भूतया क्रियया भवितव्यम्। यथाद्यस्य यत्रार्थस्तत्र तदभिधायक शब्द, यत्र शब्दस्तत्र तदर्थोऽस्य इति। सम्पृक्तौ हि शब्दार्थौ वाच्यवाचकसम्बन्धेन नित्यमिति। एव तावत् क्रिया विद्यते यत् पुनरेतदुक्त —विद्यमानापि क्रिया कथमविवक्षितेति? अत्र ब्रूम, —नास्ति यो धातु स्वरूप प्रयोजयति तेन प्रातिपदिकेनाभिभूत क्रियाभिधानशक्तिः प्रातिपदिकान्तर्गतेतिरूपितेन स्वमर्थमुद्भावयि तुमशक्त्, एव प्रातिपदिकत्वमेवानुवर्तमानो द्रव्यप्रधान एव भवती त्येव न विवक्षिता क्रिया। सा नु विद्यमानापि विगृह्यमाणं नास्ति प्रातिपदिकनिबन्धनादनुसृज्यमाना द्रव्यमर्थं प्रकाशयति, न सा[?] यत्रादिति द्रव्यपरता नामशब्दस्य सम्यते। तथार्थो मम। "द्रव्योपादानिमित्त ... द्रव्य ... । ... पुन

नामेत्याहुर्मनीषिणः ॥"— इति। पुनश्चोक्तम्। "अष्टौ यत्र प्रयुज्यन्ते नानार्थेषु विभक्तयः। तन्नाम कवयः प्राहुर्भेदे वचनलिङ्गयोः॥ निर्देशः कर्म करणं प्रदानमपकर्षणम्। स्वाम्यर्थोऽप्यधिकरणं विभक्त्यर्थाः प्रकीर्तिताः॥"—इति। स्त्रीपुन्नपुंसकभेदं निपातोपसर्गाणामपि वा कश्चिन्नामत्वमपेक्ष्य बहुवचनेनोक्तं नामानीति। अपरे पुनर्भावकालकारकसङ्ख्याश्चत्वार एतेऽर्था आख्यातस्य। तेषां भावप्रधानता भवति। अतो भावप्रधानमाख्यातमित्युक्तम्। नाम्नोऽपि सत्त्वं द्रव्यं सङ्ख्या लिङ्गमित्येतेऽर्थाः। तेषां द्रव्यं प्रधानमित्यतः सत्त्वप्रधानानि नामानीत्युक्तम्॥

एवमेके मन्यन्ते,—"तद्यत्रोभे भावप्रधाने भवतः"। एवं तावदनयोर्नामाख्यातयोः परस्पराविनाभूतयोः स्वपदार्थोक्तावेकस्य भावप्राधान्यमेकस्य सत्त्वप्राधान्यम्। अथ पुनर्यत्रैते उभे भवतः। क च पुनरेते उभे भवतः? वाक्ये। तत्र कस्य प्रधानमर्थः, कस्य गुणभूत इति? शृणु,—भावप्रधाने भवतः, तस्य चिकीर्षितत्वात्। वाक्ये ह्याख्यातं प्रधानं, तदर्थत्वात् गुणभूतं नाम। तदर्थस्य भावनिष्पत्तावङ्गभूतत्वात्। एवं तावदाख्यातं वाक्ये प्रधानम्॥

अथ पुनः कथमभिनिर्वर्त्यमानो भाव आख्यातेनोच्यते? किं वा तदाख्यातमिति? यतो लोकप्रसिद्ध्यैवोदाहरति। तत्प्रसिद्धत्वाच्छब्दार्थसम्बन्धस्य। "पूर्वापरीभूतं भावमाख्यातेनाचष्टे व्रजतिपचतीत्युपक्रमप्रभृत्यपवर्गपर्यन्तम्"। अपूर्वमनपरं सन्तमेकत्वात् पूर्वापरीभूतं पूर्वापरमिव पौर्वापर्येणावस्थितमेकं

मनेकासु क्रियासु आश्रितमुपानदधिनहनपूर्वोत्तरपदविहरणपथि भोजनशयनासनोदकपानाद्यास्वाश्रित तद्भिनिर्वृत्तिवशेनाभिनि र्वर्त्तमान कस्मैचित् पृच्छते किं करोति? अन्य आचष्टे व्रजतीति। अविभक्तकर्तृक द्वितीयमिति उदाहरणद्वय भाव द्वयोपप्रदर्शनार्थम्। उपक्रमप्रभृतीति। उपक्रम आरम्भस्तस्मा दारभ्यापवर्गपर्यन्त यावदन्त्या क्रियेत्यर्थ ॥

आह,—अन्त्यासक्रियाँ भावनिर्वृत्तिदर्शनादन्त्ययैव निर्वर्त्यत इति? शृणु, पूर्वासामभावे अन्त्यैव न स्यात्, पूर्वापेक्ष हि तस्या अन्त्यात्वम्। अपि च। प्राप्तिफलो हि व्रजतिर्न चैकया क्रिय याऽभिमतदेशान्तरे प्राप्तिरस्ति। तस्मादुपक्रमाद्याभि क्रिया भिरीपद्भिनिष्पाद्यमानो भावोऽन्त्यायामभिसन्तिष्ठते। तत सन्निकर्षे गृह्यते न त्वसावन्त्ययैव निर्वृत्त इत्यन्ते गृहीत। अपि च, प्रसिद्धमेतदुपक्रमादारभ्य यच्च व्रजित, यच्च व्रज्यते, व्रजिष्य माण, तत्सर्वमेकीकृत्य वक्तारो भवन्ति व्रजति देवदत्त इति न प्रसिद्धिरपरोद्ध न्याय्या। यथावस्थितानां हि शब्दानामन्वा ख्यानमात्रमेव शास्त्रेण क्रियते, नोत्पाद्यन्ते शब्दा, नाप्यर्थेषु विधीयन्ते। तस्मात प्रसिद्धशास्त्रसमयोऽपि लौकिकप्रसिद्ध्यैव पूर्वापरीभूत भावमाख्यातेनाचष्टे, व्रजतिपचतीत्युपक्रमप्रभृत्य पवर्गपर्यन्तम्। तस्मादुपपक्रमनेकक्रियाभिर्निर्वर्त्यमानो भाव आख्यातेनोच्यत इति। आह च "क्रियासु बह्वीष्वभिमश्रितो य पूर्वापरीभूत इवैक एव। क्रियाभिनिर्वृत्तिवशेन सिद्ध आख्या-तशब्देन तमर्थमाहु ॥"—इति ॥

"मूर्त्तं सत्वभूतं सत्वनामभिः"। कदाचित् तु तमेव भावं तथैवोपक्रमप्रभृत्यभिनिर्वर्त्तमानमपवर्गपर्य्यन्तं मूर्त्तं सत्वभूतं सत्वरूपिणं लिङ्गसङ्ख्यायुक्तैः सत्वनामभिराचष्टे ॥

कथम्? "व्रज्या पक्तिरिति"। तत्रोक्तो विशेषः। कृदभिहितो भावो द्रव्यवद्भवति सोऽयं प्रयुक्तस्य लक्षणस्य प्रयोगमपेक्ष्य क्वचिदपवादः। आह च। "क्रियाभिनिर्वृत्तिवशोपजातः कृदन्तशब्दाभिहितो यदा स्यात्। सङ्ख्याविभक्त्यव्ययलिङ्गयुक्तो भावस्तदा द्रव्यमिवोपलक्ष्ये॥"—इति ॥

आह,—कस्मात् पुनरेक एव भावस्तिङन्तेन कृदन्तेन चाभ्यधोच्यत इति? उच्यते,—शब्दस्वाभाव्याद्वते नान्यदत्र प्रयोजकमस्ति। अपिचोक्तमस्माभिरवस्थितानामेव शब्दानामभिधानाभिधेयसम्बन्धेनाभिसम्बन्धानामेव नित्यमन्वाख्यानमात्रमेव क्रियते। नोत्पाद्यन्तेऽर्थेषु वा विधीयन्ते शब्दा इति। व्रज्यापक्तिरित्युदाहरणद्वयमुक्तप्रयोजनम् ॥

"अद इति सत्वानामुपदेशः" इति। भावोऽधिकृतः। स च पुनः सत्वभूतो नेतरः, यतस्तन्नमप्रत्ययेनैव नाम्नो यदवशिष्यते तदुच्यते। किं पुनस्तत् सामान्यविशेषवाचित्वम्? तत्राद इति सत्वानामुपदेशः। सामान्यत इति वाक्यशेषः। सर्वेषामपि सत्वानामध्ययने प्राप्ते लिङ्गाविशिष्टत्वादिदमेवैकमुदाहृतमुपप्रदर्शनार्थम् ॥ १ ॥

आह,—विशेषोपदेशः कथमिति? उच्यते खण्डसूत्रम्,—

गौरश्वः पुरुषो हस्तीति / भवतीति भावस्यास्ते शेते व्रजति तिष्ठतीतीन्द्रियनित्यं वचनमौदुम्बरायणस्तत्र चतुष्ट्वं नोपपद्यते युगपदुत्पन्नानां वा शब्दानामितरेतरोपदेशः शास्त्रकृतो योगश्च व्याप्तिमत्वात्तु शब्दस्याणीयस्त्वाच्च शब्देन सञ्ज्ञाकरणं व्यवहारार्थं लोके तेषां मनुष्यवद् वताभिधानं पुरुषविद्यानित्यत्वात् कर्मसम्पत्तिर्मन्त्रो वेदे ॥ २ ॥

"गौरश्वःपुरुषो हस्तीति"। सत्त्वानां विशेषोपदेश इति वाक्यशेषः॥ सोपाधिकनिरुपाधिकोपप्रदर्शनार्थमनेकोदाहरणम्। सामान्यवृत्त्या विशेषवृत्त्या चोभयथा शब्दः प्रवर्त्तत इत्युभयमुपदर्शितम्॥

"भवतीति भावस्य"। सामान्येनोपदेशः। अत्र हि सर्वेषां सत्तावाचिनामध्ययने प्राप्ते भवतिरेवैक उदाहरणार्थः परिगृहीतः। विद्यमानत्वमेवानुभवन्तः सर्वे भवतिशब्दवाच्या अन्याभिर्विशेषक्रियाभिरभिसम्बध्यन्ते। तस्माद्भवतीति सर्वक्रियाप्रसवबीजभूतमस्तित्वमात्रमेव निरुपपदेन भवतिशब्देनोच्यत इत्युपपन्नं भवति। सामान्यवाचित्वं विशेषनिर्देशः॥

कथमिति? उच्यते,—"आस्ते शेते व्रजति तिष्ठतीति"। सकर्मकाकर्मकोपदर्शनार्थमुभयेषामुदाहरणम्॥

"इन्द्रियनित्यं वचनमौदुम्बरायणस्तत्र चतुष्ट्वं नोपपद्यते"। आह,—इह तावदुक्तं पदचतुष्टयम्। भाववचनता, द्रव्यवचनता,

गुणभावः, प्रधानभावः, पूर्वापरीभावः, सामान्यवाचित्वं, विशेषवाचित्वमिति। नोपपद्यते। कस्मात्? वचनानित्यत्वात्। कः पुनरेवमाहाऽनित्यं वचनमिति? उच्यते,—इन्द्रियनित्यं वचनमिति। इन्द्र आत्मा, स येन ईयते लिङ्ग्यते अनुमीयते चास्त्यसावात्मा कर्त्ता, यस्येदं करणम्, नाकर्त्तृकं करणमस्तीति, तदिन्द्रियम्। तस्मिन्नित्यमिन्द्रियनित्यम्। किं पुनस्तत्? वचनम्। उच्यते अनेनेति वचनं वाक्यमित्यर्थः। कतमत्? यदेतन्नामाख्यातोपसर्गनिपातात्मकम्। औदुम्बरायणः आचार्य्यो मन्यत इति वाक्यशेषः। उदुम्बरस्यापत्यमौदुम्बरिः, तस्यापत्यमौदुम्बरायणः॥

आह, - ततः किमिति? उच्यते,—तत्र तस्मिन् वाक्ये एवमिन्द्रियनित्ये सति यदेतत् पदचतुष्ट्यमुक्तमेतन्नोपपद्यते कस्मात्? शृणु,—यावदेव वक्तुर्वागिन्द्रिये वचनम्, तावदेव तदस्तीति शक्यते वक्तुं, प्रच्युतं च नास्ति। अपि च। वाक्यमपि वाक्यं समस्तमुद्भूतं तदिन्द्रियेणावतिष्ठते। यदवयवभूतानि पदान्यवस्थितानि परिसङ्ख्यातुम्। न च विनष्टाविनष्टयोः पदयोः सह परिसंख्यानमस्ति। तस्माद्वचनानित्यत्वात् पदचतुष्ट्वानुपपत्तिरित्युपपन्नम्॥

किं चान्यत्,—"अयुगपदुत्पन्नानां वा शब्दानामितरेतरोपदेशः"। वाशब्दः समुच्चयार्थो "वा विकल्पोपमानद्वन्द्वसमुच्चयार्थेष्विति" हि निपातविदः पठन्ति। वक्ष्यति चायमपि। "वेति विचारणार्थे"—इत्युपक्रम्य "अथापि समुच्चयार्थे भवति"—

इति (१, २, ३)। एवं चैतेषामयुगपदुत्पन्नानां शब्दानां वाक्यावयवभूतानां योऽयमितरेतरोपदेशः। इतरेतरगुणप्रधानभावो नाम्न आख्यातं प्रति गुणभावेनोपदेशः। आख्यातस्य च नाम प्रति प्रधानभावेनोपदेशः। अयं च नोपपद्यते इत्यनुवर्त्तते। किं कारणं? न हि विनष्टं नाम गुणभावमियादाख्याते, नापि नष्टमाख्यातं प्रधानभावमियान्नाम्नि। न हि विनष्टाविनष्टयोरितरेतरगुणप्रधानभावोऽस्ति किं चान्यत ॥

"शास्त्रकृतोयोगश्च"। यश्चायं शास्त्रकृतो योगः शास्त्रदृष्टः शब्दस्य शब्दान्तरेण योगः। तद्यथा। उपसर्गस्य धातुना, धातोः प्रत्ययेन, प्रत्ययस्य लोपागमवर्णविकारैः। अयं वचनानित्यत्वान्नोपपद्यते। किं कारणं? अयुगपदुत्पत्तौ हि सत्यां धातुरचारितो विनष्टः स चायमुपसर्गेण योक्ष्यते, प्रत्ययेन वा।' न हि विनष्टाविनष्टयोर्योगोऽस्ति। तस्माद्य एष नामाख्यातयोरितरेतरगुणः प्रधानभाव उपसर्गनिपातानां नामाख्याताभ्यां योगे, यच्च पदचतुष्टयमुक्तं, सर्वमेतदसम्यगिति। युगपदुत्पन्नानामयुगपदुत्पन्नानामित्येवमारभ्यमाणयोर्वाक्ययोरन्यो व्याख्यामार्गो भवति। नोपपद्यते। युगपदुत्पन्नानामयुगपदुत्पन्नानामित्युभावपि व्याहारौ प्राप्नुतः। समानसंहितत्वात्। इन्द्रियनित्यत्वात् पदचतुष्ट्यानुपपत्तिरित्युच्चारयता शङ्काद्वारेणैतदवतार्यते,—युगपदुत्पन्नानामिति। अथ मतम्,—"अविचालिन एवैते कूटस्था अविनाशिनः शब्दास्ते तु कल्पान्ते"। तस्मादुच्यामिरूपाहिशीर्णेष्वभिधेयेष्वभिधाय कारणभावमापद्यमानेष्वाश्रयामावादेवावस्थातुम-

शक्नुवन् अभिधेयाभिधातृसहिता एव कारणात्ममावमविकसनु-भूयाभिसंस्तवकाले कल्पादावन्यकल्पविशिष्टकर्मनिर्जितकार्य्य-कारणसर्वभूतसाधारणात्ममूर्ते हिरण्यगर्भे विवर्त्तमाने तद्बुद्धि-माश्रयं प्राप्यन्ते, नैव सह युगपदेवाभिव्यज्यन्ते विशेषात्मलाभाय शब्दा इति। अत्र ब्रूमः,—एवमप्येतेषां युगपदुत्पन्नानां युग-पदुत्पत्तावपि सत्यां यद्यपि पदचतुष्टयं प्राप्नोत्येव सहावस्थितानां, तथापीतरेतरव्यपदेश इतरेतरगुणप्रधानभावश्च न प्राप्नोति। न हि युगपदुत्पन्नयोर्गोविषाणयोरितरेतरगुणप्रधानभावोऽस्ति। किं चान्यत्,—कूटस्थेषु चाविचालिषु नित्येषु शब्देषु य एव शास्त्र-कृतो योगः, स एव नोपपद्यते। किं कारणम्? अयुक्ता हि युज्यन्ते, नित्यं युक्ता हि धातव उपसर्गैः प्रत्ययैश्च, प्रत्ययाश्च लोपागमवर्णविकारैरिति। तस्मान्नित्यपक्षेऽपि वचनस्य नैतदुप-पन्नम्। गुणप्रधानभावादिपदचतुष्टयमविकृत्य सर्वमेतदसम्य-गिति॥

"व्याप्तिमत्त्वात्तु शब्दस्य"। उच्यते,—सर्वमेतदुपपद्यते; कस्मात्? व्याप्तिमत्त्वाच्छब्दस्य। व्यापनं व्याप्तिः, सा यस्मि-न्नस्ति, सोऽयं व्याप्तिमान् शब्दः, तद्भावो व्याप्तिमत्त्वम्। तस्माद् व्याप्तिमत्त्वाच्छब्दस्य सर्वमेतदुपपद्यत इति वाक्यशेषः। आह, —कथं पुनर्व्याप्तिमान् शब्द इति? शृणु,—शरीरे ह्यभिधानाभि-धेयरूपा बुद्धिर्हृदयान्तर्गताकाशप्रतिष्ठितयोरभिधानरूपाभिधेयरूप-योर्द्वयोर्मध्येऽभिधानरूपया शास्त्राभिमतप्रयोजनविजिज्ञापयिषया बुद्ध्या पुरुषेण तदभिव्यक्तिसमर्थेन स्वगुणभूतेन

माणः शब्दः उरःकण्ठादिवर्णस्थानेषु निष्पद्यमानस्तथा पुरुषार्था-भिधानसमर्थवर्णादिभावमापद्यमानः पुरुषप्रयत्नेन बहिर्विनिक्षिप्तोऽविनाशिनि व्यक्तिभावमापन्नः श्रोत्रद्वारेणानुप्रविश्य प्रत्याख्यास्य बुद्धिं सर्वार्थरूपां सर्वाभिधानरूपां व्याप्नोतीत्येवं व्याप्तिमान् शब्दः। आह,—ततः किं यदि व्याप्तिमाञ्छब्दः? उच्यते,—यदि नित्यो यदा नित्यः पदचतुष्ट्वादि सर्वमुपपद्यत एव। किं कारणम्? न ह्यसंव्याप्य पुरुषस्य बुद्ध्यस्थमर्थप्रत्ययमादधीत, न चानवस्थितो व्याप्नुयात्। ततश्च किम्? स शब्दः स्वमर्थमभिदधत् स्वक्रि-याप्रवेशोपजनितेनाभिधानेनाख्यातमित्येवमादिना स्वमात्मानम-भिनस्थस्य तिरोभवितुमुपक्रमते, विनाशश्चोपैति। तस्य स्वदेशो-पजनितैराख्यातादिभिः स्वप्रदेशविशेषानुस्मृतिपूर्वकं परिसंख्यान-मुपपद्यत एव। तस्मात्सम्यगेवोक्तम्। यत् पुनरेतदुक्तं न हि विनष्टाविनष्टयोः परिसङ्ख्यानमस्तीति। अत्र ब्रूमः,—पुरुष-प्रयत्नोपजनिताङ्कोद्घातात् परस्यार्थप्रत्ययमाधाय शब्दव्यक्तय एव ध्वंसन्ते, न तु शब्दाकृतयः। तास्तु तयाभिधानशक्त्या बुद्धिद्वारेणावस्थिताः स्वानर्थान् प्रकाशयन्त्यः स्थिता एव भवन्ति। तासु चाख्यातपदपरिसङ्ख्यानं वर्तमानमितरासु विना-शिनीषु व्यक्तिषु लक्षणयोपचर्यते। तस्माद् व्याप्तिमत्त्वाच्छब्दस्य पदचतुष्ट्वादि सर्वमुपपद्यत एव। व्याप्तिमत्त्वादित्यनेनैवेतरेत-रोपदेशः प्रत्युक्तः। शास्त्रकृतो योगश्च। नामाख्यातपदरूप-युक्तित्वे सत्त्वेक्रियाविषये गुणप्रधानभावेनावतिष्ठेते। तयोर्गुण-प्रधानभावे सति तच्छब्दे लक्षणयोपचर्यते। तथाच धातुरूपा

बुद्धिस्तदर्थेया संयुज्यते। बुद्धिरेव हि धात्वादिरूपेण विपरिणममाना शास्त्रेण संस्क्रियते। तस्यां संस्क्रियमाणायां शब्दे संस्कारोपचारः क्रियते। तदभिधायकत्वाच्छब्दस्य। तत्र यदुक्तं वचनानित्यत्वादितरेतरोपदेशः, शास्त्रकृतस्य योगो नोपपद्यत इत्येतदयुक्तमिति। नित्यत्वपक्षेऽपि युगपदुत्पन्नानां गुणप्रधानभावो गोविषाणवन्नास्तीति यदुक्तम्, अनैकान्तिकोऽसौ दृष्टान्तः। दृष्टो हि युगपदुत्पन्नयोः एककाले राजपुत्रामात्यपुत्रयोर्गुणप्रधानभावः। तत्र यदुक्तं युगपदुत्पन्नानामितरेतरोपदेशो न प्राप्नोतीत्येतदयुक्तं, व्याप्तिमत्वाच्छब्दस्य सर्वमुपपद्यत इति, तदेव सम्यगिति॥

अपरो व्याख्यामार्गः।—इन्द्रियनित्यत्वात्पदचतुष्ट्वानुपपत्तिस्तदाश्रयस्य च सर्वस्येत्येवमाक्षिप्ते परिहारपक्षेणेदमवताय्यते। युगपदुत्पन्नानां वा शब्दानामितरेतरोपदेश इति। अत्र समञ्जस एव वाशब्दः। कथम्? अयुगपदुत्पन्नानां वा युगपदुत्पन्नानां वा नित्यानां वा अनित्यानां वेत्यर्थः। इतरेतरोपदेशः, इतरस्येत्याख्यातस्य क्रियावचने शब्देऽभिधानत्वेनोपदेशः, इतरस्य च नामशब्दस्य सत्त्ववचने शब्देऽभिधानत्वेनोपदेशः। शास्त्रकृतो योगश्च। लक्षणशास्त्रेण चैते क्रियासत्त्वे आख्यातनामशब्दाभ्यां युज्येते। तस्मादुपपद्यते पदचतुष्ट्वमिति॥

आह,—आगमनमात्रमेतत्। हेतुरुच्यतां, कथं विनष्टाविनष्टयोः सह परिसङ्ख्यानम्, अवस्थितयोर्वा गुणप्रधानभाव इति? उच्यते,—व्याप्तिमत्त्वात् तु शब्दस्य। हेत्वर्थः समान एव पूर्वेण॥

आह,—यदि व्याप्तिमत्त्वाच्छब्दस्य व्यवहारार्थं पदचतुष्टय मुपादीयते, एवमपि नोपादेयम्। किं कारणम्? अभिनया अपि व्याप्तिमन्त, पाणिविहाराक्षिनिकोचादय, तैरेव कार्य्यसिद्धिरस्त्विति। अपि चैव पदचतुष्टयदोषेन सम्भक्ष्यामहे, न चायमतिमहान् वेदसमुद्र पठितव्यो भविष्यति क्लेशेनेति। उच्यते,—स्यादेतदेव यद्ययमपरो विशेषहेतुर्न स्यात्। कतम?

"अणीयस्त्वाच्च शब्देन सञ्ज्ञाकरण व्यवहारार्थं लोके"। सत्यम्। अभिनया अपि व्याप्तिमन्त, न त्वणीयास, ते महता यत्नेन व्याप्नुवन्ति, न च निःसन्दिग्ध कुर्वन्ति। तत्प्रतीतशब्दार्थं सम्यक्प्रत्ययमेव नेतरस्य शब्दस्त्वपरिमितमर्थमणीयसा यत्नेनोच्चारितो व्याप्नोति। तस्मादणीयस्त्वादिति विशेषहेतूपपत्त्या शब्देनैव सञ्ज्ञाकरण व्यवहारार्थं लोके इत्युपपन्नम्। यत् पुनरेतद्-नमध्ययनदोषेन सम्भक्ष्यामहे, न चायमतिमहान वेदसमुद्रोऽध्येतव्यो भविष्यतीति। अत्र ब्रूम,—अभ्युदयो ह्यत्र वेदानुरूप एव भवति, अभ्युदयार्थं न शास्त्रारम्भे यत्न॥

"तेषाम्मनुष्यवद्देवताभिधानम्"। आह,—एव तावन्मनुष्याणां मनुष्येषु शब्देन सञ्ज्ञा भर्त्तेनावबोधकरणम्। अथ मनुष्याणां वेदेषु हवि सम्प्रदानार्थ प्रार्थनाद्व्यवहार केनेति? उच्यते,—तेषामेव शब्दानामियमेव व्यवस्था देवेष्वपि देवानपि प्रति। कतमा? मनुष्यवद्देवताभिधानमिति। मनुष्येण तुल्य मनुष्यवत्, देवताभिधानमभिहितुरभिधानम्। यथैव हि मनुष्या प्रयोजनेषु नामाख्यातोपसर्गनिपातैर्यथार्थमभिदधाति।

एवमेव देवा अपि। देवेष्वपि शब्दस्याभिधानेनापि शक्तिपरिहीनेत्यभिप्रायः। तेऽपि हि मनुष्यवद्देवा अङ्गादियुक्ताः पौरुषविधिकैरङ्गैः कर्मभिश्च संस्तूयन्त इति हि वक्ष्यति तस्मादुपपद्यते मनुष्यवद्देवनाभिधानमिति॥

आह,—यदि नामाख्यातोपसर्गनिपातानामपरिहीना शक्तिर्देवतात्वभिधातुमथ किमर्थं वेदे मन्त्रः समाम्नातः। इत्युच्यते,—"पुरुषविद्यानित्यत्वात् कर्मसम्पत्तिर्मन्त्रो वेदे"। पुरुषेषु मनुष्येषु विद्यायाः विज्ञानस्यानित्यत्वात् पुरुषविद्यानित्यत्वाद्धेतोः कर्मसम्पत्तिः फलेन सम्पादनं अविगुणकर्मसम्पत्तिः, फलसम्पन्नमेव कर्म भविष्यतीत्येवमर्थं वेदे मन्त्रः समाम्नात इति वाक्यशेषः। इतरथा हि पुरुषेषु विज्ञानस्यानित्यत्वाद्यथार्थं नाभिदधते देवान्नामाख्यातोपसर्गनिपातैरशिक्षितत्वादनन्वदशिक्षितत्वाद्विम्भरणशीलत्वाद्वा देवानामपराध्ये यथावत् प्रयुञ्जानाः नामाख्यातोपसर्गनिपातान्। ततश्च सर्वार्थप्रत्यक्षदृशो देवाः स्वपमन्ययथावदभिधानं न मर्षयन्ति। विगुणमेतदिति विद्याऽनित्यत्वात्तदनादेनेषु कर्मपि। ततश्च देवनाहीनं कर्मफलं सम्पद्यते। न च केवलं फलासम्पत्तिः। किं तर्हि? दुरिष्टहेतुको दोषोऽपि स्यात्। तस्मादेत एव नामाख्यातोपसर्गनिपाताः प्रयोगानुपरिपाटीविनियमार्थं मन्त्रत्वेन वेदे समाम्नाताः। नहि नामाख्यातोपसर्गनिपातान् परित्यज्य मन्त्राः सन्ति। एतदेव चतुर्विधं पदजातं प्रयोगानुपरिपाट्या कयाचिदवस्थितं मन्त्रा इत्युच्यन्ते।

आह,—कथमनित्यत्वं विद्यायाः पुरुषेष्विति? उच्यते,—

इह तु न वाक्यविरचनानुक्रमेण अर्थवस्त्वनुप्रेष्यते, मनुष्य एव मेतद् ब्रूयात्—'त्वं गन्तु देवदत्तमिति'। स तेनैव वाक्यविरचनानुक्रमेण बद्धमपि सन्तमर्थं न शक्नोति प्रतिपादयितुम्। एवमनित्यत्व विद्याया पुरुषेषु। तद्दोष वा मनुष्यान् प्रति, सर्वेषामेव मनुष्याणामनित्यत्वाद्विद्याया। अयमपि हि येन वाक्यानुक्रमेण वक्ति मनुष्य कश्चिदर्थं, न तेनैव श्वा शक्नोति वक्तुम्। तत्र यदुक्त—किमर्थं मन्त्रो वेदे समाम्नात इति। इद न युक्तम्। पुरुषविद्यानित्यत्वात्कर्मफलसम्पत्त्यर्थं मन्त्रो वेदे समाम्नात इति। नह्यविचारितमेव विज्ञायते। अत इदमाह। पञ्चतुष्टयमाश्रित्य पक्षप्रतिपक्षशो विचार्य्य अवधारितम्। विषयाश्चाक्षेपप्रसङ्गेनैवास्य परिक्षिप्ता। देवमनुष्यव्यवहारार्थमेतदिति। तदेतत्सर्वमपि चोदकवशेन प्रसक्तानुप्रसक्तमुक्तम्। भावस्तु प्रश्नो यतस्तत्स्वरूपमधुना वर्णयिष्याम। स न पुनरभयात्मा भाव। कार्य्यात्मा कारणात्मा च। तयोर्य कार्य्यात्मा तमधिकृत्योक्तम्—"क्रियानिर्वर्त्योऽर्थ स भाव, क्रियैव वा भाव'—इति। इदानीं कारणात्मा भावो निरूप्यते। कथ क्रियाद्रव्ययो स्वासम्बो विशार कार्य्यात्मप्रध्वस्तयो पुरुषोपभोगसन्तानोपक्षये कार्य्यात्मभावानीत, येनात्मभावेन सदनमात्राभिसम्बन्धिना प्रत्यवायेऽवतिष्ठते, सोऽत्यन्ताविनाश धर्ममात्र आत्मा भाव इत्युच्यते।

आह,—कथमयमिह प्रसक्त ? शृणु—तद्विकारा एव हि द्रव्यगुणकर्मभावेनावस्थिता सन्तो नामाख्यातोपसर्गनिपातैरभि

धीयन्ते। स्थितिकाले असावपि न प्रहीणसर्वविशेषभवनमात्र-क्रियाभिसम्बन्धी सन् व्यावृत्तसर्वोपपदाभ्यां नामाख्यातशब्दा-भ्यामुच्यते भवतीति भाव इति च शब्दगतत्वादपोढसर्वविशेषा-मप्येतामवस्थामेतौ शब्दावास्कन्दतः। यत एतयोरेव साधारण्या-र्थमयमिह प्रसज्जितः पञ्चचतुष्ट्याधिकरणे।

आह,—प्रधानमेतत् स्यात्। किं कारणम्? तद्धि न दोषत्रयवतिष्ठते प्रलयकाल इत्येके मन्यन्ते। तच्च नैव। किं कारणम्? भावविकार एव हि सोऽयं पदशब्दवाच्यत्वात् प्रधानभाव इति न च्यते। पुरस्तर्हि? तत्राप्ययमेव हेतुः, अनुपक्षीणशक्तित्वात्। एतेनैव ईश्वरपरमाण्वादिभावाः प्रत्युक्ताः। ईश्वरभावः परमाणुमात्र इति सोपपदत्वात्। शून्यं तर्हि? तदपि न। यस्माच्छून्यशब्देऽपि भावशब्दासद्दर्शनम्, न ह्यसत्यर्थे शब्दः प्रयुज्यते। शब्दो हि शब्दस्यार्थेन सम्बन्धः। किञ्चित्तदस्ति यच्छून्यमिति। लोके हि प्रसिद्धं गृहं शून्यं, ग्रामः शून्यः, शून्ये शब्दमहत्त्वे इति। तस्मान्न शून्यशब्देनाभाव एवोच्यते। किं तर्हि? अपेक्षाकृतं शून्यत्वमिति। भावशब्द एवात्रोपपदत्वेन युक्त इति चेत्, न, प्रयोगाप्रसिद्धेः। न हि अभावे भाव इति प्रसिद्धः प्रयोगः। न च प्रयुज्यमानोऽपि भावशब्दो भावशब्द एवोपपदत्वेन प्रधानादिशब्दवत् कञ्चिद्विशेष-प्रत्ययमादधाति। तस्मात् सर्वोपपदहीनस्य भवनैकात्मभावेनेदं जगन्नित्यम्, इतरैस्तु भावविकारैः परमाण्वादिभिर्भावविकारा-त्मभिरनित्यम्। कस्मात्? विकारात्मकत्वादेव। विकारो

.ह्यनित्यः, तमेवं भवनमात्राभिसम्बन्धेन प्रहीणसर्वभावविकारम् एतत्सद्भावविदोऽवधूतवेदान्तरहस्यसम्पदः परावरविदो मेधाविन आत्मवेदविदो न कृत्स्नकारितया युक्ताधिकारबन्धना एतत्परिज्ञानादेवोपक्षीणकर्मोपभोगसन्तानाः सन्त आत्मकामाः प्रतिपद्यन्ते। नेतरे प्रधानादिविदः। वेदानुशासनैकदेशानीश्वरपुरुषप्रधानादीननित्यान् भावविकारान् स्वमतिकल्पनाहेतुव्यवहितान् मत्वा स्थिरीकृत्यानेन प्रतिपद्यन्ते भवनमात्राभिसम्बन्धेन तद्वैतस्मादात्मन उद्विजन्त आत्मप्रकाशकान्तर्याम्ययं चित्सन्तानमिव मन्यमानाः। केचिच्च शक्तिहानादसम्बाधनादेव। स एष इह वेदाङ्गैर्वेदार्थनिर्वचनाभिनिवेशशब्दानां सामान्यविशेषवृत्त्युपदेशप्रसङ्गे प्रवर्त्तमाने भवतेः कृदन्तीभूतस्य भवनमात्रमेव धर्तुं सामर्थ्यम्, नेतरान् भावविकारान् विद्यमानानपीति। एतेन प्रसङ्गेनात्र संसूचितो वेदरहस्यो ब्राह्मणैः ॥ २ ॥

तत्र विस्तरेणायं विधीयते,—

षड् भावविकारा भवन्तीति वार्ष्यायणिर्जायतेऽस्ति विपरिणमते वर्द्धतेऽपक्षीयते विनश्यतीति जायत इति पूर्वभावस्यादिमाचष्टे नापरभावमाचष्टे न प्रतिषेधत्यस्तीत्युत्पन्नस्य सत्त्वस्यावधारणं विपरिणमत इत्यप्रच्यवमानस्य तत्त्वाद्विकारं वर्द्धत इति स्वाङ्गाभ्युच्चयं सांयौगिकानां वार्थानां वर्द्धते विजयेनेति वा वर्द्धते शरीरेणेति वाऽपक्षीयत

इत्येतेनैव व्याख्यातः प्रतिलोमं विनश्यतीत्यपरभावस्या-
दिमाचष्टे न पूर्वभावमाचष्टे न प्रतिषेधति ॥३॥

"षड् भावविकारा भवन्तीति"। अपि च लक्षणविदो विगृह्णन्ति भावशब्दं भवते, स्वपदार्थे भवनं भाव इति। "सन्मात्रं भावलिङ्गं स्यात्"—इति पठन्ति। तस्य विकारा भावविकाराः, भवन्तीति सामान्यादात्मनः प्रस्कन्दा इव सन्तत्त्वेन वैशेषिकेण भावविकारान्मलाभाय भवन्ति। इतिपरः प्रयुज्यमानः शब्द-पदार्थकः ॥

कः एवमाह "षड् भावविकारा"—इति? उच्यते,— "वार्ष्यायणि"—इति। विकारादिपाठात् भिन्न्। आचार्य्य इति यास्कदोषः॥ निर्देशात उपलम्भाना षडित्यवधारणं सुखार्थम्। अतोऽन्ये भावविकारा एतेषामेव भावविकारा भवन्तीति ॥

आह,—कतमन्तदिति? उच्यते,—"जायतेऽस्ति विपरिणमते वर्द्धतेऽपक्षीयते विनश्यतीति" ॥

आह,—एनेषां जन्मादीनां भावविकारशब्दानां कः कस्या विकारावस्थायामवस्थित भावमाचष्टे, कः वा विद्यमानमपि नाचष्टे, कः वा न प्रतिषेधतीति? उच्यते,—"जायत इति पूर्व-भावस्यादिमाचष्टे, नापरभावमाचष्टे, न प्रतिषेधति"। जनि पूर्वो भावः, तस्य पूर्वभावस्य षण्णां भावविकाराणां यदि आद्यो यः पूर्वो भावविकारः, तस्य जायत इत्यनेन शब्देनादिमाचष्टे ॥

आह—किमादिमेव? नेत्युच्यते। उक्तमुपजन्मप्रभृत्यप

वर्षपर्यन्तमिति। स एव पूर्वापरीभूतो भावस्तावदेव जायत इत्युच्यते। यावन्निष्ठाशब्दवाच्य सवृत्तो जात इति। नापर-भावमाचष्टे, न प्रतिषेधति। नेति प्रतिषेधे, न परो भाव अपरभाव ॥

आह,—कस्मादपर ? पौर्वापर्यं हि देशकालकृतम् उच्यते,—जनिशब्दवाच्यो भावविकार पूर्व, तस्मादपरकालोऽस्तिशब्दवाच्य । तत्रैव सति जनिशब्दवाच्ये भावविकारे अस्तेरप्यर्थोऽस्ति विद्यमानता। किं कारणम् ? न ह्यविद्यमानो जायते। अपि च कारणात्मनि भावे सर्व एते भावविकारा सन्ति। सर्वार्थप्रसवशक्तित्वात्तस्य। यथा पृथिव्या घटादयो भावविकारा। ते तु कारकाभिमानेन विशेषात्मलाभं प्राप्नुवन्ति। तद्यथा। जनिद्वारेणास्ति। अस्तिद्वारेण विपरिणमति। किं कारणम् ? न ह्यजातोऽस्तीत्युच्यते। नाप्यविद्यमानो विपरिणमत इति। तत्रैव सति जायत इत्येष शब्दो जन्मैव वेदयते गृहीत्य विद्यमानेतरभावविशेषम्। किं कारणम् ? एकार्थवृत्तित्वाच्छब्दस्य। अस्तिशब्दवाच्यस्य भावविकारस्यासम्पूर्णत्वात्। अनवधृतरूप हि तस्यामवस्थायां तद्भवत्यनुमानगम्य किमपि जायत इति। तस्माज्जायत इत्येष शब्दो जायमानावस्थायामस्तित्व विद्यमानमपि नाचष्टे ॥

आह—यदि नाचष्टेऽर्थादापन्न भवति प्रतिषेधतीति। उच्यते—"न प्रतिषेधति"—इति। अस्तित्वस्य न प्रतिषेधकपरतात्पर्यं। किं कारणम् ? उच्यते,—अनित्यात्मकत्वादपि

ह्रसो जायेतैतस्मिन् प्रतिषिद्धेऽनात्मक एव स्यात्। कमालस्य जायते? तस्मान्न प्रतिषेधत्यस्तित्वम्। उपस्थितत्वाच्च। उपस्थित एव च प्रत्यासन्नस्तस्यावधारणकाल इत्यलञ्च न प्रतिषेधति॥

एवमेव प्रपञ्च उत्तरेष्वपि भावविकारेषु। समासतस्तु यत्र यद्वक्तव्यं तत्र तद् ब्रूम॥

"अस्तीत्युत्पन्नस्य सत्त्वस्यावधारणम्"। अस्तीति जातस्य सत्त्वस्यावधारणमात्रं ब्रवीति, न विपरिणाममाचष्टे अपूर्णत्वात्, न प्रतिषेधत्युपस्थितत्वात्॥

"विपरिणमत इत्यप्रच्यवमानस्य तत्त्वाद्विकारम्"। विपरिणमत इत्येष शब्दो प्रच्यवमानस्य तत्त्वादप्रच्यवमानस्य तत्त्वात्सद्भावाद्विकारम्। योऽस्य भावोऽस्तित्वं पुरुषत्वं वा, तस्माद्विकारं विक्रियामात्रं ब्रवीति, वृद्धेरर्थमानष्टे, न प्रतिषेधति॥

"वर्द्धत इति स्वाङ्गाभ्युच्चयम्, सांयौगिकानां वार्थानाम्"। वर्द्धत इत्येष शब्द, स्वेषामङ्गानां शिरोग्रीवाबाहूदरादीनां, सांयौगिकानां वा हिरण्यधान्यादीनाम्, अभ्युच्चयमाह, अभ्युच्चितत्वं ब्रवीति॥

आह,—कथ प्रयोगः? उच्यते,—"वर्द्धते विजयेनेति वा वर्द्धते शरीरेणेति वा"। वर्द्धते विजयेनेति सांयोगिकेषु उदाहरणम्। वर्द्धते शरीरेणेति स्वाङ्गाभ्युच्चये। अत्र वर्द्धत इति प्रवृत्तपर्यायनिमानष्टे, न प्रतिषेधति॥

"अपक्षीयत इत्येतेनैव व्याख्यातः प्रतिलोमम्"। यथैव हि

स्याद्गैः सांयोगिकैर्वा द्रव्यैरुपचीयते, तथैवापक्षीयते। तत्रापि नाचष्टे न प्रतिषेधति॥

"विनश्यतीत्यपरभावस्यादिमाचष्टे, न पूर्वभावमाचष्टे, न प्रतिषेधति"। विनाश एवापरभावस्तस्यादिमाचष्टे। किमादिमेव? न इत्युच्यते। उपक्रमप्रभृत्यपवर्गपर्यन्तमित्युक्तं, यावद्विनष्ट इति। स च विनाश ब्रुवन् अपूर्वभावमाचष्टेऽपक्षीयतेरर्थं विज्ञातमपि तस्मिन् विनाशे कथं युगपदपक्षीयतेरर्थो विनाशेऽस्तीति? उच्यते,—न ह्यनपक्षीयमाणो विनश्येत्॥ ३॥

अतोऽन्ये भावविकारा एतेषामेव विकारा भवन्तीति ह स्माह ते यथा वचनमभ्यूहितव्या न निर्बद्धा उपसर्गा अर्थान्निराहुरिति शाकटायनो नामाख्यातयोस्तु कर्मोपसंयोगद्योतका भवन्त्युच्चावचाः पदार्था भवन्तीति गार्ग्यस्तद्य एषु पदार्थः प्राहुरिमे तन्नामाख्यातयोरर्थविकरणम्॥ ४॥

आह,—एतेभ्यो भावविकारेभ्यः किमन्येऽपि व्यतिरिक्ताः सन्ति भावविकारा न वा? इत्युच्यते,—"अतोऽन्ये भावविकारा एतेषामेव विकारा भवन्तीति ह स्माह"। अतो भावविकारषट्कादेऽन्यत्वेन भावविकाराः लक्ष्यन्ते, ते पृथक् पृथगत्यन्तभिन्नाः सन्ति। किन्तर्हि? एतेषामेव विकारा भवन्ति। तद्यथा—जनिशब्दवाच्यो भावविकारोऽनेकप्रभेदभिन्नोऽनेकपर्यायशब्द-

यत्नो निष्पद्यतेऽभिव्यज्यते उत्तिष्ठतीत्येवमाद्युपेक्षितव्यम्। तथा अस्तिशब्दवाच्योऽनेकप्रभेदभिन्नोऽनेकपर्य्यायवचनश्च,अस्ति,विद्यते, भवतीत्येवमादि। तथा विपरिणमति शब्दवाच्यो विपरिणमते, जीर्य्यति, भावान्तरमापद्यते इत्येवमादि। तथा वर्द्धतिशब्दवाच्यो वर्द्धते, पुष्यति, उपचीयते, अर्थायत इत्येवमादि। तथा अपक्षीयति शब्दवाच्यो ध्वस्यति, भ्रश्यतीत्येवमादि। तथा विनश्यतिशब्दवाच्यो विनश्यति, म्रियते, विलीयत इत्येवमादि। "इति ह स्माह"। एवमाहाचार्यो वार्ष्यायणिरित्यनुवर्त्तते॥

"ते यथावचनमभ्यूहितव्याः"। त एते जन्यादिशब्दवाच्याः विकाराः, यथावचनं यो यस्मिन्वचने यथावचनमवस्थिताः सन्तः प्रकरणोपपत्तिभ्यां मन्त्रार्थावधारणं प्रति अभ्यूहितव्याः चितवर्याः प्रयुज्यमाना इति वाक्यशेषः। सर्व एव धातवो भाववचनास्तेषामिहाध्ययनं प्राप्ते शास्त्रातिगौरवभयादेतल्लक्षणमुत्सृष्टम्। इह शास्त्रे व्याख्याशैलीयं द्रष्टव्या,—उद्देशो, निर्देशः, प्रतिनिर्देश, इति। तत्रोद्देशः, सूत्रस्थानीयः। तद्यथा,—षड्भावविकारा इति। निर्देशो वृत्तिस्थानीयः। तद्यथा,—जायतेऽस्ति विपरिणमत इति। प्रतिनिर्देशो वार्त्तिकस्थानीयः। तद्यथा,—जायत इति पूर्वभावस्यादिमाचष्टे इति। एवं सर्वत्र यथासम्भवं योज्यम्॥

सानुषङ्गमुक्तं नामाख्यातयोर्लक्षणं, नाद्यन्तु किञ्चिदवशिष्यते, तदवसरप्राप्तमपि तदधुना नोच्यते, पदचतुष्टयलक्षणप्रतिज्ञाव्याघातभयात् उभया पदचतुष्टयलक्षणं चतुर्थेन पादेन तद्वक्ष्यामः॥

प्रतिनप्रसक्तमेवाधुनोपसर्गलक्षणमुच्यते॥

यो यत्र समर्थो भवति, स तत्रान्यमपेक्षते। नामाख्याते चार्थ विशेष प्रत्युपसर्गसंयोगमपेक्षते। तस्मादुपपन्नमुपसर्गस्य क्रिया विशेषोऽर्थ। क्रियासामान्यमात्रमाख्यातस्येति॥

तत्र यदुक्तम् 'अनर्थका पृथगवस्थिता उपसर्गा' –इति, तदयुक्तम्। कुत ? "तद्य एषु पदार्थ प्राहुरिमे तम्'। तदे तदुपपन्न भवति। य एषूपसर्गेषु स्वोऽनेकप्रकारोऽर्थ इति प्राहुरेव, तमिमे उपसर्गा पदविशेषा पृथगपि सन्त॥

क पुनरसाविति ? उच्यते,—"नामाख्यातयोरर्थविकरणम्'। अर्थविक्रियामित्यर्थ। तस्मादर्थवन्त एवेति॥४॥

आ इत्यर्वागर्थे प्रपरेत्येतस्य प्रातिलोम्यमभीत्याभिमुख्य प्रतीत्येतस्य प्रातिलोम्यमति सु इत्यभिपूजितार्थे निर्दुरित्येतयोः प्रातिलोम्य न्यवेति विनिग्रहार्थीयौ उदित्येतयोः प्रातिलोम्य समित्येकीभाव व्यपेत्येतस्य प्रातिलोम्यमन्विति सादृश्यापरभावमपीति संसर्गमुपेत्युपजन परीति सर्वतोभावमधीत्युपरिभावमैश्वर्यं वैवमुच्चावचानर्थान् प्राहुस्त उपेक्षितव्याः॥ ५॥

प्रथमाध्यायस्य प्रथमः पादः॥ १, १॥

उच्यतां तर्हि क एषा कस्मिन्नर्थविशेषे वर्तते ? उच्यते,— अथ तावत्—"आ इत्यर्वागर्थे"। तद्यथा,—आ पर्वतादिति।

अर्वागिति गम्यते। अनेकार्थत्वेऽपि सत्युपसर्गाणामेकैकोऽर्थ उदाहरणन्येनोच्यतेऽर्थवत्त्वप्रकाशनार्थम् ॥

"प्रपरेत्येतस्य प्रातिलोम्यम्"। प्रपरा इत्येतावुपसर्गावेतस्यै-वाङोऽर्थस्य प्रातिलोम्यमाहतुः। प्रगतः परागतः ॥

"अभीत्याभिमुख्यम्"। आह। अभिगतः ॥

"प्रतीति" "एतस्य" एव अभेः "प्रातिलोम्यम्" आह। प्रति-गत इति ॥

"अतिसु-इत्येतावभिपूजितार्थे" वर्तेते। अतिधनः सुब्राह्मण इति ॥

"निर्दु रित्येतयोः प्रातिलोम्यम्"। निर्धनो दुर्ब्राह्मण इति ॥

"न्यवेति विनिग्रहार्थीयौ"। निगृह्णाति। अवगृह्णातीति ॥

"उदिति" अयमेक एव "एतयोः" द्वयोः "प्रातिलोम्यम्" आह। उद्गृह्णातीति ॥

"समित्येकीभावम्" अर्थमाह। संगृह्णातीति ॥

"व्यपेत्येतस्य प्रातिलोम्यम्" आहतुः। विगृह्णातिर्विग्रहार्थीयः विगृह्णाति, अपगृह्णातीति ॥

"अन्विति सादृश्यापरभावम्" आह। अनुरूपमस्येदमिति सादृश्यम्। अनुगच्छतीत्यपरभावः ॥

"अपीति संसर्गम्" आह। सर्पिषोऽपि स्यात्। मधुनोऽपि स्यात् ॥

"उपेत्युपजनम्"। उपजायते ॥

"पर्यति सर्वतोभावम्" आह। परिधावतीति ॥

तावत्,—"इवेति भाषायां च" उपमार्थीयः । "अन्वध्यायञ्च" । छन्दसि चेत्यर्थः । कश्चित् छन्दस्येव भवति, न भाषायाम्, कश्चिद्भाषायामेव, न छन्दसि, कश्चिदुभयत्र, इत्यतो विभागेन प्रदर्श्यते ॥

आह,—किमुदाहरणमिवेत्यस्योपमार्थीयस्य ? का चोपमा-शब्दस्य व्युत्पत्तिरिति ? उच्यते,—उपगम्यातथागुणैर्मीयत इत्युपमा । "अग्निरिवेन्द्र इवेति"—इत्येतदत्रोदाहरणम् । तपसः पुत्रो मन्युर्नाम, तस्येयमार्षम् ॥

आह,—ननु सर्व एवायमृग्यजुःसामाथर्वात्मको ब्रह्मराशिरा-दित्यान्तःपुरुषस्य भगवतो हिरण्यगर्भप्राणस्यार्षमैतरेयके रहस्य-ब्राह्मणे "शतर्चिनो मध्यमा"—इत्येवमाद्यनुपरिक्रम्य पुनः पर्यावृत्य "एतमेव सन्तं शतर्चिन इत्याचक्षत एतमेव सन्तं गृत्समद इत्या-चक्षते"—इत्येवमादिना क्रमेण मन्त्रदृक्शब्दान् प्राणे निगमयति । अथापीदृशः,—शौनकेन सन्दृष्टा, यस्यामार्षाणि विद्यन्ते । सा च स्मृतिः । श्रुतिस्मृत्योर्विरोधे श्रुतिरेव गरीयसी'—इति न्यायविदः । खल्वपि पठन्ति—"विरोधे त्वनपेक्षं स्यात् (जै० सू० १, ३, ३)"—इति । तस्माद्विशेषाभिधानमनर्थकमेवेति ? उच्यते,—न ह्येवमस्मादान्मन परिशयमाश्रयः सन् शौनकः कुर्यात, पश्यतो ह्युभावपि । तेन क्षेत्रज्ञानुभावपिमन्त्राभिव्यक्तौ व्यापृतौ । बुद्धिदेवतात्वेन हिरण्यगर्भः क्षेत्रज्ञोऽवस्थितः, सर्वभूतानां कर्मविपाकानुरूप्येण । यमर्थं शब्दं वा दर्शयति । तदिनरोचिविशिष्टकर्मकारी क्षेत्रज्ञो बुद्धिस्थः पश्यति । तथैवं सति वसिष्ठादिर्मन्त्रदृक् क्षेत्रज्ञः । तेनैवोपदर्शितं मन्त्रं

पश्यतीत्युभयमुपपद्यते। एवं सत्युभावपि याथात्म्यतस्तावदनुसन्धेयौ मन्त्रप्रयोगकाले उभयोरर्थवत्त्वाय॥ यत् पुनरेतदुक्तं भवति, श्रुतिस्मृत्योर्विरोधे श्रुतिरनपेक्ष्येति। न हि विरोधोऽस्त्युभयोरपि सन्धीयमानयोः। अपि च श्रुतिपूर्वकमेवेदं स्मरणं न स्वतन्त्रम्। ताण्डके हि रहस्यब्राह्मणं दर्शयति,—"यत् साक्षात्तोष्यत् स्यात्, तत्सामोपधावेत्। यस्यामृचि तामृचम्। यदार्षं तमृषिम्"—इति। तत्र यदुक्तं स्मृतिरियमिति, तदयुक्तम्। तस्माद्वक्तव्यमेव विशिष्यार्थमिति॥

त्रिष्टुबेषा, मान्यवी, श्येनादिषु निष्केवल्ये शस्यते। "अग्निरिव मन्यो त्विषितः सहस्व सेनानीर्नः सहुरे हूत एधि। हत्वाय शत्रून् भजस्व वेद ओजो मिमानो वि मृधो नुदस्व॥" (ऋ० सं० ८, ३, १६, २)। मन्युः पुनरिन्द्र एव, "मन्यु रिन्द्रो मन्यु रेवास देवो देवो मन्युर्होता वरुणो जातवेदाः (ऋ० सं० ८, ३, १८, २)। माहाभाग्यात् कर्मपृथक्त्वाच्च। अथवा देवतान्तरम्, पृथगभिधानश्रुत्यभिधानसम्बन्धात्॥

आह,—ननु मान्यवो मन्त्रो माहेन्द्रग्रहयजिसन्निधौ निष्केवल्ये शस्यमानो महेन्द्रमभिहितसंस्कारेणासमर्थ एव वक्तुम्। अथ किमर्थमयं निष्केवल्ये शस्यते इति? उच्यते,—अन्यदेव हि श्रुत्यभिव्यङ्ग्यमपूर्वमारादुपकाराङ्गभूतं माहेन्द्रग्रहयजिव्यङ्ग्यस्यापूर्वस्य। अपि वा श्रुतिसंयोगात् प्रकरणे स्तौतिशंसती क्रियोत्पत्तिं विदध्यातामिति न्यायविदो याज्ञिका वदन्ति। वक्ष्यति चायमपि,—"इतीमा देवता अनुक्रान्ताः सूक्तभाजो हविर्भाज

ऋग्भाजश्च भूयिष्ठा (७, ३, ६)"—इति। स एष मन्युस्तुतिभाक् एव। यथा—"अभि त्वा शूर (ऋ० स० ५, ३, २१, २)"—इति इन्द्र एव तस्मिन्निष्केवल्ये, यथा "आपो हि ष्ठा (ऋ० स० ७, ६, ५, १)"—इत्याप आग्निमारुते सूर्यादय आश्विने एवम्॥

हे 'मन्यो'! 'सहुरे' सहनशील! एतस्मिन् शत्रूणामभिभवनकाले प्रत्युपस्थिते 'हुत' आहूत सन् अस्माभि, 'सेनानी' सेनाप्रणेता 'न' अस्माकम् 'एधि' भव। ततश्च 'अग्निरिव' 'त्विषित' दीप्तस्त्व तेजसा 'सहस्व' अभिभव तानस्मच्छत्रून्। 'हत्वाय' हत्वैव यदेतेषामस्मच्छत्रूणा 'वेद' धन तत त्वमादाय तेषामस्मद्योधानाम् 'ओज' बल 'मिमान' निर्माय यथावस्तु यथार्हं 'विभजस्व'। येऽपि च केचिद्धतावशिष्टा 'मृध' मृधकारिण अस्मद्विष अस्मत्त प्रत्याजिहीर्षन्त्येतद्धनम् तेषामोजो मिमान तूलयित्वा वियद्धशिष्टबला ह्येते न शक्ता प्रत्याहर्त्तुमित्येव मिमानस्तावन्मात्रशेषबलान् हत्वा त्व 'विनुदस्व' एनान् दूर प्रक्षिप अपुनरागमनाय॥

द्वितीयमुदाहरणमेतस्यैव,—"इहैवैधि माप च्योष्ठा पर्वत इवाविचाचलि। इन्द्र इवेह ध्रुवस्तिष्ठेह राष्ट्र मु धारय॥" (ऋ० स० ८, ८, ३१, २)। अनया नानुष्टुभा ध्रुव आङ्गिरसो राजानमभिषिषेच। 'इहैव' राष्ट्रे त्वम् 'एधि' भव। 'मा' चातस्त्वम् 'अप च्योष्ठा'। 'पर्वत इव' 'अविचाचलि' अविचलनशील। 'इन्द्र इव' च 'इह' 'ध्रुव' शाश्वत 'तिष्ठ'। स्थित्वा च इद 'राष्ट्रम्' 'इह' 'उ' एव विभूतियोगेन स्थिरत 'धारय'—इत्याशी॥

भाषाया प्रसिद्धमेवेति कृत्वा नोदाहरण पठितम्। अथवा एते एव। 'अग्निरिवतीक्ष्ण' 'इन्द्र इव विक्रान्त'॥

"नेति प्रतिषेधार्थीयो भाषायाम्"। प्रसिद्ध। "उभयमन्वध्यायम्"। "नेन्द्र देवममसतेति (ऋ० सं० ८, ३, २६, १)"। नेन्द्र देवमात्मनो दीपयितारममन्यन्ताऽऽदित्यरश्मय॥

आह—किं पुनर्लक्षणमिति? उच्यते,—'प्रतिषेधार्थीय पुरस्तादुपचारस्तस्य यत् प्रतिषेध ति"।

"दुर्मदासो न सुरायामित्युपमार्थीय उपरिष्टादुपचारस्तस्य येनोपमिमीते"—इति। येनार्थेनोपमेयमर्थमुपमिमीते। तद्यथा,—"दुर्मदासो न सुरायामिति'। हृत्सु, पीतासो युध्यन्ते दुर्मदासो न सुरायाम्। ऊधर्न नग्ना जरन्ते॥" (ऋ० सं० ५, ७, १६, १)। काण्वो मेधातिथिराङ्गिरसश्च प्रियमेध ऐन्द्र सूक्त ददृशाते। तत्रैषा गायत्री। येषामपि विनियोग क्वचिदन्यत्र नास्ति, तेऽपि याच स्तोमे विनियुज्यन्ते। हृत्सु' 'पीतास' पीता सन्तो हृदये व्यवस्थिता सोमा 'युध्यन्ते' सम्प्रहारमिव कुर्वन्ति। अह विशिष्ट इत्येव स्पर्द्धमाना। क इव? 'दुर्मदासो न दुर्मदास "आज्जसेरसुक् (पा० ७, १, ५०)" यथा कुत्सितमदा केचित् पुरुषा सुराया पाताया सत्या युध्येरन्, एवम्। किञ्च तमेव यजमान 'जरन्ते' स्तुवन्तीव आत्मलाभपरितुष्ट। कथ जरन्ते? 'ऊधर्न ऊधरिव रात्रिमिव'नग्ना'भूत्वा स्त्रिय सम्प्रयोगार्थमह इत्येवमभिप्राया इव। "नग्ना' स्तोतार। ते च 'ऊधर्न पयसा पूर्णं गवादे रूध इव सोमपूर्णं त्वा 'जरन्ते' स्तुवन्ति।" इति सायण॥ केचिद्विशिष्ट पुरुषा॥१॥

चिदित्येषोऽनेककर्माऽऽचार्यश्चिदिदं ब्रूयादिति पूजायामाचार्य्य आचारं, ग्राहयत्याचिनोत्यर्थानाचिनोति बुद्धिमिति वा दधिचिदित्युपमार्थे कुल्माषांश्चिदाहरेत्यवकुत्सिते कुल्माषाः कुलेषु सीदन्ति नु इत्येषोऽनेककर्मेदन्नु करिष्यतीति हेत्वपदेशे कथन्नु करिष्यतीत्यनुपृष्टे नन्वेतदकार्षीदिति चाथाप्युपमार्थे भवति ॥ २ ॥

चिदित्येषोऽनेकार्थोऽपि सन्नुपमार्थीयसयोगादत्रोदाहृत ॥

कथमयमनेकार्थ इति? उच्यते —"आचार्यश्चिदिदं ब्रूयादिति पूजायाम्"। आचार्य्य एव ब्रूयात्, कोऽन्य एव वक्ष्यतीति। "दधिचिदित्युपमार्थे" दधिरूप ओदन इति। "कुल्माषांश्चिदाहरेत्यवकुत्सिते"। भृश कुत्सिते। कुल्माषानपि तावदाहरेति किं चान्यदाहरिष्यसि। "नु इत्येषोऽनेककर्मा"। कथम्? "इदन्नु करिष्यतीति"। कथं हि नियाया हेतुर्निमित्तमित्यर्थ। कथ नु करिष्यतीति पृष्ट्वा करिष्यतीत्युक्ते यत् पुनरनुपृच्छति कथ नु करिष्यति? तदनुज्ञानमेतस्मिन्ननुपृष्टे। "नन्वेतदकार्षीदिति च"। अनुपृष्ट एवाय भवतीति ॥

नन्वयमकार्षीदेतत्, कथमय ब्रवीति कथ करिष्यतीति? "अथाप्युपमार्थे भवति" तद्यथा—॥ २ ॥

वृक्षस्य नु ते पुरुहूत वयाः वृक्षस्येव ते पुरुहूतशाखा वयाः शाखा वेर्वातायना भवन्ति शाखाः खशयाः

लक्षणे युज्यावहै 'आ सनिभ्यः' आप्राप्तेः। 'अरातीवा'—इत्येकं पदम् अर्थवमावां संयुक्तौ दृष्ट्वा हे 'अद्रिवः'। 'अरातीवा चित्' अदानशीलोऽपि दानशीलतामुपेत्यानुमंस्यत एवावयोर्दानम्। 'भद्रा' मन्दनीया 'इन्द्रस्य' 'रातयः' दानानीत्येवं मन्यमानः। को हि नाम त्वत्संयुक्तानामस्माकं न दद्यादित्यभिप्रायः॥

अथाप्याकारः "एतस्मिन्नेवार्थे" समुच्चयार्थे। "देवेभ्यश्च पितृभ्य आ"—इति। अयमस्मिन्मन्त्रे आकारः। "यो अग्निः कव्यवाहनः पितॄन् यक्षदृतावृधः। प्रेदु हव्यानि देवेभ्यश्च पितृभ्य आ॥" (ऋ० सं० ७, ६, २२, १)। अनुष्टुप्, आर्षी, पितृयज्ञे विनियुक्ता। 'योऽग्निः' कव्यस्य वोढा, यस्यायमधिकारः, कव्यानि वोढव्यानीति, स इहास्माकं पितृयज्ञे होतृत्वेन स्थितः 'पितॄन्' 'यक्षत्' पूजयत्वित्यर्थः। किंलक्षणान् 'ऋतावृधः' सत्यवृधो वा यज्ञवृधो वा। किञ्च। 'प्रेदु हव्यानि' वोचति, वोचतु च। प्रब्रवीत्वेतानि हवींष्यस्मत्प्रदत्तानि। कस्मै? 'देवेभ्यश्च पितृभ्यश्च'—इति॥

"वेति" अयं "विचारणार्थे"। समुच्चयार्थीयप्रसङ्गेनोदाह्रियते। "हन्ताहं पृथिवी मिमां निदधानीह वेह वा। कुवित्सोमस्यापामिति॥" (ऋ० सं० ८, ६, २७, ३)। ऐन्द्रो लवस्त स्यैयमार्षं, गायत्री। 'हन्त' इदानीमेव 'अहम्' 'इमां पृथिवीम्' 'इह वा' अन्तरिक्षलोके, 'इह वा' द्युलोके। अथवा 'इह' दक्षिणे स्कन्धे, 'इह वा' सव्ये 'निदधानि' अवस्थापयामि। अतः स्थानादुद्धृत्य। अथ किमर्थं ब्रूते? 'कुवित्सोमस्य' बह्वहं

अथानन्तरं प्रतिज्ञाप्रसक्तानेव कर्मोपसंग्रहार्थान् वक्ष्यामः ॥

"अथ यस्यागमादर्थपृथक्त्वमह विज्ञायते, न त्वौद्देशिकमिव विग्रहेण पृथक्त्वात्स कर्मोपसंग्रह"। यस्यागमादध्याहारादश्रूयमाणस्यैव निपातस्य सरूपविरूपैकशेषादर्थतो वा 'पृथक्त्वमह' पृथग्भाव एव 'विज्ञायते'। तद्यथा,—देवदत्तयज्ञदत्तौ, देवदत्तश्च यज्ञदत्तश्चेति ॥

आह,—द्वावप्यत्र देवदत्तयज्ञदत्तौ श्रूयेते, न तु तयोरौद्देशिकमिव पृथक्त्वमिति। यथा गा, अश्वान्, पुरुषान्, पशूनिति प्रत्येकमुद्दिश्यमानानाम्। इह तु विग्रहेण च शब्दागमादेतत् पृथक्त्वमुपजायते। नानाग्रहण द्वयोर्बहूनामर्थाना विग्रह स एव पृथक्त्वाद्धेतो पृथक्त्वेन निमित्तेनोपलक्ष्यमाण, यस्माद् द्वावर्थौ बहून् वा गृहीत्वैकस्मिन् कर्मणि उपसमावेशयति। तद्यथा,—'देवदत्तयज्ञदत्तौ पचेते'—इत्येवम्। तस्मात 'कर्मोपसंग्रह'—इत्येतन्नामैव तद्भवति। अथवा बृहस्पतिश्चेत्युक्तेप्रजापतिरनुक्तोऽपि द्विर्नायो गम्यते प्रजापतिश्चेति ॥

कतम पुनरसाविति? उच्यते,—"चेति" यदाचिदयमेव 'समुच्चयार्थे' 'उभाभ्याम्' अप्यर्थाभ्या विगृहीताभ्यामेव सयुक्त 'प्रयुज्यते'। तथाच,—"अहं च त्वं च वृत्रहन्त्सं युज्याव सनिभ्य आ। अरातीवा चिदद्रिवोऽनु नौ शूर मंसते भद्रा इन्द्रस्य रातयः ॥" (ऋ० म० ८, ४, ४१, ७)। योगपुत्र प्रगाथोऽनया तेन्द्रया पट्टया इन्द्रस्य सख्यार्थी सम्प्रार्थयते। हे 'वृत्रहन्' इन्द्र! 'अहं च' प्रगाथ 'त्वं च' 'संयुज्याव'। एवस्मिन्नर्थे सति प्राति-

लक्षणे युज्यावहै 'आ सनिभ्यः' आप्राप्तेः। 'अरातीवा'—इत्येकं पदम् अर्थैवमावां संयुक्तौ दृष्ट्वा हे 'अद्रिवः'। 'अरातीवा चित्' अदानशीलोऽपि दानशीलतामुपेत्यानुमंस्यत एवावयोर्दानम्। 'भद्रा' भन्दनीया 'इन्द्रस्य' 'रातयः' दानानीत्येवं मन्यमानः। को हि नाम त्वत्संयुक्तानामस्माकं न दद्यादित्यभिप्रायः॥

अथाप्याकारः "एतस्मिन्नेवार्थे" समुच्चयार्थे। "देवेभ्यश्च पितृभ्य आ"—इति। अयमस्मिन्नर्थे आकारः। "यो अग्निः कव्यवाहनः पितॄन् यक्षदृतावृधः। प्रेदु हव्यानि देवेभ्यश्च पितृभ्य आ॥" (ऋ० सं० ७, ६, २२, १)। अनुष्टुप्, आर्षी, पितृयज्ञे विनियुक्ता। 'योऽग्निः' कव्यस्य वोढा, यस्यायमधिकारः, कव्यानि वोढव्यानीति, स इहास्माकं पितृयज्ञे होतृत्वेन स्थितः 'पितॄन्' 'यक्षत्' पूजयत्वित्यर्थः। किंलक्षणान् 'ऋतावृध' सत्यवृधो वा यज्ञवृधो वा। किञ्च। 'प्रेदु हव्यानि' वोचति, वोचतु च। प्रब्रवीत्वेतानि हवींष्यस्मत्प्रदत्तानि। कस्मै? 'देवेभ्यश्च पितृभ्यश्च'—इति॥

"वेति" अयं "विचारणार्थे"। समुच्चयार्थोऽप्यसङ्गेनोदाहियते। "हन्ताहं पृथिवीमिमां निदधानीह वेह वा। कुवित्सोमस्यापामिति॥" (ऋ० सं० ८,६,२७,२)। ऐन्द्री लबस्यैवमार्षं, गायत्री। 'हन्त' इदानीमेव 'अहम्' 'इमां पृथिवीम्' 'इह वा' अन्तरिक्षलोके, 'इह वा' द्युलोके। अथवा 'इह' दक्षिणे स्कन्धे, 'इह वा' सव्ये 'निदधानि' अवस्थापयामि। अतः स्थानादुद्धृत्य। अथ किमर्थं ग्रूते? 'कुवित्सोमस्य' बहुं

सोमम् 'अपाम्' पीतवानिति। अस्य मे सोमपानस्यानुरूपमेव वीर्य्यमस्तीत्यभिप्रायः॥

"अथापि" "वेति" अयं "समुच्चयार्थे भवति"। "वायुर्वा त्वा मनुर्वा त्वेति"। "वायुर्वा त्वा मनुर्वा त्वा गन्धर्वाः सप्तविंशतिः। ते अग्ने अश्वमयुञ्जंस्ते अस्मिञ्जवमादधुः (य० सं० ६, ७)"। अनुष्टुबेषा। वाजपेयेऽश्वयोजने विनियुक्ता। हे अश्व! वायुश्च त्वा मनुश्च त्वा, गन्धर्वा एते सप्तविंशतिर्युञ्जन्ति त्वामस्मिन् रथे। ते हि विदुर्यथा त्वं योक्तव्यः। एवञ्च पूर्वमप्यश्वं युक्तवन्तो देवानामृषीणां च। त एव च तस्मिन् जवमादधुः आहितवन्तो यस्मादतो ब्रवीमि ममापि चाग्ने! तमश्वं त एव युञ्जन्तु, जवं चास्मिन्नादधत्विति॥३॥

अह इति च ह इति च विनिग्रहार्थीयौ पूर्वेण संप्रयुज्येते अयमहेदं करोत्वयमिदमिदं ह करिष्यतीदं न करिष्यतीत्यथाप्युकार एतस्मिन्नेवार्थ उत्तरेण मृषेमे वदन्ति सत्यमु ते वदन्तीत्यथापि पदपूरण इदमु तदु हीत्येषोऽनेककर्मेदं हि करिष्यतीति हेत्वपदेशे कथं हि करिष्यतीत्यनुपृष्टे कथं हि व्याकरिष्यतीत्यसूयायां किलेति विद्याप्रकर्ष एवं किलेत्यथापि न ननु इत्येताभ्यां सम्प्रयुज्यतेऽनुपृष्टे न किलैवं ननु किलैवमेति प्रतिषेधे मा कार्षीर्मा

हार्मोरिति च खल्विति च खलु कृत्वा खलु कृतमथापि पदपूरण एवं खलु तद्बभूवेति शश्वदिति विचिकित्सार्थीयो भाषायां शश्वदेवमित्यनुपृष्ट एवं शश्वदित्यस्वयं पृष्टे नूनमिति विचिकित्सार्थीयो भाषायामुभयमन्वध्यायं विचिकित्सार्थीयश्च पदपूरणश्चागस्त्य इन्द्राय हविर्निरूप्यमरुद्भ्यः सम्प्रदित्साञ्चकार स इन्द्र एत्यपरिदेवयाञ्चक्रे ॥ ४ ॥

इति प्रथमाध्यायस्य द्वितीयः पादः ॥ १, २ ॥

"अह इति च, ह इति च" द्वावप्येतौ "विनिग्रहार्थीयौ"। तयोः पुनरेतयोरेतत् प्रयोगस्वाभाव्यम्। द्वयोरर्थयोरेककाले प्रकृतयोः "पूर्वेण" पूर्ववाक्यगतेनार्थेन संयुक्तौ "प्रयुज्येते"। तद्यथा,—"अयमहेदं करोत्वयमिदम्" ॥ अयमह यज्ञदत्तो गाः पाययतु, अयं देवदत्तो भुङ्क्तामिति ॥

हकारस्योदाहरणम् "इदं ह करिष्यतीति"। यज्ञदत्त इदं ह करिष्यति। "इदं न करिष्यतीति"। ओदनं न पक्ष्यतीति ॥

"अथाप्युकार एतस्मिन्नेवार्थे उत्तरेण"। विनिग्रहार्थे भवति। स पुनरुत्तरेण द्वितीयवाक्यगतेनार्थेन संयुक्ते प्रयुज्यते। तद्यथा,—"मृषेमे" वृषलाः "वदन्ति"। "सत्यमु ते" ब्राह्मणाः "वदन्तीति"। विनिग्रहो नाम, विभागेनावस्थितयोर्यज्ञदत्तदेवदत्तयोरेकस्मिन् यज्ञदत्तेऽभिमतस्तगोपायनस्य नियमेन ग्रहणं यत् स विनिग्रहः। तदर्थो विनिग्रहार्थः, विनिग्रहार्थ एव विनिग्रहार्थीयः॥

सोमम् 'अपाम्' पीतवानिति। अस्य मे सोमपानस्यानुरूपमेव धीर्य्यमस्तीत्यभिप्रायः ॥

"अथापि" "वेति" अयं "समुच्चयार्थे भवति"। "वायुर्वा त्वा मनुर्वा त्वेति"। "वायुर्वा त्वा मनुर्वा त्वा गन्धर्वाः सप्तविंशतिः। ते अग्ने अश्वमयुञ्जंस्ते अस्मिञ्जवमादधुः (य० सं० ६, ७)"। अनुष्टुबेषा। वाजपेयेऽश्वयोजने विनियुक्ता। हे अश्व! वायुश्च त्वा मनुश्च त्वा, गन्धर्वा एते सप्तविंशतिर्युञ्जन्ति त्वामस्मिन् रथे। ते हि विदुर्यथा त्वं योक्तव्यः। एवञ्च पूर्वमप्यश्वं युक्तवन्तो देवानामृषीणां च। त एव च तस्मिन् जवमादधुः आहितवन्तो यस्मात्ततो ब्रवीमि ममापि चाग्ने! तमश्वं त एव युञ्जन्तु, जवं चास्मिन्नादधत्विति ॥३॥

अह इति च ह इति च विनिग्रहार्थीयौ पूर्वेण संप्रयुज्येते अयमहेदं करोत्वयमिदमिदं ह करिष्यतीदं न करिष्यतीत्यथाप्युकार एतस्मिन्नेवार्थ उत्तरेण मृषेमे वदन्ति सत्यमुते वदन्तीत्यथापि पदपूरण इदमु तदु हीत्येषोऽनेककर्मेदं हि करिष्यतीति हेत्वपदेशे कथं हि करिष्यतीत्यनुपृष्टे कथं हि व्याकरिष्यतीत्यसूयायां किलेति विद्याप्रकर्ष एवं किलेत्यथापि न ननु इत्येताभ्यां सम्प्रयुज्यतेऽनुपृष्टे न किलैवं ननु किलैवमेति प्रतिषेधे मा कार्षीर्मा

हार्वीरिति च खल्विति च खलु कृत्वा खलु कृतमथापि पदपूरण एवं खलु तद्बभूवेति शश्वदिति विचिकित्सार्थीयो भाषायां शश्वदेवमित्यनुपृष्ट एवं शश्वदित्यस्वयं पृष्टे नूनमिति विचिकित्सार्थीयो भाषायामुभयमन्वध्यायं विचिकित्सार्थीयश्च पदपूरणश्चागस्त्य इन्द्राय हविर्निरूप्यमरुद्भ्यः सम्प्रदित्साञ्चकार स इन्द्र एत्यपरिदेवयाञ्चक्रे ॥ ४ ॥

इति प्रथमाध्यायस्य द्वितीयः पादः ॥ १, २ ॥

"अह इति च, ह इति च" द्वावप्येतौ "विनिग्रहार्थीयौ"। तयोः पुनरेतयोरेतत् प्रयोगस्वाभाव्यम्। द्वयोरर्थयोरेककाले प्रसक्तयोः "पूर्वेण" पूर्ववाक्यगतेनार्थेन संयुक्तौ "प्रयुज्येते"। तद्यथा,—"अयमहेदं करोत्वयमिदम्" ॥ अयमह यज्ञदत्तो गाः पाययतु, अयं देवदत्तो भुङ्क्तामिति ॥

हकारस्योदाहरणम् "इदं ह करिष्यतीति"। यज्ञदत्त इदं ह करिष्यति। "इदं न करिष्यतीति"। ओदनं न पक्ष्यतीति ॥

"अथाप्युकार एतस्मिन्नेवार्थ उत्तरेण"। विनिग्रहार्थ भवति। स पुनरुत्तरेण द्वितीयवाक्यगतेनार्थेन संयुक्ते प्रयुज्यते। तद्यथा,—"मृषेमे" वृषलाः "वदन्ति"। "सत्यमु ते" ब्राह्मणाः "वदन्तीति"। विनिग्रहो नाम, विभागेनावस्थितयोर्यज्ञदत्तदेवदत्तयोरेकस्मिन् यज्ञदत्तेऽभिमतरसगोपायनस्य नियमेन ग्रहणं यत् स विनिग्रहः। तदर्थौ विनिग्रहार्थः, विनिग्रहार्थ एव विनिग्रहार्थीयः॥

सोमम् 'अपाम्' पीतवानिति। अस्य मे सोमपानस्यानुरूपमेव पार्य्यमस्तीत्यभिप्रायः॥

"अथापि" "वेति" अयं "समुच्चयार्थे भवति"। "वायुर्वा त्वा मनुर्वा त्वेति"। "वायुर्वा त्वा मनुर्वा त्वा गन्धर्वाः सप्तविंशतिः। ते अग्ने अश्वमयुञ्जंस्ते अस्मिञ्जवमादधुः (य० सं० ६, ७)"। अनुष्टुवेषा। वाजपेयेऽश्वयोजने विनियुक्ता। हे अश्व! वायुश्च त्वा मनुश्च त्वा, गन्धर्वा एते सप्तविंशतिर्युञ्जन्ति त्वामस्मिन् रथे। ते हि विदुर्यथा त्वं योक्तव्यः। एवञ्च पूर्वमप्यश्वं युक्तवन्तो देवानामृषीणां च। त एव च तस्मिन् जवमादधुः आहितवन्तो यस्मादतो ब्रवीमि ममापि चाग्ने! तमश्वं त एव युञ्जन्तु, जवं चास्मिन्नादधतिविति॥३॥

अह इति च ह इति च विनिग्रहार्थीयौ पूर्वेण संप्रयुज्येते अयमहेदं करोत्वयमिदमिदं ह करिष्यतीदं न करिष्यतीत्यथाप्युकार एतस्मिन्नेवार्थे उत्तरेण मृषेमे वदन्ति सत्यमुते वदन्तीत्यथापि पदपूरण इदमु तदु हीत्येषोऽनेककर्मेदं हि करिष्यतीति हेत्वपदेशे कथं हि करिष्यतीत्यनुपृष्टे कथं हि व्याकरिष्यतीत्यसूयायां किलेति विद्याप्रकर्षे एवं किलेत्यथापि न ननु इत्येताभ्यां सम्प्रयुज्यतेऽनुपृष्टे न किलैवं ननु किलैवमेति प्रतिषेधे मा कार्षीर्मा

श्रिताः सहायाः, स उपह्वरो देशः, जनैरनाकीर्णो यस्मिन्नेकाकी 'यत्' 'उपराः' मेघपूरिताः 'मध्वर्णसः' मधूदकाः 'चतस्रः' 'नद्यः' नदीः 'अपिन्वत' अपातयत् अक्षारयत् । घर्षद्वारेण यज्ञादि प्रावर्त्तयत्, —इत्यतः । एतदेवास्य चारुतमत्वम् पूज्यतमत्वञ्चेत्यभिप्रायः ॥

"हीत्येषोऽनेककर्मा" । तद्यथा,—"इदं हि करिष्यतीति हेत्वपदेशे । कथं हि करिष्यतीत्यनुपृष्टे । कथं हि व्याकरिष्यतीत्यसूयायाम्" । कथमयं व्याकरिष्यतीत्यकृतप्रयत्नोऽयमित्यभिप्रायः । असर्पात्सासाक्षाच्छब्द पूर्वकोऽभिप्रायः परिवादोऽसूयेत्युच्यते । परगुणानभिज्ञ त्यर्थः ॥

"किलेति विद्याप्रकर्षे" विज्ञानातिशय इत्यर्थः ॥ अन्यत उपश्रुत्यातिशय इत्यर्थः । अन्यत उपश्रुत्यातिशयेनावधार्य्यान्यस्मा आचष्टे कश्चित्—"एवं किल" एतदासीद्युद्धमिति ॥

"अथापि न ननु इत्येताभ्यां" संयुक्तः किलेत्ययं प्रयुज्यते । "अनुपृष्टे" अर्थे । अन्यत उपश्रुत्य कञ्चिदर्थं नायमेवमिति ततस्तमेवार्थमन्यमनुपृच्छति । अथेतरमश्रद्दधत्पूर्वस्य । "न किलैवम्"—इति । "ननु किलैवम्"—इति ॥

"मेति" अयं "प्रतिषेधे" । तद्यथा,—"मा कार्षीर्मा हार्षीरिति च" । अयञ्च प्रतिषेधार्थीय एव ।

"खल्विति च" । तद्यथा,—"खलु कृत्वा" । अकृत्वेत्यर्थः । देशमात्राव्यवस्थयैवञ्जातीयानामुपेक्षितव्यः कश्चित् प्रयोगः ॥

"अथापि" खल्वित्ययं "पदपूरणो" भवति । तद्यथा,—एवं खलु तद्बभूवेति । अन्वीक्ष्यः प्रयोगः कविस्पादवृत्तेषु ॥

"अथापि" उकारः "पदपूरणः" भवति। "इदु मु त्यत् पुरुतम पुरस्ताज्ज्योतिस्तमसो वयुनावदस्थात्। नूनं दिवो दुहितरो विभातीर्गातुं कृणवन्नुषसो जनाय॥" (ऋ० सं० ३, ८, २, १)। वामदेवो गौतमोऽनया त्रिष्टुभोषसं तुष्टाव। प्रातरनुवाकाश्विनयोः शस्यते। 'इदं' तत् 'ज्योतिः' यत् जनाः कथयन्ति। उकारः पदपूरणः। एतत् 'पुरुतमं' बहुतमम्। कुतः? पुरुतमम्। 'तमस.' यदभिभूय शार्वरं तमः स्वमात्मानमभिव्यनक्ति। अत एव तद् बहुतमम्। 'पुरस्तात्' प्राच्यां दिशि ज्योतिः 'वयुनवत्' प्रज्ञानवदुत्तिष्ठति। 'नूनं' निश्चयेन एताः 'उषसः' दिवो दुहितरः। रूपसामान्यात् दुहितृत्वात्। 'विभातीः' विभासमानाः 'गातुं' गमनमपि एतार्थं जनानां 'कृणवत्' कुर्वन्त्य आगच्छन्ति। यथेयमनुरज्यते प्राची दिक्, विध्वंस्यते च तमः। एकस्या एव पूजनार्थं बहुवचनम्॥

"तदु प्रयक्षतम मस्य कर्मदस्मस्य चारुतम मस्ति दंसः। उपह्वरे यदुपरा अपिन्वन् मध्वर्णसो नद्यश्चतस्रः।" (ऋ० सं० १, ५, २, १)। द्वितीयमुदाहरणमस्यैव। गौतमो नोधाश्चानया त्रिष्टुभेन्द्रमस्तौत्। प्रवर्ग्ये विनियुक्ता। 'तत्' प्रकर्षेण 'यक्षतमं' पूज्यतमम्। उ इति पदपूरण एव। 'अस्य' इन्द्रस्य 'दस्मस्य' दासयितुर्दर्शनीयस्य वा 'चारुतमं' शोभनतममन्यदपि तस्य 'अस्ति' 'दंसः' कर्म किमपि बहुप्रकारम्। तत् चार्वेव पूज्यमेव। इदमेव तस्य चारुतमं च पूज्यतमञ्च। तत् किम्? 'उपह्वरे यत् उपराः अपिन्वन्'। उपह्वानमर्हन्ति यस्मिन् देवोऽय-

निदधे सुवीराः ॥ सा तं प्रति दुग्धां वरं जरित्रे वरो वर-
यितव्यो भवति जरिता गरिता दक्षिणा मघोनी मघवती
मघमिति धननामधेयं मंहतेर्दानकर्मणो दक्षिणा दक्षतेः
समर्द्धयतिकर्मणो व्यृद्धं समर्द्धयतीत्यपि वा प्रदक्षिणा-
गमनाद्दिशमभिप्रेत्य दिग्घस्तप्रकृतिर्दक्षिणो हस्तो दक्षते-
रुत्साहकर्मणो दाशतेर्वा स्याद्दानकर्मणो हस्तो हन्तेः प्राशुर्ह
नने देहि स्तोतृभ्यः कामान् मास्मानतिदंहीर्मास्मानति-
हाय दा भगो नो अस्तु बृहद्वदेम स्वे वेदने भगो भज-
तेर्बृहदिति महतो नामधेयं परिबृढ्व्ह भवति वीरवन्तः
कल्याणवीरा वा वीरो वीरयत्यमित्रान् वेतेर्वा स्याद्गति-
कर्मणो वीरयतेर्वा सीमिति परिग्रहार्थीयो वा पदपूरणो वा
प्र सीमादित्यो असृजत् प्रासृजदिति वा प्रासृजत् सर्वत
इति वा विसीमतः सुरुचो वेन आवरिति च व्यवृणोत्
सर्वत आदित्यः सुरुच आदित्यरश्मयः सुरोचनादपि वा
सीमेत्येतदनर्थमुपबन्धमाददीत पञ्चमीकर्माणं सीम्नः सीमतः
सीमातो मर्य्यादातः सीमा मर्य्यादा विसीव्यति देशाविति
त्व इति विनिग्रहार्थीयं सर्वनामानुदात्तमर्द्धनामेत्येके ॥२॥

'अन्यस्य वित्तमभि सञ्चरेण्यम्' सञ्चरणशीलमनवस्थितमित्यभिप्राय । 'उत' अपि, अथेति छन्दसि समानार्थौ । एतद्धतन हवि 'आधीतम्' आध्यातमभिप्रेत सत् मया ममेदमित्येव तथापि 'विनश्यति' एवान्यस्मै प्रदीयते । तत्रैव सति श्वस्तनमस्माकं भविष्यतीति कुत एतदिति समस्तार्थ ॥

अथैकपदनिरुक्तम्,—"अस्मिन् द्यवि,—द्युरित्यह्नो नाम धेयम्, । द्योतत इति सत "। द्योततेर्द्युरिति । द्योतत इति कर्तृकारकम् । सदिति यत्र ब्रूयात्, तत्रोच्चारित एव वाक्यनियमो द्रष्टव्य, अन्यत्र यथेष्टं योज्यम् । "श्व उपाशसनीय' उपगम्य, सचतसा आशास्तव्यो भवति, अनागतत्वात । "ह्यो हीन काल" अतिक्रान्तो हि स भवति ॥ श्व सम्बन्धात् ह्य शब्दोऽभिमानोऽपि निरुक्त,—"अद्भुतम् अभूतम्"। "इदमपीतरद द्भुतम्"—शोणितवर्षादि, 'अभूतमिव' कादाचित्कत्वात् । शब्दसारूप्यप्रसङ्गेनेदं निरुक्तम् । "अन्यो नानेय" नानात्वेन व्यवस्थितस्यापत्यमसम्बुद्ध्यजन्येत्यर्थ । अथवा न नतामानेय । "चित्तश्चेतते" चेतयतेनार्थानिति चित्तम् । "उताधीतं विनश्य तीत्याध्यातमभिप्रेतम्"—इति पर्यायवचनम् ॥

"अथापि" अयमस्मिन्मन्त्रे "पदपूरण" भवति—॥ १ ॥

नूनं मा ते प्रति वरं जरित्रे दुहीयदिन्द्र दक्षिणा मघोनी । शिक्षा स्तोतृभ्यो माति धग भगो नो बृहद्वदेम

अन्तरेण चत्वालोत्करौ तमाग्नीध्रं चोत्सृज्यमाना गच्छन्तीति "दिक्" पुनर्दक्षिणा। "हस्तप्रकृतिः" प्राङ्मुखस्य प्रजापते-र्दक्षिणो हस्तो बभूव, सा दक्षिणा दिगभवत्। अथ "दक्षिणो हस्तः" कस्माद्दक्षिण इति? "दक्षतेः" उत्साहार्थस्य,—स ह्युत्साहवान् भवति कर्मसु, न तथा सव्यः। "दाशतेर्वा स्यात्" दानार्थस्य, तेनैव हि प्रायेण दीयते। अथ "हस्त." कस्मात्? "हन्तेः"—तेन हि हन्यते। न, अन्येनापि केनचिदङ्गेन हन्यते। एवं यो हन्तव्यो भवति तस्य "हनने" अयमेव तु "प्राशुः" शीघ्रः इत्यर्थः। "बृहदिति महतो नामधेयम्, परिवृढं भवति"—इति। "वीरो वीरयत्यमित्रान्" नानाप्रकारं मारयतीत्यर्थः। "वेतेर्वा स्याद्गतिकर्मणः" गत्यर्थे वर्त्तमानस्य, गच्छत्येवासावभिमुखं शत्रून्। "वीरयतेर्वा" विक्रमार्थस्य, विक्रान्तो ह्यसौ भवति।

"सीमिति" अयं "परिग्रहार्थीयो वा पदपूरणो वा"। "प्र सीमादित्यो असृजत् (ऋ० सं० २, ७, १, ४)"। अस्यामेव तावदुभयमपि प्रदर्शयति। ततः परिग्रहार्थीयत्वे द्वितीयमुदाहरणं वक्ष्यति। गृत्समदस्य तत्पुत्रस्य वा कूर्मस्येयमार्षम्, "प्र सीमा-दित्यो असृजद् विधर्त्ता ऋतं सिन्धवो वरुणस्य यन्ति। न श्राम्यन्ति न वि मुञ्चन्त्येते वयो न पप्तूरघुया परिज्मन्।" त्रिष्टुप्, सौरी। सूर्यः पुनरस्यां वरुणनाम्ना स्तूयते। प्रासृज-त्सूर्यो रश्मीन्। सीमिति पदपूरणं एव, कुतोऽपीत्यविवक्षित-मेवैतत् पदपूरणपक्षे। अथ परिग्रहार्थीयं सर्वमेव परिगृह्णाति, —"प्रासृजत् सर्वत इति वा"। 'विधर्त्ता' विधारयिता, रसानां,

"नून सा ते (ऋ० स० २, ६, ६, ६)"—इति गृत्समदस्ये यमार्षम्। पृष्ठ्यस्य चतुर्थेऽहनि मरुत्वतीये शस्यते। 'नूनम्' इति पदपूरण एव। 'सा' 'दक्षिणा' 'ते' तव या पुत्रभावके कर्मणि। सा किं करोतु? 'प्रति' दुग्धाम्। किम्? 'वरम्'। कर्मणो दक्षिणागुणकाल् फलप्राप्तिस्तथापि तु दक्षिणायामुप चर्य्यते। कस्मै? 'जरित्रे' स्तुवते यजमानाय। किंलक्षणा? 'मघोनी' मघवती हिरण्यधान्यादिधनेन संयुक्ता, तद्वतीत्यर्थ। किञ्च, 'शिक्षा' देहि कस्मै? 'स्तोतृभ्य' ऋत्विग्भ्योऽनुकामान्। किञ्च, माति धक' मास्मानतिहायातीत्यन्येभ्यो देहीति मास्म इत्यर्थ। अस्मभ्य तावद्देहि, ततोऽन्येभ्योऽपि दास्यसि त्वेत्य भिप्राय। किञ्च, 'भगो न' धन नोऽस्तु। येन किं कुर्य्याम्? 'बृहद्वदेम' महद्वृजिन वदेम दीयता भुज्यतामिति। क? 'विदथे' यज्ञे। अथवा स्वे गृहे। किञ्च, युष्मदनुग्रहाच्च सुवीरा' वीरवन्तो भवेम पुत्रवन्त। यद्यपुत्रा, एवमय मत्वर्थीय मु' अथ पुन पुत्रवन्त, एव तत कल्याणवीरा इति समस्तार्थ ॥

अथैकपदनिरुक्तम्।—"स वरयितव्यो भवति" व्रियते वार्ता। "जरिता गरिता" इति स्तुत्यर्थस्य। "मघमिति महनेर्दान कर्मण" दीयते हि तत्। "दक्षिणा दक्षते" समर्द्धयत्यर्थस्य, यज्ञे हि यत्किञ्चिद्विगतद्धिक भवति, तदिय समर्द्धयति, विशिष्ट यज्ञस्य साधनमेनदिति। "अपि वा प्रदक्षिणागमनात्" दक्षिणा। दक्षिणा "दिशमभिप्रेत्य"—सा हि दक्षिणस्या वेदिश्रोणौ, अग्रेण गार्हपत्य, जघनेन सद, दक्षिणेनाग्नीध्रीय गत्वा अन्तर्वेदि स्थित्वा

प्रशस्तरोचनान् रश्मीन् 'सीमतः' सर्वतः। किञ्च, 'सः' 'वेनः' मेधावी 'बुध्न्याः' बुध्नमन्तरिक्षं तदवयवभूताश्च दिशः, 'उपमाः' 'उपनिर्मात्र्यः, तासु ह्येतत्प्रतिष्ठितं सर्वमुपनिर्मीयते जगदित्येतत्,—तस्मात्ता एवोपनिर्मात्र्य उच्यन्ते। 'विष्ठाः' विष्ठाः,—तासु ह्येतज्जगद्विभिन्नं तिष्ठतीति ता एव विष्ठाः। 'सतश्च' अभिव्यक्तस्य स्थूलस्य 'असतश्च' अनभिव्यक्तस्य सूक्ष्मस्य 'योनिं' 'विवः' व्यवृणोदित्यर्थः। आदित्योदये ह्येवङ्गुणयुक्ता दिशोऽभिव्यज्यन्त इत्यभिप्रायः। अथवा बुध्न्या आप आन्तरिक्षास्ता उपमा इत्येवमादि सर्वं योज्यम्॥

"अपि वा सीमेत्येतदनर्थकमुपबन्धमाददीत पञ्चमीकर्माणम्। सीम्नः सीमतः सीमातो मर्य्यादातः। सीमा मर्य्यादा विसीव्यति देशाविति"। विगतसन्तानौ देशौ करोतीति॥

"त्व इति विनिग्रहार्थीयं सर्वनामानुदात्तम्" निपातस्येनैतदपि सन्दिह्यते। वक्ष्यति हि "निपात इत्येके"—इति। अतः त्व इति ह्येवं निपातकाण्ड उदाह्रियते। संशय परिशोधनाय त्व इत्येतद्विनिग्रहार्थीयमिति व्याख्यातम्। किमु तत् सर्वनामविप्रतिपन्नत्वात् स्वरमप्यवधारयन् अस्यानुदात्तमित्याह, कथं पुनर्विप्रतिपन्नस्वरमेतदिति ? उच्यते,—प्रातिपदिकस्यान्त उदात्त इत्यौत्सर्गिकं लक्षणम् (फि० सू० १, १)—अन्यत्र चापवादात्,—लक्षणविदोऽपि चास्यापवादं पठन्ति,—"त्यत्त्वनेमसमसिमेत्यनुच्चानि (फि० सू० ४, ६)"—इति।

"अर्द्धनामेत्येके"। अर्द्धस्यैतन्नामेत्येवमेके आचार्य्या मन्यन्ते।

रश्मीनां वा, स्वरश्मिजालान्तर्गतस्य वा, धर्त्ता सर्वस्य जगत । 'ऋतम्' उदकमादाय, पृथिवीलोकादन्तरिक्षलोकाच्च । 'सिन्धव' स्यन्दना सूर्यरश्मय,—ते हि आदित्यमण्डलात् प्राञ्चो वर्त्तमाना स्यन्दन्ते वर्षकाले, सूर्येण प्रसृष्टा उदकमादाय सार्व-लौकिक 'वरुणस्य' सूर्यस्य स्थान मण्डल 'यन्ति'। तदेवमप्य निशमुत्सर्गादानलक्षण स्वकर्म कुर्वाण 'न श्राम्यन्ति'। 'न' वा श्रान्ता अपि सन्तो विरागादप्येतत् कर्म 'विमुञ्चन्ति' एते। कथ पुन पतन्तो न श्राम्यन्ति ? किं शनकै ? न। 'वयो न' वय इव पक्षिण इव शीघ्र 'पप्तु' पतन्त 'रघुया' लघुया लघ्वया शीघ्रिकया गत्यापि 'परिज्मन्' परिज्मन्त परिगच्छन्त सर्व मप्येतज्जगन्न श्राम्यन्ति न विमुञ्चन्त्येतत् कर्म ॥ एतद्गुणयुक्ता नामप्येतेषा सूर्य एव प्रतिसर्गे सयमे च ईश्वर इत्येव सूर्यस्य स्तुतिरेषा ॥

"विसीमत सुरुचो वेन आवरिति च' । इद द्वितायमुदा हरणम्। ब्रह्मजज्ञानमिति । "ब्रह्म जज्ञान प्रथम पुरस्ताद् विसी मत सुरुचो वेन आव । स बुध्न्या उपमा अस्य विष्ठा सतश्च योनिमसतश्च विव ॥" (य० वा० स० १३, ३)। सामवेदसंहि तायामपि छ० आ० ४, १३, १। वामदेवपुत्रो नकुलोऽनया त्रिष्टुभा आदित्य स्तुणव। प्रवर्ग्यविनियुक्ता रुक्मोपधाने चाग्नि चयने। 'ब्रह्म' आदित्याख्यं 'जज्ञान' जायमान 'प्रथमम्' अनुत्प न्नेषु आदित 'पुरस्तात्' प्राच्या दिशि तदुद्धवोपलक्षितमेव प्राच्या प्राचीत्यम्। 'वि आव' व्यवृणोत्, विवृतानकरोत्। 'सुरुच'

प्रशस्तरोचनान् रश्मीन् 'सीमतः' सर्वतः। किञ्च, 'सः' 'वेनः' मेधावी 'वुध्न्याः' वुध्नमन्तरिक्षं तदवयवभूताश्च दिशः, 'उपमाः' 'उपनिर्मात्र्यः, तासु ह्येतत्प्रतिष्ठितं सर्वमुपनिर्मीयते जगदित्येतत्,—तस्मात्ता एवोपनिर्मात्र्य उच्यन्ते। 'विष्ठाः' विस्थाः,—तासु ह्येतज्जगद्विभिन्नं तिष्ठतीति ता एव विष्ठाः। 'सतश्च' अभिव्यक्तस्य स्थूलस्य 'असतश्च' अनभिव्यक्तस्य सूक्ष्मस्य 'योनिं' 'विवः' व्यवृणोदित्यर्थः। आदित्योदये ह्येवङ्गुणयुक्ता दिशोऽभिव्यज्यन्त इत्यभिप्रायः। अथवा वुध्न्या आप आन्तरिक्षास्ता उपमा इत्येवमादि सर्वं योज्यम्॥

"अपि वा सीमेत्येतदनर्थकमुपवन्धमाददीत पञ्चमीकर्माणम्। सीम्नः सीमतः सीमातो मर्य्यादातः। सीमा मर्य्यादा विसीव्यति देशाविति"। विगतसन्तानौ देशौ करोतीति॥

"त्व इति विनिग्रहार्थीयं सर्वनामानुदात्तम्" निपातत्वेनैतदपि सन्दिह्यते। वक्ष्यति हि "निपात इत्येके"—इति। अतः त्व इति हैवं निपातकाण्ड उदाहियते। संशय परिशोधनाय त्व इत्येतद्विनिग्रहार्थीयमिति व्याख्यातम्। किमु तत् सर्वनामविप्रतिपन्नस्वरत्वात् स्वरमप्यवधारयन् अस्यानुदात्तमित्याह, कथं पुनर्विप्रतिपन्नस्वरमेतदिति? उच्यते,—प्रातिपदिकस्यान्त उदात्त इत्यौत्सर्गिकं लक्षणम् (फि० सू० १, १)—अन्यत्र चापवादात्,—लक्षणविदोऽपि चास्यापवादं पठन्ति,—"त्वत्त्वनेमसमसिमेत्यनुचानि (फि० सू० ४, ६)"—इति।

"अर्द्धनामेत्येके"। अर्द्धस्यैतन्नामेत्येवमेके आचार्य्या मन्यन्ते।

पश्यन्ति चायमपि "त्वो नेम इत्यर्द्धस्य (निरु० ३, ४, १)"— इति। तदेतत् प्रकरणोपपदाभ्यामध्यवसेयम्,—'कार्द्धनाम ? क्व सर्वनाम ? इति ॥२॥

यथात्र सर्वनाम कोपयुज्यते(?)'—

द्वितीयायामुतो त्वस्मै तन्वं विसस्र इति चतुर्थ्यामथापि प्रथमाबहुवचने ॥ ३ ॥

"ऋचान्त्वः (ऋ० सं० ८, २, २४, ५)"—इति। वृहस्पते-रार्षम्। ऋत्विक्कर्मणां विनियोगमनयर्चाऽऽचष्टे। "ऋचां त्वः पोषमिति"। य एते चत्वारो महर्त्विजः, एतेषां 'त्वः' एक इत्यर्थः। किमेकः करोति? 'ऋचां' 'पोषं' पुष्टिं 'पुपुष्वान्' पुनः पुनः भृशं वा देवतायाथात्म्यानुचिन्तनसन्तानमर्मस्थानकरणा-नुप्रदानवतीर्यथाकालमृचोऽधीयानः 'आस्ते'—स हि तासां पोषः। कतमः? 'एकः' एतत्कर्म कुर्वन्नास्ते इति,—होता, एतत्तावदृग-ध्ययनकर्म तस्मिन् होतरि विनियुक्तम्, उक्तं च—"यदृचैव होत्रं क्रियते"—इति (ऐ० ब्रा० ५, ५, ८)। 'गायत्रं' त्वः? गायत्र-मेको 'गायति' 'शक्वरीषु' ऋक्षु। कतमः? उद्गाता, तस्मिन्नप्ये-तत्सामगानकर्म विनियुक्तम्, उक्तञ्च—"साम्नोद्गीथम्"—इति (ऐ० ब्रा० ५, ५, ८)। "ब्रह्मा त्वः" ब्रह्मा नाम एक ऋत्विक् 'जाते' प्रायश्चित्ते 'विद्यां वदति'। विद्यात्रयहेतुत्वादात्मनो विद्यां विज्ञातं वदतीतरेभ्य ऋत्विग्भ्यः, इदमत्र कुरुतेति। तत्रापि ह्येतत् कर्म विनियुक्तम्। स पुनरेव सर्वविदः सर्वविज्ञानस्तथा-विधो ह्यसावधिकारी त्रयीविद्यासंयुक्तो येनासौ सर्वमेव वेदितुम-र्हति। न ह्यसर्वविन् तमधिकारं शक्नुयान्निर्वर्त्तयितुम्। उक्तञ्च —"अथ केन ब्रह्मत्वं क्रियत इति? त्रय्या विद्यया"—इति (ऐ० ब्रा० ५, ५, ८)। "यज्ञस्य मात्रां विमिमीत उ त्वः।

एक इति। मीयत इति मान कर्म, तन्मात्रेत्युच्यते। या काचिदितिकर्त्तव्यता यज्ञस्य, ता विमिमीतेऽध्वर्यु, नानाप्रकारं करोतीत्यर्थ ॥

अथैकपद निरुक्तम्।—"गायत्र गायते" स्तुत्यर्थस्य,—स्तूयते ह्यनेन। "शक्वर्य्य ऋच शक्नोते"—इत्युक्त्वा शक्वरी शब्दे वृत्ति दर्शयति—"तद्यदाभिर्वृत्रमशकद्धन्तु" "तत्" एव "शक्वरीणा शक्वरीत्वम्"। तत्र यद्यस्मादाभिरभिष्टुत इन्द्रो वृत्रम शकद्धन्तु तच्छक्वरीत्वम्—'इति विज्ञायते'। ऋचा शक्वरीत्व मित्येव ब्राह्मणेऽपि शक्नोतेरेव शक्वर्य्य इति विज्ञायते। लिङ्गतो ऽपि हि दर्शित भवति, आख्यातजानि नामानीति ॥

"ब्रह्मा परिवृढ श्रुतत स हि त्रयीं विद्या वेद। शब्दसारूप्य प्रसक्तमुच्यते,—"ब्रह्म परिवृढ सर्वत। ऋगादिपर चोभयमपि तत्परिवृढ सर्वासु दिक्षु। "अध्वर्य्यु अध्वरयु' एवमपि अग्गृहात इति। पुनरप्याह,—"अध्वरं युनक्त्यध्वरस्य नेता" प्रापयितेत्यर्थ,—स ह्यन्न प्रापयत्यध्वरमेव। अथवा "अध्वर कामयते" क्तुम् "—इति" अध्वय्यु। एतस्मिन्निर्वचने यु, पसूयव इति यथा। अथवा "अर्धीयाने" तमध्वर कस्मिंश्चिद् ब्राह्मणे अध्वर इतीयमेव सञ्ज्ञा भवति, मञ्चाक्रोशनवत्। एत स्मिंश्च निर्वचने "यु" अयम् 'उपयन्ध" नामकरणम्। अध्वर मधीते य सोऽध्वर्य्यु। विग्रहप्रसक्तस्याध्वरशब्दस्य तत्त्वमा चष्टे,—'अध्वर —इति यज्ञनाम"। ध्वरः इत्यधुना निरुक्तत्य, —"ध्वरतिर्हिंसाकर्मा'। ध्वरति धूर्वतीति हिंसार्थेषु पठितौ

(पूर्वखण्डे २११ पृ०), "तत्प्रतिषेधः" अध्वरः अहिंस्र इत्यर्थः ॥

आह,—नन्वत्र हन्यन्ते पशवः, छिद्यन्ते तृणवनस्पतयः, तत् कथमहिंस्रः ? उच्यते,—अभ्युदय एव हि सः। एवं हि श्रूयते —"न वा उ एतस्मिन् म्रियसे (य० वा० सं० २३, १६)"— इति। तथाच—"कुशलत्वमिच्छन्ति तृणानि राजन्"—इति। तस्मादभ्युदययोगादहिंस्र इत्युपपद्यते ॥

"निपातः" अयम् "इत्येके" मन्यन्ते ॥

एवमेकीयपक्षे निपातत्वमस्योक्त्वा अधुना चोदकपक्षे स्थित्वा परपक्षमाक्षिपन्नाह,—"सत् कथमनुदात्तप्रकृति नाम स्यात्"— इति। तदेतच्छब्दरूपमनुदात्तस्वभावं सत् कथं नाम स्यात् ? ननु भवतैवोक्तम्—उत्सर्गेणैवान्तोदात्तानि प्रातिपदिकानि—इति (५६ पृ० १८ पं०)। उच्यते,—सत्यमुक्तम्। ननु तत्रैवेदं प्रत्युक्तम्—अन्यत्र चापवादात्—इति (५६ पृ० १६ पं०)। स एषोऽपवादांशः—त्यस्वर्णमसमसिमेत्यनुदात्तानीति (६० पृ० २० पं०)। उत्सर्गादपवादो बलीयान्। तस्माद्विप्रतिपन्नस्वरमपि एतन्नामैव। 'किञ्च' "दृष्टव्ययं तु भवति"। तु शब्दो हेत्वर्थः —हेतुसमुच्चयार्थो वा। अनुदात्तप्रकृतित्वेऽपि स तु 'दृष्टानुविषयश्छन्दसि'—इति दृष्टव्ययत्वान्नामेति तद्भवति। एव हेत्वर्थः। अथवैवमन्यथाहेतुसमुच्चयार्थः, अपवादस्मरणात्—व्ययदर्शनाच्च अनुदात्तमपि सदेतन्नामैव भवति। निपाता अप्याद्युदात्ता भवन्ति (फि० सू० ४, ११)। तस्मात् स्मृतापवादत्वाद्—दृष्टव्ययत्वाच्च नामैवैतदित्युपपन्नम् ॥

आह,—क पुनरस्य व्ययो दृष्टः ? उच्यते,—"उत त्वं सख्ये स्थिरपीतमाहुरिति द्वितीयायाम्" एकवचने। एवम् 'उतो त्वस्मै तन्वं १ वि सस्र इति चतुर्थ्याम्" एकवचने व्ययो दृष्टः। उपरिष्टाच्छेदः। "अथापि प्रथमाबहुवचने"—व्ययो दृष्ट इत्यध्याहारः॥ ३॥

अक्षण्वन्तः कर्णवन्तः सखायो मनोजवेष्वसमा बभूवुः। आदघ्नास उपकक्षास उ त्वे ह्रदा इव स्नात्वा उ त्वे ददृश्रे। अक्षिमन्तः कर्णवन्तः सखायोऽक्षि चष्टेरनक्तेरित्याग्रायणस्तस्मादेते व्यक्ततरे इव भवत इति ह विज्ञायते कर्णः कृन्ततेर्निकृत्तद्वारो भवत्यृच्छतेरित्याग्रायण ऋच्छन्तीव खे उदगन्तामिति ह विज्ञायते मनसां प्रजवेष्वसमा बभूवुरास्यदघ्ना अपर उपकक्षदघ्ना अपरे आस्यमस्यतेरास्यन्दत एनदन्नमिति वा दघ्नं दघ्यतेः स्रवतिकर्मणो दस्यतेर्वा स्याद्विदस्ततरं भवति ह्रदा इवेके प्रस्नेया ह्रदा इवेके प्रस्नेददृशिरे स्नानार्हा ह्रदो ह्रदतेः शब्दकर्मणो ह्लादतेर्वा स्याच्छीतीभावकर्मणोऽथापि समुच्चयार्थे भवति॥४॥

अक्षण्वन्तः कर्णवन्तः (ऋ० सं० ८, २, ३४, २)"—इत्येतस्यामृचि। बृहस्पतेरार्षं विद्याख्यं नाम। 'अक्षण्वन्तः' अक्षि-

संयुक्ताः, एवमपि समानेन्द्रियाः समानपृष्ठोदरपाणिपादाः सन्तः अपि च, 'सखायः' समानख्यानाः सर्वे मनुष्याः। अथवा समानेषु शास्त्रेषु कृतश्रमाः। वैयाकरणा वैयाकरणानामेव समानख्यानाः, नैरुक्ता एव नैरुक्तानाम्। 'मनोजवेषु' मनोगम्येष्वर्थेषु 'असमा बभूवुः'। केचिदूहापोहनधारणवक्तृत्वसमर्थाः, केचिदमेधसः। कथमसामान्यमिति? यतो दृष्टान्तेन प्रतिपादयति।—"आदघ्नास उपकक्षास उ त्वे ह्रदा इव"। आदघ्ना एव आदघ्नासः। आस्यदघ्नह्रदपरिमाणाः, केचित् प्रज्ञया। उपकक्षासः कक्षसन्निकृष्टदेशतुल्योदका इव ह्रदाः। एके प्रज्ञयाह्रदाः 'स्नात्वा' अक्षोभ्याः अपरिमेयप्रज्ञानाः। 'ददृश्रे' ददृशिरे—दृश्यन्त इति समस्तार्थः॥

अथैकपदं निरुक्तम्। "अक्षि, चष्टेः" पश्यत्यर्थस्य,—दृश्यते ह्यनेन। "अनक्ते" व्यक्त्यर्थस्य—"इत्याग्रायणः" मन्यते। ब्राह्मणमपि चैतस्मिन्निर्वचने भवति। "तस्मादेते व्यक्ततरे इव भवतः"—इति। यस्मादिदमाहेति किमिति प्रकृतमपेक्ष्य। अथवा यस्मादेते तेजोऽवयवभूयिष्ठे, तस्मात्कारणादित्येवं यच्छब्दमन्वाकृष्य विद्यमानमविद्यमानं चोत्पद्य तस्माच्छब्दस्य सामर्थ्यमुत्पाद्यते। तथाहि स निराकाङ्क्षो भवति। सर्वत्र च साकाङ्क्षेषु शब्देष्वेवं व्याख्यानधर्मो द्रष्टव्यः। एते अक्षिणी इतरेभ्योऽङ्गेभ्यो व्यक्ततरे स्पष्टतरे प्रकाशतरे भवतः;—अन्धकारेऽपि ह्येते प्रकाशेनैव नक्षत्रादीनां न तथेतराण्यङ्गानि। एवं ब्राह्मणेऽपि अनक्तेरेवाक्षिणी "—इति ह विज्ञायते"। "कर्णः

कृन्ततेर्निकृत्तद्वारो भवति, ऋच्छतेरित्याग्रायणः" मन्यते। ब्राह्मणमपि चैतस्मिन्निर्वचने भवति,—"ऋच्छन्तीव खे उदगन्तामिति ह विज्ञायते"—इति। ऋच्छन्तीवैतौ कर्णौ खेऽभिव्यक्ताः सन्तः शब्दाः एतावपि च उदगन्तां प्रत्युद्गच्छत इव ग्रहणाय। विचार्यमाणे ज्ञायते खे कर्णाविति। "आस्यमस्यतेः" क्षेपार्थस्य,—क्षिप्यते ह्येतदाभिमुख्येनान्नम्। स्यन्दतेर्वा स्यादाङ्पूर्वस्यैव स्रवणार्थस्य,—शुष्केऽपि ह्येतदत्र आगते स्रवत्येव श्लेष्माणं, येन तदार्द्रीकृतं ग्रसितुं शक्यते। "दघ्नं, दध्यतेः" स्रवत्यर्थस्य। स्रुततरमिव तद्भवत्युत्तरात् परिमाणात्। "दस्यतेर्वा स्यात्" क्षयार्थस्य। "विदस्ततरं" इव पक्षीणतरं, तद् "भवति" उत्तरस्मात् परिमाणात्। "प्रस्नेयाः" प्रकर्षेण स्नातुं येषु योग्यम्, अगाधत्वात्, ते प्रस्नेयाः स्नानार्हा इत्यर्थः। "ह्रदो ह्रादतेः" शब्दार्थस्य,—शब्दं ह्रासायभिहन्यमानः करोति। "ह्लादतेर्वा स्यात्" शीतीभावार्थस्य,—ग्रीष्मेऽपि ह्रदो शीतल एव भवति॥

"अथापि" अयमपरो निपातः "समुच्चयार्थे भवति" एकतमः—स्यत् इति॥ ४॥

किमुदाहरणम्?—

पर्याया इव त्वदाश्विनमाश्विनश्च पर्यायाश्चैव ये प्रयुक्तेऽर्थेऽमिताक्षरेषु ग्रन्थेषु वाक्यपूरणा आगच्छन्ति पदपूरणास्ते मिताक्षरेष्वनर्थकाः कमीमिद्विति। निष्ट्वक्रा-

सश्चिदिन्नरो भूरितोका वृकादिव। बिभ्यस्यन्तो ववाशिरे शिशिरञ्जीवनाय कम्। शिशिरञ्जीवनाय। शिशिरं शृणातेः शम्नातेर्वा। एमेनं सृजता सुते। आसृजतैनं सुते। तमिद्वर्द्धन्तु नो गिरः। तं वर्द्धयन्तु नो गिरः। स्तुतयो गिरो गृणातेः। अयमु ते समतसि। जयन्ते समतसीवोऽपि दृश्यते ॥ ४ ॥

"पर्याया इव त्वदाश्विनम् (ऋ० प्राति० १२, १०)"—इति। आह, किमुक्तं भवति? उच्यते,—"आश्विनं च पर्यायाश्चेति"—एवं समुच्चयार्थे भवति। "अथ ये प्रवृत्तेऽर्थेऽमिताक्षरेषु ग्रन्थेषु वाक्यपूरणा आगच्छन्ति, पदपूरणास्ते मिताक्षरेष्वनर्थकाः कमीमिद्विति"। व्याख्याताः क अपि संग्रहार्थीयाः, तत्प्रसङ्गेन ईल्येवमादयो अन्यार्था अप्युक्ताः। प्रतिज्ञाप्रसक्तानेवाधुना पदपूरणान् वक्ष्यामः। तेषां सामान्यमेव तावल्लक्षणमुच्यते। तत्राधिकारार्थोऽयमथशब्दोऽथ ये प्रवृत्ते परिसमाप्ते अर्थे अन्यैरेव वाक्यगतैः पदैरमिताक्षरेषु गद्यग्रन्थेषु वाक्यपूरणा आगच्छन्ति पदपूरणार्थास्त एव मिताक्षरेषु भवन्ति। उभयत्रापि तु ते अनर्थकाः अनर्थान्तरवाचकाः, प्राकृतादर्थात् न किञ्चिदर्थान्तरं द्योतयन्ति। पदमेव वाक्यमेव वा पूरयितव्यमित्ययमेव हि तेषामर्थो नान्यदर्थान्तरम्। उक्तं च,—

"क्रियावाचकमाख्यातमुपसर्गो विशेषकृत्।

निपाता ,—इत्येतामानुपूर्वीमपेक्ष्यैतदुक्तम्। तत्र ये प्रवृत्तेऽर्थे आगच्छन्ति, ते पदपूरणा भवन्ति। एतामानुपूर्वीमपेक्ष्य पूर्व माख्यातलक्षणमुक्तम्, तदनु नामलक्षणम्। तस्मादादावपि निपात, तन्मध्ये वा अतएव द्रष्टव्य। लोकेऽपि हि दत्तानुयो गाना ब्राह्मणानामवस्थानक्रमोऽकिञ्चित्कर एव भवति। मध्येऽन्ते चावस्थितो य प्रधान, सोऽग्र्य इत्युच्यते। तस्मात सम्यगे वोक्त 'ये प्रवृत्तेऽर्थे--इति॥

व्यत्यय चाधिकृत्य श्लोकमप्युदाहरन्ति,—

"आदिमध्यान्तलुप्तानि प्रच्छन्नापिहितानि च।

ब्रह्मण परिगुप्त्यथ वेदे व्यवहितानि च॥"--इति।

अधुना एवमेतानुदाहृतान् कर्मामिदून् समासत प्रत्येकमुदा हरणैर्दर्शयति,—"शिशिर जीवनाय कम्"—इत्यत्र कमित्येव पद- पूरण। शिशिर जीवनाय जीवनार्थमित्यर्थ। तत्र हि प्रायेण प्रचुराणि शरद्धान्यानि भवन्ति। कमिति पदपूरण एव। "मुञ्चामि त्वा हविषा जीवनाय कम् —इति (ऋ० स० ८, ८, १६, १)। अत्र सायण,--'किमर्थम्? 'जीवनाय कम" जीव नार्थम्, इह लोके चिरकालावस्थानार्थमित्यर्थ। कमिति पूरक।' --इति। शाखान्तरेषु शेषो द्रष्टव्य॥

केचिदेव स्तशेषमत्राधीयते,—

निष्टूयक्त्रासश्चिदिन्नरो भूरितोका वृकादिव॥

बिभ्यस्यन्तो ववाशिरे शिशिरञ्जीवनाय कम्॥"—इति।

निष्पक्वा एव 'निष्वक्वासः' निर्वसना इत्यर्थः। अपि च। 'भूरितोकाः' बह्वपत्या इत्यर्थः। के पुनस्ते? दरिद्राः, 'केचिन्नरो' मनुष्या इत्यर्थः। किं तेषामिति। 'वृकादिव बिभ्यतः' पुनः पुनर्भृशं वा बिभ्यतो वृकादिव हिमात् 'ववाशिरे' पुनः पुनर्भृशं वा पश्यन्ते। किमिति ववाशिरे? शिशरम्। अस्माकं जीवनाय जीवनार्थमागच्छति,--इत्येवं हेमन्ते ववाशिरे। अल्पतरशीतं हि शिशिरं, सुखं तत्र जीविष्याम इत्यभिप्रायः॥

निगमप्रसक्तस्य शिशिरशब्दस्य निर्वचनम्--"शिशिरं शृणातेः" हिंसार्थस्य "शम्नातेर्वा" हिंसार्थस्यैव, नार्थकृतो विशेषः। हिनस्ति तस्मिन् काले अप्रतिबध्यमानो अतिशयेन दावाग्निः शुष्कानोषधिवनस्पतीन्॥

ईमित्यस्योदाहरणम्--"एमेनं सृजता सुते मन्दिमिन्द्राय मन्दिने। चक्रिं विश्वानि चक्रये॥" (ऋ० सं० १, १, १७, २)। ऐन्द्री यथा गायत्री। मधुच्छन्दस आर्षम्। पृष्ठ्याभिप्लवस्तोमवृद्धौ प्रातःसवने ब्राह्मणाच्छंसिनः शस्त्रे महाव्रते च तृचाशीतिषु विनियुक्ता। 'आ सृजतैनम्' आभिमुख्येन सृजत। 'ईम्'--इति पदपूरण एव। द्रोणकलशपात्रेण चमसैश्च सोमं हे अध्वर्यवः! किमासृजत? योऽयमिन्द्रस्य 'सुते' अभिषुते सोमे स्वांशः, उपयपात्रचमसस्थः, एनमासृजत। 'मन्दिं' मन्दयितारम्। 'मन्दिने' इन्द्राय हर्षवते। 'चक्रिं' चक्रनवन्तं क्रमणवन्तं वा। अपि वा हविर्धानशकटचक्राभ्यां चक्रवन्तमपि। चक्रदिति कर्मनाम (पूर्वभागे १८४ पृ०)। अतिविशिष्टवीर्यजनकैः

संस्कारकर्मभिस्तद्धन्त 'विश्वानि' सर्वाणि भूतानि वा। 'चक्रये' कृतवते इन्द्राय। सोम प्रत्यक्ष, दातारश्च, परोक्षा त्विन्द्रस्य स्तुति। "अथापि प्रत्यक्षकृता स्तोतारो भवन्ति, परोक्षकृतानि स्तोतव्यानि"—इति वक्ष्यति॥

"तमिद्वर्द्धन्तु नो गिर"—इति। इदित्यस्योदाहरणम्। "तमिद्वर्द्धन्तु नो गिरो वत्स सशिश्वरीरिव। य इन्द्रस्य हृद् सनि॥" (ऋ० स० ७, १, २०, ५)। अमहीयोराङ्गिरसस्ये यमार्षम्। गायत्री, सौमी। ग्रावस्तुतौ विनियुक्ता। 'तम्' वर्द्धयन्तु 'न'। त सोमम्। 'इत'—इति पदपूरण। वर्द्ध यन्तूपजातवीर्य्यं कुर्वन्तु। देवतृप्तये। न एता अस्मद् 'गिर' स्तुतय। कथ पुनर्वर्द्धयन्तु। 'वत्स ग शिश्वरीरिव'। वत्समिव, एकशिशुका बह्वयो गाव, ता यथा पर्य्यायेण वत्समेक मृतवत्सा स्वै स्वै पयोभिर्विहनादिसमर्थं कुर्य्यु। एवमेवास्मद्गि एन सोममुपजातवीर्य्यं देवतर्पणाय कुर्वन्तु वर्द्धयन्तु। यतम। 'य' 'इन्द्रस्य' 'हृद सनि' हृदयसम्भक्ता, तमेन वर्द्धयन्त्वित्य भिप्राय॥

आह,—कस्मात् पुनरत्र केचिदुदाहरणमन्त्रा अशेषा पठ्यन्ते, निरुच्यन्ते, केषाञ्चिदेकदेशा? इति। उच्यते,—ये तावदशेषा पठ्यन्ते, निरुच्यन्ते च, ते व्याख्याधर्मोपदेशनार्थम्। यदि पुन सर्व एव पठ्येरन्, निरुच्येरश्च, अतिगुरुशास्त्र सम्पद्येत। अथापि सर्वेषामप्युदाहरणमन्त्राणामेकदेशा पठ्येत निरुच्येत च, तथापि व्याख्याधर्मो न प्रदर्शित स्यात्। तस्माद् व्याख्याधर्मोपदर्शनार्थं

केचिदृशेषाः पठ्यन्ते, निरुच्यन्ते च, केशाश्चिदेकदेशाः, शास्त्रातिगौरवभयात्।—इति प्रतिमन्त्रमपि सकलार्द्धर्चपादाध्ययने शक्यते प्रयोजनमन्वेष्टुम्, तदेतत्समासेन ब्रूमः। यस्मिन् यस्मिन्मन्त्रे यत्रनु पदमेकार्थमनेकार्थमनवगतसंस्कारं वा निर्ब्रवीति, किञ्चिद्वान्यच्छब्दरूपमध्याहरति, अन्यद्वापोहति, अन्यथा वा कश्चिद्विपरिणामं करोति, सन्दिग्धं वा निर्णयति, तदर्थमेव तं सकलमधीते। यस्मिन्वार्द्धर्चे पादे तावत् पदं भवति, यदभिमतं निर्वक्तुं तावन्मात्रमेवाधीते। तद्विविवक्षया तदेतदेवं निपुणमन्वेष्टव्यं सर्वत्र॥

उकारस्योदाहरणम्—"अय मु ते समतसि कपोत इव गर्भधिम्। वचस्तच्चिन्न ओहसे॥" (ऋ० सं० १, २, २८, ४)। शुनःशेपो नियुक्त आत्मानं मोचयितुमिच्छेस्तया गायत्र्येन्द्रं तुष्टाव। 'अयम्' इति वर्त्तमानः सन् कर्मणि निर्वित्सन्नाह। 'ते' तव युष्मदर्थं सोमः यं प्रति नित्यकालमेव 'समतसि' सम्पतसि। त्वं तामु क्रियास्वाहूयमानः समतसि सम्पतसि। कथं पुनर्यं प्रति समतसि? 'कपोत इव' कम्पतनः कपोतः, कुत्सितपतनः, स यथा 'गर्भधि' गर्भधार्नीं कपोतिकाम्, अण्डाश्रयं वा नीडं प्रति पुनः पुनः पतति, एवं यं प्रति नित्यकालमेव सम्पतसि त्वम्, स एवायमभिषुतः सोमः, एभिर्ऋत्विग्भिः। अथ किमस्माभिः करिष्यसि? मोचय अस्मान्। किंवा 'वचः' एवेदं नः स्तुतिलक्षणं 'नोहसे' न वितर्कयसि रोरुयमाणानाम्? केनाप्यभिप्रायेण वयमेतद् ब्रूमः,—कैर्वा युष्मद्गुणैर्न युक्तमेतदिति,

यतो न मोचयस्यस्मानतो यूपात्। श्रुत्वैतदवबुद्धयार्थमार्त्ततामस्माकमवधार्य्य कारुण्यान्मोचयामास। किं तेऽस्माभिरयमेव तेऽस्मत्तः प्रति विशिष्टतरः सोमोऽभिषुत इत्यभिप्रायः ॥

"इवोऽपि दृश्यते"। कदाचिदनर्थकः—इति वाक्यशेषः ॥५॥

किमुदाहरणम्?—

सु विदुरिव सु विज्ञायेते इवाथापि नेत्येष इदित्येतेन सं प्रयुज्यते परिभये। हविर्भिरेके स्वरितः सचन्ते सुन्वन्त एके सवनेषु सोमान्। शचीर्मदन्त उत दक्षिणाभिर्नेज्जिह्मायन्त्यो नरकम्पतामेति। नरकं न्यरकं नीचैर्गमनं नास्मिन्नमणं स्थानमल्पमप्यस्तीति वाथापि न चेत्येष इदित्येतेन सम्प्रयुज्यतेऽनुपृष्टे न चेत् सुरां पिबन्तीति सुरा सुनोतेरेवमुच्चावचेष्वर्थेषु निपतन्ति त उपेक्षितव्याः ॥ ६ ॥

इति प्रथमाध्यायस्य तृतीयः पादः ॥ २, ३ ॥

"सु विदुरिव, सु विज्ञायेते इव"—इत्येते उदाहरणे। सुष्ठु विदुर्यंं ब्राह्मण इति, इवोऽनर्थक एव वाक्यपूरणः। सुष्ठु विज्ञायेते यज्ञो नक्षत्रं ब्राह्मणैरिति, अत्रापीवोऽनर्थक एव ॥

व्याख्याताः पदपूरणाः, निपातसमाहारमधुना दर्शयति, तदधिकारार्थोऽयम् "अथ" शब्दः। इति सम्भावने। अथायमेव इदिति केवलः प्रयुज्यमानः पदपूरणो भवति। अपिचायमेव "न-इत्येतेन" "सं" युक्तः, "प्रयुज्यते परिभये" अर्थे। सर्वतो

भयं परिभयम्। कथ प्रयोग ? "नेज्जिम्हायन्त्यो नरक पतामेति।" मृग्य शेप ॥

केचित्त्वेत इतशेपमत्रार्थायन्ते,—"हविर्भिरेके स्वरित सचन्ते सुन्वन्त एके सवनेषु सोमान्। शचीर्मदन्त उत दक्षिणाभिर्नेज्जिह्मायन्त्यो नरक पताम" इति ॥

नारदेन किल विप्रलभ्यमाना असुरपत्न्यो भर्तॄन् प्रति तमनेन मन्त्रेण प्रत्यूचु । 'एके' तावत् 'इत' लोकात् 'हविर्भि' पुरोडाशादिभिर्निमित्तभूतै 'स्व' 'सचन्ते' स्वर्गं लोक प्राप्नुवन्ति स्म। अथ 'एके' 'सवनेषु' यज्ञेषु सोमान् सुन्वन्त अभिषुण्वन्त, तेन कर्मणेत्यर्थ । 'शचीर्मदन्त , अन्ये शच्या वाचा स्तुतिभिरेके देवान् मादयन्त सन्तर्पयन्त इत्यर्थ । अप्यन्ये 'दक्षिणाभि' स्व सचन्ते इत्येतदेवानुवर्तते। तत्रैव सति, तेन तेनाभ्युदयतेषु प्राणिषु श्रेय प्रति यदि वयमेतानपि भर्तॄन् सम्यक् परिचरेम। अन्येषा जप होमादीना कर्मणामसम्भवे सति। "न इत्" वयमेतेषामप्युप "जिह्मायन्त्यो" जिह्ममाचरन्त्यो भगवन् "नरक पताम",—न ह्यन्यो भर्तृपरिचर्य्यात स्त्रिया कश्चनधर्मोऽस्तीत्यभिप्राय ॥

नरकशब्द निर्व्रवीति,—नीचैरस्मिन्नर्य्यते गम्यत इति नरकम थवा नास्त्यस्मिन् रमण रतिकर स्थानमल्पमप्यस्तीति नरकम्। अथाप्ययमपरो निपातसमाहारो नचेत्येष इदित्येतेनैव सम्प्रयुक्त प्रयुज्यते। केनचिदनुपृष्टे सति प्रतिवचन भवति। तद् यथा कश्चित् कञ्चित् पृच्छति,—'तिष्ठन्ति' वृषला ? इति। तत प्रत्याचष्टे,—'तिष्ठन्ति' इति। ततो 'यदि तिष्ठन्ति, किमर्थं

नागच्छन्ति ?' इति पुनरनुपृष्टे ब्रवीति,—'न चेत् सुरां पिवन्त्यागमिष्यन्ति' इति, यदि सुरां न पिवन्तीत्यर्थः ॥

अथ "सुरा" कस्मात् ? "सुनोते.",—सा ह्यभिषूयते अनेकैर्द्रव्यैः पिष्टादिभि ।

"एवमुच्चावचेष्वर्थेषु निपतन्ति त उपेक्षितव्या." । एवमनेन प्रकारेण उच्चावचेष्वर्थेषु बहुप्रकारेषु समाहृताश्चान्येऽप्येवं बहुप्रकारा निपतन्ति । प्रयुज्यमानास्ते लक्षणशास्त्रमेतच्चार्थनिर्वचनशास्त्रमुपेत्योपगम्य अनुप्रवेश्य, ईक्षितव्या,—क कस्मिन्नर्थे वर्त्तते ? इत्येवं द्रष्टव्या परीक्ष्या इत्यर्थः ॥ ६ ॥

इति निरुक्तवृत्तौ षष्ठाध्यायस्य तृतीयः पादः ॥ ६, ३ ॥

चतुर्थः पादः ॥

इतीमानि चत्वारि पदजातान्यनुक्रान्तानि नामाख्याते चोपसर्गनिपाताश्च तत्र नामान्याख्यातजानीति शाकटायनो नैरुक्तसमयश्च न सर्वाणीति गार्ग्यो वैयाकरणानां चैके तद्यत्र स्वरसंस्कारौ समर्थौ प्रादेशिकेन गुणेनान्वितौ स्यातां संविज्ञातानि तानि यथा गौरश्वः पुरुषो हस्तीत्यथ चेत् सर्वाण्याख्यातजानि नामानि स्युर्यः कश्च तत्कर्म कुर्यात्

सर्वं तत् सत्त्वं तथाऽऽचक्षीरन् यः कश्चाध्वानमश्नुवीताश्वः स वचनीयः स्यात् यत् किञ्चित् तृन्द्यात् तृणं तद्यापि चेत् सर्वाण्याख्यातजानि नामानि स्युर्यावद्भिर्भावैः सम्प्रयुज्येत तावद्भ्यो नामधेयप्रतिलम्भः स्यात् तत्रैवं स्थूणा दरशया वा सञ्जनी च स्यात् ॥ १ ॥

"इति"—करणोऽधिकारपरिसमाप्त्यर्थः। "इमानि चत्वारि पदजातान्यनुक्रान्तानि, नामाख्याते चोपसर्गनिपाताश्च" इति। प्रतिज्ञाभ्यासो निगम इत्यर्थः। इतीमानि, चत्वारि पदजातानीति व्याख्याय अनुक्रान्तानि,—पूर्वमाख्यातम्, ततो नामानि, ततः उपसर्गाः, ततो निपाता इत्येवमानुपूर्व्येण क्रान्तानि वर्णितानि। व्याख्ययेति वाक्यशेषः। कतमानि पुनस्तानि? नामाख्याते चोपसर्गनिपाताश्च—इति। तदपि व्याख्यातमेव॥ यच्च तदुक्तं,—'अतः किञ्चिदवशिष्यते, तच्चतुर्थेन पादेन वर्णयिष्यामः'—इति (१ अ० १ पा० ४ ख०), तदिदमेवावसरप्राप्तं पदचतुष्टयलक्षणानन्तरमारभ्यते,—"तत्र नामान्याख्यातजानीति शाकटायनो नैरुक्तसमयश्च"। तत्र तस्मिन्नेव पादचतुष्टये यानि नामानि तानि सर्वाण्येवाविशेषेणाख्यातजानीत्येवं शाकटायन आचार्यो मन्यत इति वाक्यशेषः। नैरुक्तानां चैव समयः सिद्धान्तः सर्वेषामविशेषेण गार्ग्यवर्ज्जम्॥

आह—कः पुनरन्यथा मन्यते, येनैवमुच्यते,—शाकटायनो मन्यत इति? उच्यते,—"न सर्वाणीति गार्ग्यः" मन्यते। कि

गार्ग्य एव ब्रवीति ? नेत्युच्यते,—"वैयाकरणानां चैके"—व्याकरणमधीयन्ते ये, ते वैयाकरणाः, तेषां चैके न सर्वाण्याख्यातजानि नामानीत्येव ब्रुवत इति वाक्यशेषः ॥

'तद्यत्र स्वरसंस्कारौ समर्थौ प्रादेशिकेन गुणेनान्वितौ स्यातां संविज्ञातानि तानि"—इति । तदेतत् प्रपञ्च्यते गार्ग्यपक्षेण । यान्याख्यातजानि नामानि, यानि यावन्ति, एत पर्य्युपयुक्तस्त च्छन्द । इह त्रिधा व्यवस्था नाम्नाम् । तद्यथा,—प्रत्यक्षक्रियाणि, प्रकल्पक्रियाणि, अविद्यमानक्रियाणि । तत्र, प्रत्यक्षक्रियाणि,—कारको हारक इति । प्रकल्पक्रियाणि, तद्यथा,—गौरश्व इति । अविद्यमानक्रियाणि, तद्यथा,—डित्थो डवित्थ, अरविन्दोऽर्वाङ् चन्द्र इति । तत्रैव सति यत्र येष्वित्यर्थ । केषु नामसु स्वरसंस्कारौ, स्वरश्चोदात्तादि, संस्कारश्च प्रकृतिप्रत्ययादि, तौ स्वरसंस्कारौ । समर्थौ, समर्थता नामोपपत्तिरुच्यते, सङ्गतार्थौ, लक्षणशास्त्रविहितयोपपत्त्या युक्तावित्यर्थ । यथैव लक्षणाविप्रतिपत्त्या स्वरोऽवस्थित, एवं संस्कारोऽपि । येष्वपि च प्रादेशिकेन, प्रदिश्यते द्रव्यमनयेति प्रदेशः क्रिया, या तस्मिन् द्रव्ये अवस्थिता यद्धेतुकस्तस्य नामधेयप्रतिलम्भोऽभिप्रेत, तस्या प्रदेशाख्याया क्रियाया अभिधायको धातु स गुण इत्युच्यते । अन्यत्र हि गुणशब्दो प्रधाने वर्त्तते । शेष, अङ्ग, गुण इति समानार्था । प्रधानन्तु तत्र क्रियाप्रदेशाख्या, तदभिधायको धातु गुणाख्य, स प्रदेशवाचकत्वात् प्रादेशिको गुण इत्युच्यते । तेन धातुरूपेणान्वितावनुगतौ स्वरसंस्कारौ स्यातां भवेताम् ।

येषामाह, किन्तेषामिति ? उच्यते,—संविज्ञातानि तानि। सम्यं विज्ञातानि ऐकमत्येन विज्ञातानीत्यर्थः। तेषु तावद्विप्रतिपत्तिरेवास्माकमाख्यातजानि नामानीति। तद्यथा,—कर्त्ता, कारकः, पक्ता, पाचक इति। न पुनर्यथा गौरश्वः पुरुषो हस्तीति। किङ्कारणम्? एतेषु प्रकल्पन्ते क्रियाः, न साक्षादुपलभ्यन्ते। अपि चैतेषु कल्पयितुमपि तावच्छक्यन्ते। तदित्थादिषु पुनः कल्पयितुमपि शक्यन्ते। तस्मान्न सर्वाण्याख्यातजानि नामानीति। तत्र यदुक्तं 'सर्वाण्याख्यातजानि नामानि' इति तदयुक्तम्। रूढिशब्दे च क्रियाः केवलं शब्दव्युत्पत्तिकर्मण्युपलक्षणभूता निमित्तभावेनोपादीयन्ते, न वस्तुतोऽर्थक्रियास्वनुसहायभावं प्रति। तत्र शब्दस्य प्रच्युतानुपलक्षितेऽनुप्रवृत्ते ऽभिधाने निर्वृत्तायां क्रियायामुपरतसाधनव्यापारं निरूप्य क्रियायामभिधानं वस्तुमात्रस्य प्रतिनिर्देशकं रूढिरित्यभिधीयते॥

अपरे व्याख्यातारः। "तद्यत्र स्वरसंस्कारौ समर्थौ प्रादेशिकेन गुणेनान्वितौ स्याताम्"। यत्र यस्मिन्नाम्नि स्वरसंस्कारौ, समर्थौ अष्टाध्यायीलक्षणोपपत्त्या युक्तौ, प्रादेशाभिधायिना च धात्वाख्येन प्रादेशिकेन गुणेनान्वितौ अनुगतौ, स्यातां व्याप्यवत्कार्मनामिकसंयुक्तेन संस्कारेण। तद्यथा,—कर्त्ता, कारकः, पक्ता, पाचक इत्येवमादि। तदाख्यातजं गुणकृतमिति प्रतीम इति वाक्यशेषः। येषु पुनरष्टाध्यायीलक्षणपराङ्मुखौ स्वरसंस्कारावनुगतौ, न च व्याप्यकार्मनामिकसंस्कारयुक्तेन प्रदेशाख्येन धातुरूपेण। किं तेषामिति? उच्यते,—"संविज्ञा-

नानि तानि" । संविज्ञानपदमितीह शास्त्रे रूढिशब्दस्येयं सञ्ज्ञा । वक्ष्यति हि, अग्निरिन्द्र इत्येवमादीनां संविज्ञानपदत्वम्—"यत्तु सविज्ञानभूतं स्यात्" इति । तथा वृत्रहा पुरन्दर इत्येवमादीनां गुणपदत्वम् । स एवमिहापि विभागो द्रष्टव्यः । तत्र गुणपदानि कारकपाचकादीनि । सविज्ञानपदानि तानि "यथा,—गौरश्वः पुरुषो हस्ती" इत्येवमादीनि,—न ह्येषां गवादीनाम् अष्टाध्याय्यां व्युत्पत्तिलक्षणमस्ति, तस्माद्रूढिशब्दा एवैत इति ॥

अन्ये तु प्रदेशो व्याकरणमिति व्याचक्षते । तत्र हि शब्दानां लक्षणानि प्रदिश्यन्ते । तत् कुतः ? क्वचिल्लक्षणानुग्रहः लक्षणावयवो वा गुण इत्युच्यते,—प्रसिद्धो हि गुणशब्दोऽनुग्रहेऽवयवे च । तद्यथा,—'गुणे ममायं वर्त्तते' इत्युक्तेऽनुग्रहे वर्त्तत इति गम्यते, अवयवेऽपि,—'द्विगुणा रज्जुः', 'त्रिगुणा' इति चोक्ते द्व्यवयवा त्र्यवयवेति गम्यते । शेषं समानमेव पूर्वाभ्यामर्थाभ्याम् ॥

अथवा सविज्ञानानि तानि, सविज्ञातानि तानि चेत्युभावपि पाठौ । तस्मादुभयथाऽपि व्याख्यातम्,—तत्र प्रदेश इति । केचिदङ्गभूता क्रिया गुण इति व्याचक्षते ॥

किं चान्यत् ? "अथ चेत् सर्वाण्याख्यातजानि नामानि स्युः" । तथाप्ययमपरो दोषः प्रसज्येत । आह, कतम इति "यः कश्च तत् कर्म कुर्यात् सर्वं तत्सत्त्वं तथाचक्षीरन्, यः कश्चाध्वानमश्नुवीत, अश्वः स वचनीयः स्यात्, यत् किञ्चित् तृन्द्यात् तृणं तत्"—इति । यः कश्चाविशेषेण प्राणी तत् कर्म

कुर्य्यात्, यत् किञ्चिदनेकप्राण्याश्रयमेकवदभिप्रेत्योच्यते,— तत्कर्म कुर्य्यादिति ? सर्वमेव तं प्राणिनं तेनैवैकेन नाम्ना आचक्षीरन्। तद्यथा। यः कश्चाध्वानमविशेषेणानश्वोऽप्यश्नुवीत, अश्व इत्येवं स वचनीयः स्यात्। कस्मादश्वः अश्नुवन्नश्व इत्युच्यते, अन्योऽश्नुवन्नपि नोच्यते ? इति विशेषहेतुर्नास्तीति। तस्मादश्वोऽपि नैवाशनक्रियायोगमभिप्रायेणाश्व इत्युच्यते, किन्तर्हि ? शब्दव्यवहार एवायमर्थप्रत्यायनार्थः ईदृशः क्रियानिरपेक्षः। एवमेव, यत् किञ्चित् तृन्द्यादविशेषेण तत्सर्वं तर्द्दनक्रियायोगात् तृणमित्येवमुच्यते। तस्मान्न सर्वाण्याख्यातजानि नामानीति॥

किञ्चान्यत् ? "अथापि चेत्" अथापि यदि "सर्वाण्याख्यातजानि नामानि स्युः"। तथाप्ययमपरो दोषः स्यात्। आह, कतमः ? उच्यते,—"यावद्भिर्भावैः सम्प्रयुज्येत तावद्भ्यो नामधेयप्रतिलम्भः स्यात् तत्रैवम्"। तद्यथा,—स्थूणा दरशया वा सञ्जनी च स्यात्", क्रियाहेतुके हि नामधेयप्रतिलम्भे सति यावद्भिर्भावैर्यावतीभिः क्रियाभिरेकं द्रव्यं संयुज्येत, तावद्भ्यो भावेभ्यः क्रियाभ्यो नामधेयप्रतिलम्भः स्यात्। किं कारणम् ? न हि तत्र कासाञ्चिद्व्यावर्त्तको विशेषहेतुरस्ति, अन्यासां वा नियामकः। तत्रैवं सति स्थूणा एकैव सति दरे शेते इति दरशया इत्युच्येत, न चोच्यते। तथा च सज्यतेऽस्यां वंश इति सञ्जनीत्युच्येत न चोच्येत। एवमनेकानि सत्यपि एकक्रियायोगादेकनामानि स्युः, एकं वानेकक्रियायोगादनेकनाम, उभय-

थापि च व्यवहारप्रसिद्धिः। तस्माच्च सर्वाण्याख्यातजानि नामानि स्युः ॥ १ ॥

अथापि य एषां न्यायवान् कार्मनामिकः संस्कारो यथा चापि प्रतीतार्थानि स्युस्तथैनान्याचक्षीरन् पुरुषं पुरिशय इत्याचक्षीरन्नष्टेत्यश्वन्तर्दनमिति तृणमथापि निष्पन्नेऽभिव्याहारेऽभिविचारयन्ति प्रथनात् पृथिवीत्याहुः क एनामप्रथयिष्यत् किमाधारश्चेत्यथानन्वितेऽर्थेऽप्रादेशिके विकारे पदेभ्यः पदेतरार्द्धान् सञ्चस्कार शाकटायन एतेः कारितञ्च यकारादिञ्चान्तकरणमस्तेः शुद्धञ्च सकारादिञ्चाथापि सत्त्वपूर्वो भाव इत्याहुरपरस्माद्भावात् पूर्वस्य प्रदेशो नोपपद्यत इति तदेतन्नोपपद्यते ॥ २ ॥

आह,—किमिति ? उच्यते,—"य एषां न्यायवान् कार्मनामिकः संस्कारो यथा चापि प्रतीतार्थानि स्युस्तथैनान्याचक्षीरन्"। एषां पुरुषाश्वादिनाम्नां न्यायवान् लक्षणन्यायेन युक्तः।

आह,—कः पुनरसाविति ? उच्यते,—कार्मनामिकः संस्कारः। कर्मकृतं नाम तत् पुनः पाचकलावकादि, तस्मिन् भवः कार्मनामिकः संस्कारः। किञ्च। यथाचापि प्रतीतार्थानि स्युः, प्रतीतक्रियाणि स्युः तथैव नान्यान्याचक्षीरन् जनाः ॥

आह,—कथं पुनराख्यायमानान्येतानि न्यायवता कार्मनामिकानि संस्कारेणोपेतानि स्युः, कथं वा प्रतीतक्रियाणीति? उच्यते,—"पुरुषं" तावत् पुरि शय इत्याचक्षीरन्"। पुरि ह्यसौ शेते पुरिशय इति प्राप्नोति। एवमसौ न्यायवता कार्मनामिकसंस्कारयुक्तेन शब्देनोक्तः स्यात्। एवं चैव प्रतीतक्रियः शब्दो भवति। एवमेव "अष्टा इत्यश्वम्" आचक्षीरन्,—अश्नोति हि असौ इति अष्टा प्राप्नोति। एवमेव तृन्त्ते तमिति "तर्दनमिति तृणम्" आचक्षीरन्। न चैवमाचक्षते। न चासति कारणे विद्यमाना क्रिया परोक्षीकर्त्तुं न्याय्या, तस्मात् न सर्वाणि आख्यातजानि नामानीति॥

"अथापि" इदमपरमप्राप्तं कुर्वन्ति, ते शाकटायनादयः। किम्? "निष्पन्नेऽभिव्याहारेऽभिविचारयन्ति, प्रथनात् पृथिवीत्याहुः, क एनामप्रथयिष्यत्"—इति। निष्पन्ने, कस्मिन्? अभिव्याहरणमभिव्याहारः, तस्मिन्नभिव्याहारे, ततः पश्चादाभिमुख्येन स्थित्वा तस्याभिधानस्य, ततो विचारयन्ति।

कतमस्य धातोरिदं रूपमिति? आह,—प्रथनात्पृथिवीत्याहुः ते शाकटायनादयः।

आह,—ततः किमिति? उच्यते,—तत्र वयं पृच्छामस्तावत्, यदीयं स्वभावत एव पृथिवी नाम अभविष्यत्, ततः क एनाम्पृथिवीं सतीमप्रथयिष्यत्? कोऽस्याः प्रथनमकरिष्यदित्यभिप्रायः॥

अथापि कश्चिदस्याः अपृथिव्याः सत्याः प्रथनकर्त्तारमुपगम्येत, ततोऽपि स वयमिदमपरं पृच्छामः,—"किमाधारश्च इति"।

चशब्द समुच्चयार्थ,—सर्वस्य हि प्राणिजातस्येयमेवाधार प्रतिष्ठा, अथ पुनर्यदेयममथितासीत्, तदा योऽस्या प्रथयिता स किमाधार आसीत्?—न ह्यनाधारेणाप्रतिष्ठितेनशक्येय प्रथयितुम्, स चाधारो नास्तीति प्रथनक्रियाभाव प्रथनक्रियाभावे च सति क्रियाजान्येवमादीनि नामानीत्येतदयुक्तम्। तस्मान्न सर्वाण्याख्यातजानि नामानीति॥

"अथ" अपि इदमपरमप्रात शाकटायन कृतवान्।

आह,—किमिति? उच्यते,—"अनन्वितेऽर्थे"इत्येवमादिदोष।

आह – वेदाङ्गानामेकैकमनेकप्रभेदम्। तद्यथा,—निरुक्तं चतुर्दशप्रभेदम्। व्याकरणमष्टप्रभेदम्। तत्र, केषाञ्चिन्नैरुक्तानां कैश्चिद्वैयाकरणैः साकं केषुचिच्छन्देष्वैकमत्यं केषाञ्चिद्वैमत्यम्। तत्र, शाकटायनो नैरुक्ताश्च गार्ग्यवर्जं कानिचिदभिधानान्यनेकैर्धातुभिरनुविदधति, कानिचिदेकेनैव। किं कारणम्? प्रतिनियतो हि स्वेषु स्वेषु व्याकरणेषु शब्दानुविधानसमय। तद्यथा,—पाणिनाया भू इति प्रकृतिमुपादाय लडित्येतं प्रत्ययमुपाददते। तत कृत्वा सानुबन्धलोपस्य तस्य स्थाने तिबादीनादिशन्ति, तथाहि ते ट शब्दमनुविधातु शक्नुवन्ति। स हि तेषा शब्दानुविधानोपाय पाणिनिना परिकॢप्त। सैषा शब्दानुविधाने तन्त्रशीलीत्येतदेवैक प्रयोजनमुक्त्वा नान्यत् प्रयोजनमस्ति लडादीना मध्ययने लोपे च। अपरे पुनर्वैयाकरणा लटमकृत्वैव तिबादीनेवोपाददते। तेषामपि हि शब्दानुविधाने सा तन्त्रशीली। एव प्रतिनियतया स्वया स्वया तन्त्रशील्या भवतीत्येवमादि समानमेव

शब्दरूप साधयन्ति। तत्रैव शब्दानुविधानोपायविप्रतिपत्ती सत्या शाकटायन आचार्य्योऽनेकैश्च धातुभिरेकमभिधानमनुविहितवान्, एकेन चैकमेव। तत्र यदनेकैरनुविहितवान्, तदितरैर्गार्ग्य-पाणिन्यादिभिर्न सृश्यते। किं कारणम्? अप्रसिद्धो हि स तेषा शब्दानुविधानमार्गे। धातुसमुदायमात्रमेव नामेति। अतस्ते शाकटायनमाचिक्षिप्सन्त आहु—"अथानन्वितेऽर्थे" इति। अनन्वितेऽर्थे अननुगते शब्देनार्थे, यत्र संस्कार्य्यमाणोऽपि शब्दोऽ र्थमनुगन्तुं न शक्नोति। एवं धातुश्च असमर्थो भवति।

"अप्रादेशिके विकारे" च। यथा हि क्रियया तद्द्रव्यं प्रदिश्यते, तदभिप्रायको यो धातु, स तदभिधान विगृह्यमाण विकर्तुं न शक्नोति यत्र।

तत्र हीयमानप्रतिज्ञ शाकटायन सर्वाण्याख्यातजानि नामान्युपपादयिष्यन्नसम्भवे सति काशकुशावलम्बनमिव कुर्वन् किमकरोदिति? "पदेभ्य पदेतरार्द्धान् सञ्चस्कार शाकटायन"। पदेभ्य आख्यातपदेभ्य समस्तेभ्योऽवयवानुपादाय पदेतरार्द्धान् अन्यान् अन्याश्च इतरेतरान्यान् पदावयवैरन्यैश्चान्यैश्चान्यदर्द्धं नाम संस्कृतवान्॥

तद्यथा,—'सत्यम्'—इत्येतदभिधानं सञ्चस्कार। कथम्? "एतौ कारितं च यकारादिं चान्तकरणमस्ते शुद्धं च सकारादिं"। एते 'इण् गतौ (अ० प०)'—इत्यस्य कारितं ण्यन्तं कर्तृ कृत्वा ततो यकारमन्तमादाय यकारान्त कृत्वा सत्यशब्दस्यान्तमर्द्धं सञ्चस्कार, ततो 'यम्'—इति भवति। अस्ते शुद्धस्य। 'अस्

मुवि (अ० प०)'—इत्येतस्य शुद्धमेव रूपं कृत्वा तकारान्तमित्यर्थः। ततः सकारादिशब्दरूपं गृहीत्वा 'सत्'—इत्येतत्, 'सत्यम्'—इत्येतस्य शब्दस्य आदिमकरोदाद्यमर्थं सञ्चस्कार, तत्सदिति भवति। अत्र योऽयमस्तेस्तकारः, स यकारमधिरोहति। एवमेतदेकमभिधानं द्वयोर्धात्वोः सञ्चस्कार सत्यमिति भवति॥

अथ कोऽर्थः? सन्तमर्थं मापयति प्रत्यापयति गमयतीति सत्यम्। कारितं च यकारादिश्च शुद्धञ्च सकारादिश्चेति इतरस्य चेतरं चार्द्धमिति समुच्चयार्थाश्चकाराः एवं पदेभ्यः पदेतरार्द्धान् सञ्चस्कार शाकटायनः, तदेतदन्याय्यं कृतवान्,—को हि नाम पदं विभज्यानेकधातुजं कुर्यात् तदेतदकृतपूर्वमन्यैर्विद्वद्भिः शाकटायनोऽतिपाण्डित्याभिमानादकरोत्,—यदभिनत् पदानि॥

अपि चोपजायते नः शङ्का, यथासौ प्रवृत्तो नासौ पदेषु स्थास्यति, अपि चासौ वर्णानपि भेत्स्यति, अनेकार्थांश्च कल्पयिष्यति। यो हि पदान्यभिनत्, तस्य वर्णभेदे विशेषहेतुः को भविष्यति? तस्मादतिप्रसङ्गदोषोपपत्त्या नानेकधातुजानि नामानि, नापि सर्वाण्याख्यातजानि नामानीति॥

"अथापि" अयमपरो दोषः प्रसज्येत। कतमः? "सत्त्वपूर्वो भाव इत्याहुः" अभियुक्तास्तद्विदः। कथं पूर्वमसात्त्वोऽयं सत्त्वपूर्वः। किं कारणम्? सत्त्वाश्रय एव हासौ। तत्रैव सति "अपरस्माद्भावात्" अपरकालीनेन भावेन क्रियया "पूर्वस्य"

पूर्वोत्पन्नस्य "प्रदेशः" प्रदेशनं सञ्ज्ञा प्रतिलम्भो "नोपपद्यते"। किं कारणम्? उत्पत्तिसहभूता हि सा, स्वेनाभिधानेन क्रिया-निरपेक्षेणाभिसम्बद्धमेव द्रव्यमुत्पद्यते,—नित्यसम्बद्धौ हि शब्दार्थौ। "इति तद्देतत्" सर्वथा सर्वाण्याख्यातजानि नामानीति शाकटायनमतं "नोपपद्यते"। तदनुपपत्तावस्मत्पक्षसिद्धिः,—कानिचिदाख्यातजानि नामानि, कानिचिदनाख्यातजानीति। अथ शक्यते प्रत्यवस्थातुं प्रत्यवस्थीयतामिति परिसमाप्तो गार्ग्यपक्षः॥ २॥

शाकटायनपक्षेणेदानीमेतान् दोषान् प्रतिसमाधास्यामस्तदर्थमिदमारभ्यते,—

यथो हि नु वा एतत्तद्यत्र स्वरसंस्कारौ समर्थौ प्रादेशिकेन गुणेनान्वितौ स्यातां सर्वं प्रादेशिकमित्येवं सत्यनुपालम्भ एष भवति यथो एतद्यः कश्च तत्कर्म कुर्यात् सर्वं तत्सत्त्वं तथाचक्षीरन्निति पश्यामः समानकर्मणां नामधेयप्रतिलम्भमेकेषां नैकेषां यथा तक्षा परिव्राजको जीवनो भूमिज इत्येतेनैवोत्तरः प्रत्युक्तो यथो एतद्यथा चापि प्रतीतार्थानि स्यु स्तथैनान्याचक्षीरन्निति सन्त्यल्पप्रयोगाः कृतोऽप्यैकपदिका यथा व्रततिर्दमूनाजाट्य आट्णारो जागरूको दर्विहोमीति यथो एतन्निष्पन्नेऽभिव्याहारेऽभिवि-

चारयन्तीति भवति हि निष्पन्नेऽभिव्याहारे योगपरीष्टिः प्रथनात् पृथिवीत्याहुः क एनामप्रथयिष्यत् किमाधारश्चेत्यथ च दर्शनेन पृथुरप्रथिता चेदप्यन्यैः ॥ ३ ॥

"यथो हि नु वा एतत्" इति। यथेति वाक्योपादाने, यथा येन प्रकारेण। उकारोऽवधारणार्थः। व्याख्यातमेतत्,—"अथाप्युकार एतस्मिन्नेवार्थे"। इतरेण येनैव प्रकारेण प्रसिद्धमाचार्येणाख्यातजत्वं प्रतिषिद्धं नाम्न, तेनैव प्रकारेण प्रत्यनुभाष्यामीति। हि—इत्यसूयायाम्। कथं हि व्याकरिष्यतीति। नु—इत्येष हेत्वपदेशे। वै—इत्यय यथोक्तपूर्वं पक्षोपदेशार्थः। येनैव प्रकारेणासमर्था हेतव उक्ता, तेनैव प्रकारेण प्रत्यनुभाष्य प्रतिपक्षधर्मेण समाकरिष्याम ॥

यथैतदुक्तं किमिति? "तद्यत्र स्वरसंस्कारौ समर्थौ प्रादेशिकेन गुणेनान्वितौ स्याताम्" इति। आह तत्र किमिति? उच्यते,—तदेतत् प्रत्युच्यत इत्युपप्रयुक्तस्तच्छब्द ॥

आह,—केन पुन प्रकारेण प्रत्युच्यत इति? उच्यते—"सर्वं प्रादेशिकमित्येव सत्यनुपालम्भ एव भवति"। सर्वमेव प्रादेशिकं सर्वमेव नियाज नाम। आह,—तत किम्? इत्येव सत्यनुपालम्भ एव भवति। आह, कथम्? शृणु प्रदेशवाचिन आख्यातानुनुप्रेक्ष्य तदाश्रयौ स्वरसंस्कारौ याव दुगम्यमनुविधेयौ,—विम्वी हि लक्षणगतिर्नैव शब्दापराधो नास्माकम्। भवत इवायमपराधो मन्दशिक्षितत्वात्,— येना

तुविधातुं स्वरसंस्कारौ विद्यमानावपि प्रदेशवाचिनि धातौ न शक्नोषि, स त्वं तावत् पुनः पुनः शिक्षस्वान्यद्व्याकरणं यावच्छक्तिस्तवानुविधातुमिति। व्याकरणेऽप्यप्रधानिन्ने लक्षणैरेकदेशो विक्षिप्तः। कश्चित् सौत्रो धातुः, कश्चित् तुशब्दचशब्दवाशब्दातिरिक्ताध्याहारविभागादिगम्यः। तद् यथा। मतान्तरेष्वप्यभिन्नेषु कश्चिन् क्वचिद्विविरुच्यते। ते च सर्व एव प्रयोगमिच्छता प्रयोगकाल उपसंहर्त्तव्याः। एवमिहापि सर्वाण्येव लक्षणशास्त्राण्यपेक्ष्याणि अखिलस्वरसंस्कारसिद्धये। —इति स त्वं तावत् शिक्षस्वानिर्घिणः, यावदखिलशब्दाना स्वरसंस्कारावनुविधातुमुपजातं सामर्थ्यमिति॥

"यथो एतत्" यत् पुनरेतदुक्तम्,—"यः कश्च तत् कर्म कुर्यात्, सर्वं तत् सत्त्वं तथाऽऽचक्षीरन्निति"। अनेकेषामेकक्रियायोगादेकनामता प्रसज्येतेति॥

अत्र ब्रूमः,—न हि प्रसज्यते। त्वमपि पश्यसि, वयमपि च "पश्यामः समानकर्मणा" तुल्यकर्मणां अपि सतां कर्मरतां "नामधेयप्रतिलम्भमेकेषां नैकेषां यथा तक्षा परिव्राजको जीवनो भूमिज इति।" तक्षन् कश्चिन् तक्षेत्युच्यते। अन्यः तक्षन्नपि न तक्षेन्युच्यते, आह,—कोऽत्र हेतुरिति? शृणु—लोकमेव पृच्छ, तमेवोपालम्भस्व, न मयैव नियमः कृत इति। अथ च तद्यथा,—समानमीहमानानां कश्चिदेवार्थेन संयुज्यते, कश्चिन्न, येदादीनाम्, एकार्थेन संयुज्यत इति अन्यैरपि संयुक्तः, सत्यमेकेन चालम्धम्। स्वभावतो हि शब्दानां क्रियात्त्वेऽपि सति काश्चि

देव क्रियामङ्गीकृत्यावस्थितिर्भवतीति। अथवा क्रियातिशयतो नियमः स्यात्,—यो हि यदतिशयेन करोति, तस्यानेकक्रियावत्त्वेऽपि सति तद्धेतुक एव नामधेयप्रतिलम्भो भवति॥

अयं समाधिः,—अथवा न ब्रूमो यो यत्र यदा च तक्षति, स एव तक्षेति। किन्तर्हि? यो यदा यत्र तक्षा भवति, स एव तक्षेति। तदेतल्लक्षणमनियत, काममन्येष्वप्यस्तु कदाचित् क्वचित् तेषामप्यन्याः क्रिया नियततराः सन्ति, यद्धेतुको नामधेयप्रतिलम्भ इति? तेषां नु तक्षा नियमतः तक्षतीति विशेषः। जीवन इक्षुरसः, शाकजातिर्वा। भूमिजोऽङ्गारकः॥

"एतेनैवोत्तरः प्रत्युक्तः"। आह,—कतमः? यावद्भिर्भावैः सम्प्रयुज्येत तावद्भ्यो नामधेयप्रतिलम्भः स्यादित्येषः। पश्यामोऽनेकक्रियायुक्तानामपि एकक्रियाकारितो नामधेयप्रतिलम्भो भवति। तद्यथा,—तक्षा, परिव्राजक इत्येतान्येवोदाहरणानि। तक्षा ह्यन्यान्यपि कर्माणि करोति। न पुनस्तस्य तत्कृतो नामधेयप्रतिलम्भोऽस्ति। तत्र, यदुक्तमेकस्यानेकक्रियायोगादनेकनामता प्रसज्येतेति। एतदयुक्तम्। न हि प्रसज्येत। यदि चोक्तमनेकेषामेकनामता, एकस्य चानेकनामता प्राप्नोति,—ततश्च व्यवहाराप्रसिद्धिरिति, न हि तदुभयमस्ति। अनेकेषामेकक्रियायोगे हि सति एकस्य चानेकक्रियायोगेऽपि हि सति व्यवस्थित एव शब्दनियमः स्वभावत एव लोके। तस्मान्न व्यवहाराप्रसिद्धिदोषोऽस्ति। तत्र, यदुक्तं व्यवहाराप्रसिद्धिदोषप्रसङ्गान्न सर्वाण्याख्यातजानि नामानीति, एतदयुक्तम्॥

"यथो एतत्" यत् पुनरेतदुक्तम्—"यथा चापि प्रतीतार्थानि स्युस्तथैनान्याचक्षीरन्निति"। अत्र ब्रूमः,—शब्दस्वाभाव्यमेतत्' —यत् तथा सर्वाण्याख्यायन्ते, यथा यथा प्रतीतार्थानि भवन्ति न तत्राहमपराद्धो भवतः, नापि शास्त्रम्। यथावस्थितानां हि शब्दानामन्वाख्यानमात्रमेव क्रियते, नाहं शब्दानां कर्त्ता, य एषां प्रयोक्तारस्तानेवोपालम्भस्व, निराकुरु वा यदि शक्नोषि॥

आह,—कस्मात् पुनः कानिचिदाख्यायन्ते लोके? तदभिधाने स्वाभाव्यमेव,—कानिचित् प्रतीतार्थानि, कानिचिदप्रतीतार्थानि, तान्यपि शास्त्रेण प्रतीतार्थान्येव कर्त्तव्यानि एतदेव शास्त्रस्य शास्त्रत्वम्,—यदप्रतीतार्थान्यपि प्रकृत्यादिना प्रतीतार्थानि स्युस्तथैनान्याचक्षीरन्निति आख्यायन्त एव कानिचित्, कानिचिच्छास्त्रेण प्रतीतार्थानि क्रियन्ते। लक्ष्यनुविधायित्वाल्लक्षणस्य, गुणतस्त्वेव लक्षणम्। अपि च। "सन्ति" एव "अल्पप्रयोगाः" प्रतीतार्थक्रियाः केचित् "कृतः" कृत्प्रत्ययान्ताः शब्दाः "अपि" "एकपदिकाः" एकपदप्रकरणान्तर्वर्त्तिनस्तद्धर्माणः। तत् "यथा,—व्रततिर्दमूना जाट्य आट्णारो जागरूको दर्विहोमीति"। व्रततिर्वृणातेर्वल्ली। दमूना दममना वेश्येयमादि, अग्निरतिथिर्वा। जाट्यः जटावान्। आट्णारो अटनशीलः। जागरूको जागरणशीलः। दर्विहोमीति दर्व्या जुहोतीत्येव प्रतीतार्थान्यपि शाकटायनाभिप्रायः। तत्र यदुक्तं—'न सर्वाण्याख्यातजानि नामानीति' तद् युक्तम्॥

"यथो एतत्"—पुनरेतदुक्तम्,—"निष्पन्नेऽभिव्याहारेऽभिविचारयन्तीति"। अत्र ब्रूमः,—युक्तं ते कुर्वन्ति—"भवति

हि निष्पन्नेऽभिव्याहारे योगपरीष्टि"। योगपरीष्टिर्नाम योगस्य परीक्षणम्॥

कथञ्चानुत्पन्न सन्नभिधानयोग परीक्ष्येत। तत्र यदुक्त—"प्रथनात् पृथिवीत्याहु"। "क एनामप्रथयिष्यत् किमाधार श्चेति"। वयमेव ब्रूम,—प्रथितेय केनचिदत पृथिवीयमित्याह। कथमियमप्रथिता सती पृथिवीत्वमापेति? उच्यते,—'अथ वै दर्शनेन पृथुरप्रथिता चेदप्यन्यै'। दृश्यमाना हीय पृथिवी। तस्मात् यद्यप्यप्रथिता कैश्चिदन्यैस्तथापीय पृथुदर्शनयोगात् पृथिव्येव। तत्र, यदुक्त—क एनामप्रथयिष्यत् किमाधारश्च?' एतदयुक्तम्, अन्यथा हि धात्वर्थो नोपपद्यत एव। तत्रैव सति, यथा न विरोत्स्यते, तथा निर्वक्ष्याम। तस्मादविरुद्ध शाकटायनाभिप्राय ॥ ३ ॥

अथाप्येत सर्व एव दृष्टप्रवादा उपालभ्यन्ते यथो एतत्पदेभ्यः पदेतराद्धान् सञ्चस्कारेति योऽनन्वितेऽर्थे सञ्चस्कार स तेन गर्ह्यः सैषा पुरुषगर्हा यथो एतदपरस्माद्भावात् पूर्वस्य प्रदेशो नोपपद्यत इति पश्यामः पूर्वोत्पन्नाना सत्त्वानामपरस्माद्भावान्नामधेयप्रतिलम्भमेकेषा नैकेषां यथा बिल्वादो लम्बचूडक इति बिल्व भरणाद्वा भेदनाद्वा ॥ ४ ॥

इति प्रथमाध्यायस्य चतुर्थः पादः ॥ १, ४ ॥

"अथ"। "अपि" च, यदि दृष्टेऽप्यस्या पृथुत्वे न वयमुप लभ्यामहे। ननु "एव" सति, "सर्वं एव दृष्टप्रवादा उपालभ्यन्ते" न केवलमहमेव। योऽयं दृष्ट्वा प्रवीति, स तत्र दोष एव। तथा सति, दृष्टहान प्रसज्येत, अनिष्टञ्चैतत्। तस्मात् पृथुदर्शनात् पृथिवीत्युच्यते॥

"यथो एतत्" यत् पुनरेतदुक्तम्—"पदेभ्य पदेतरार्द्धान्सञ्स्कारेति' अत्र ब्रूम,—"योऽनन्विते" शब्देनानभिप्रेते "अर्थे" अननुगतमसम्बद्ध "सञ्स्कार, स तेन" सम्बद्धेन सस्कारेण 'गर्ह" गर्हणीय। पुनराचार्यो योऽनुगतधातुभिरनेकैरेकाभिधानगतानर्थास्तत सञ्स्कार, नैव मौढ्येन। "सैषा" तदभिप्रायापरिज्ञानात् "पुरुषगर्हा" पुरुषो हि कश्चित् अशिक्षितत्वादेकधातुजमपि न जानाति, किमुत बहुधातुजम्। अपि च सन्ति लोके तादृशा पुरुषा, ये कारकहारकादीन्यपि प्रकटक्रियाणि सन्ति, कतमेभ्यो धातुभ्य एतान्यभिनिष्पाद्यन्त इति न जानते, एष पुरुषदोषो न शास्त्रदोष,—यदनुगमयितु शब्दैरर्थो न शक्यते। तत्र,—'यदुक्तम्, अननुगत एवार्थे सञ्स्कार शाकटायन, सन्तमेव ह्यर्थमाययति गमयतीति', सत्यम्। तस्मादुपपद्यत एव शाकटायनमतम्।

अपि च, रूढिशब्दव्युत्पत्तिर्मन्त्रेष्वपि दृश्यते। यथा लक्षणा, तथा लक्ष्मा प्रवर्तितुमर्हति,—इतरथा हि कस्य तल्लक्षणं स्यात्। यत्सर्पत् तत्सर्पिरिति मन्त्र, यन्नवनीतमभवदिति मन्त्र। अपि च, ब्राह्मणेनाप्यनेकधातुजान्येव कृत्वा निरु-

च्यन्ते। तत्र मन्त्राभिधानानि यत्परिज्ञाने च फलमुपपद्यते। आह,—"तदेतत् त्र्यक्षर हृदयमिति, हृ इत्येकमक्षरमभिहरन्त्यस्मै स्वाश्चान्ये च य एवं वेद, द इत्येकमक्षर ददत्यस्मै स्वाश्चान्ये च य एवं वेद, यमित्येकमक्षरमेति स्वर्गं लोके य एवं वेद (श० ब्रा० १४, ८, ४, १)"—इति। एवं हरतेर्ददातेरेतेर्हृदयशब्द। तदर्थ फलोपदर्शनार्थ ब्राह्मणेनैव निरुक्त। तच्च न परं प्रमाणम्। तस्माच्छाकटायनस्तदनुदृश्य सम्यगेव कृतवान्,—यदनेकैर्धातुभिरेकमभिधान निरुक्तवानिति।

"अथो एतत्" यत् पुनरेतदुक्तम्,—"अपरस्माद्भावात् पूर्वस्य प्रदेशो नोपपद्यत इति पश्याम" अत्र ब्रूम,—"पूर्वोत्पन्नाना सत्त्वानामपरस्माद् भावान्नामधेयप्रतिलम्भम्"। अपरस्मादपि सतो भावात्। "एकेषाम्? न एकेषाम्"। तत्र "यथा"—"बिल्वादो लम्बचूडक इति"। पश्चात्कालीनयापि चूडालम्बन क्रियया, भविष्यता योगेन बिल्वादनक्रियया च, पूर्वोत्पन्नस्य सत्त्वस्य नामधेयप्रतिलम्भ उपपद्यमानो दृष्ट। स चान्यत्र नोपपद्यते। तत्र यदुक्तमपरस्माद्भावात् पूर्वस्य प्रदेशो नोपपद्यते, तदेतदनेकत्वादयुक्तम्। उपपद्यत एव हि केषाञ्चिदिति॥

"बिल्व भरणाद्वा भेदनाद्वा"। भृत हि तद् भवति क्षीजा नाम्, बिभर्ति वा। दुर्भिक्षादौ भक्ष्यमाण जनम्, भेदनाद्वा भिद्यते हि तदवश्य भक्षणायेति॥

आह,—किमिदमनिमध्यिप किमपि पूर्वोत्तरपक्षसम्बद्ध नामाख्यातजत्वमधिकृत्योक्तमिति? उच्यते,—शिष्यबुद्धिवृद्ध्यर्थमेत-

दुक्तम्, कथं नाम व्युत्पन्नबुद्धिः शिष्योऽप्रतिबुध्यमानः सर्वतो-मुखानिव लौकिकवैदिकाञ्छब्दानित्र्यादिति। सर्वाण्येव हि व्याकरणानि निरुक्तानि च वेदाङ्गत्वाविशेषात् प्रमाणानि। तेषा-मेव फलमिदं साध्वित्येतदशक्यं तदुक्तमिति ॥ ४ ॥

इति निरुक्तवृत्तौ प्रथमाध्यायस्य चतुर्थः पादः ॥ ४ ॥

पञ्चमः पादः

अथापीदमन्तरेण मन्त्रेष्वर्थप्रत्ययो न विद्यतेऽर्थम-प्रतियतो नात्यन्तं स्वरसंस्कारोद्देशस्तदिदं विद्यास्थानं व्याकरणस्य कार्त्स्न्यं स्वार्थसाधकञ्च यदि मन्त्रार्थप्रत्यया-यानर्थकं भवतीति कौत्सोऽनर्थका हि मन्त्रास्तदेते नोपे-क्षितव्यं नियतवाचो युक्तयो नियतानुपूर्व्या भवन्त्यथापि ब्राह्मणेन रूपसम्पन्ना विधीयन्ते। उरु प्रथस्वेति प्रथयति। प्रोहाणीति प्रोहत्यथाप्यनुपपन्नार्था भवन्ति। ओषधे त्राय-स्वैनं स्वधिते मैनं हिंसीरित्याह हिंसन्नथापि विप्रतिषि-द्धार्था भवन्ति। एक एव रुद्रोऽवतस्थे न द्वितीयः। असंख्यातासहस्राणि ये रुद्रा अधि भूम्याम्। अशत्रुरिन्द्र

जज्ञिषे शतं सेना अजयत्साकमिन्द्र इत्यथापि जानन्तं सम्प्रेप्यत्यग्नये समिध्यमानायानुब्रूहीत्यथाप्याहादितिः सर्वमिति। अदितिर्द्यौरदितिरन्तरिक्षमिति। तदुपरिष्टाद्व्याख्यास्यामोऽथाप्यविस्पष्टार्था भवन्त्यम्यग्यादृश्मिञ्जारयायिकाणुकेत्यर्थवन्तः शब्दसामान्यादेतद्वै यज्ञस्य समृद्धं यद्रूपसमृद्धं यत् कर्म क्रियमाणमृग्यजुर्वाभिवदतीति च ब्राह्मणम् ॥ १ ॥

एवं नामाख्यातोपसर्गनिपातानां प्रविभागेनावस्थितानामेव लक्षणं परिज्ञायते—"अथापीदमन्तरेण मन्त्रेष्वर्थप्रत्ययो न विद्यते"। अथशब्दोऽधिकारार्थः। द्वितीयं शास्त्रारम्भप्रयोजनमधिकरोतीति। अपीति सम्भावने। अपि पदेषु विभागेनावस्थितेषु लोके वेदे वा, अपि मन्त्रेषु वाक्यभावेनावस्थितेषु, यः समस्तार्थस्तस्मिन् प्रत्ययो विशेषावधारणं न विद्यते, न भवतीत्यर्थः। अपीदं शास्त्रमन्तरेण पदार्थप्रत्ययो नास्ति। अपि वाक्यार्थ इत्यभिप्रायः॥

आह,—कः पुनः पदार्थवाक्यार्थयोर्विशेष इति? उच्यते,—साकाङ्क्षः पदार्थो निराकाङ्क्षो वाक्यार्थः। तद्यथा,—गौरित्युक्ते किमित्याकाङ्क्षा भवति, ततो गच्छतीत्युक्ते निराकाङ्क्षं भवति, तथा गच्छतीत्युक्ते क इति साकाङ्क्षं भवति तथा गौरित्युक्ते निराकाङ्क्षं भवति। अथेदानीं गौर्गच्छतीत्युक्ते गौर्याद-

दोहादिभ्यो व्यावृत्य गमनेऽवतिष्ठते, गमनं चान्येभ्यो व्यावृत्य गन्येवावतिष्ठते। एष वाक्यार्थः। स एष प्रकरणाविरोधी वाक्यार्थः पदार्थं नियमेन लक्षयति, पदार्थश्च पदलक्षणम्। पदार्थ-सन्नियोगेन हि व्याकरणे पदानां प्रकृतिप्रत्ययादीनि लक्षणानि व्यादिश्यन्ते॥

यत एवमतः "अर्थमप्रतियतो नात्यन्तं स्वरसंस्कारोद्देशः"। अर्थमप्रतियतोऽप्रतिपाद्यमानस्यावधृतार्थस्येत्यर्थः। "नात्यन्तम्"। नैकान्तिकेन, एकान्तं नाम निश्चयोऽनिश्चयेनेत्यर्थः। किम्? 'स्वरसंस्कारोद्देशः'। स्वरोद्देशः संस्कारोद्देशश्च, स्वरावधारणं संस्कारावधारणं नास्तीति वाक्यशेषः। किं कारणम्? न ह्यनवधृतार्थः स्वरसंस्काराववधारयितुं शक्नुयात्,—अर्थवशेन हि स्वरसंस्कारावयतिष्ठेते॥

"तदिदम्" एवं कृत्वा निरुक्तशास्त्रं "विद्यास्थानम्" एतद्-धीनत्वादर्थपरिज्ञानस्य। अर्थवशगत्वाच्च स्वरसंस्कारयोरिदं "व्याकरणस्य कार्त्स्न्यं" कृत्स्नभावं, करोतीति वाक्यशेषः। व्याकरणेन हि स्वरसंस्कारौ चिन्त्येते। तस्मादपरिसमाप्तमेव तावद् व्याकरणं यावत् निरुक्तं नाधिगतमिति,—न हि अनैरुक्तो-ऽर्थमवधारयितुमलम्,—नानवधृतार्थः स्वरसंस्कारतत्त्वं विजा-नीयादिति॥

आह,—ननु व्याकरणस्य कार्त्स्न्यमेतत् करोतीत्युक्ते तच्छे-षमेवैतत्, गुणादिवत्, ततश्च विद्यास्थानत्वमस्य विरुध्यत इति? नेत्युच्यते,—"स्वार्थसाधकञ्च"। स्वार्थाजहद्वृत्त्या (अजहत्स्वार्था-

वृत्त्या) ह्यतदनुषङ्गतो व्याकरणस्य कृत्स्नतां करोति। यथा लोके स्वार्थमपरिहाय कश्चित् परानुग्रहं करोत्येवम्। यत् पुनरेतदुक्तं गुणादिवदिति। ते हि तन्त्रान्तर्भूता एव "उणादयो बहुलम् (पा० ३, ३, १)"—इत्युक्तम्, न पुनर्निघण्टवो बहुलमिति। तस्मात् स्वतन्त्रमेवेदं विद्यास्थानमर्थनिर्वचनम्, व्याकरणन्तु लक्षण-प्रधानमिति विशेषः॥

आह,—"यदि मन्त्रार्थप्रत्ययाय" एतदारभ्यते, हन्त तदेव मर्थमारभ्यमाणम् "अनर्थकम्" एव "भवतीति"। आह,—क एवमाहेति? उच्यते,—"कौत्सः"। किं कारणम्? "अनर्थका हि मन्त्राः"। न हि मन्त्राणामर्थोऽस्ति वाच्यवाचकत्वेन। तदर्थनिर्वचनायारभ्यमाणमिदमप्यनर्थकमेव भवति। तस्मान्ना-रब्धव्यमित्येवं कौत्सो मन्यते॥ "तत्" एतदेवमुच्यमानं कौत्सम् "एतेन" अनेन नैरुक्तेन "न" "उपेक्षितव्यम्"। उपगम्य चेदं शास्त्रञ्च ईक्षितव्यम्, किमसौ सत्यमाचष्टे वृथेति वा परीक्ष्यम्। अर्थवत्त्वे मन्त्राणां यद्धेतुस्थानं वक्ष्यमाणं तदुपग-म्यार्थवत्त्वं मन्त्राणामीक्षितव्यमिति केचिदाहुः।

कया पुनरुपपत्त्या कौत्सो मन्त्राणामानर्थक्यमाहेति? उच्यते,—"नियतवाचो युक्तयो नियतानुपूर्व्या भवन्ति"—इति। नियतवाचो युक्तयः, निरुद्धवाचो युक्तयः,—अभिधाननियता हि ते भवन्ति।—"अग्न आ याहि वीतये (सा० वे० सं० १, १, १, १)"—इति मन्त्रेण पुनर्विभाषसो! आगच्छ पातायेति। नियतानुपूर्व्या नियतनिष्ठानुपूर्वी पदप्रयोगस्य। तद्यथा,—'अग्न

आयाहि' इति न पुनर्भवति 'आयाह्यग्ने' इति। इह लोकेऽर्थवतां शब्दानामनियमेन पर्य्यायवचनता दृष्टा गवादिप्रयोगे, तथा न पौर्वापर्य्यं दृष्टम्। तद्यथा,—'गोपीमिस्याज' 'अस्याज गोपीम्' 'आहर पात्रम्' 'पात्रमाहर' इति। न च तथा मन्त्रेषु। ततो ऽर्थवच्छब्दवैधर्म्यात् पश्यामोऽनर्थका मन्त्रा इति॥

अथाप्ययमपरो हेतुरानर्थक्ये मन्त्राणाम्। आह,—कतमः? इति, उच्यते,—"ब्राह्मणेन" ते "रूपसम्पन्ना." अपि सन्तो "विधीयन्ते" एव। यदि ह्येते अर्थवन्तोऽभविष्यन्, स्वेनैव लिङ्गेन स्वमात्मानमेते विनियोक्तुं समर्था इति कृत्वा न ब्राह्मणेन तेषु तेषु कर्मसु व्यधास्यन्त, विहिताश्च। तद् यथा,—"उरु प्रथस्वेति प्रथयति (श० ब्रा० १, १, ६, ८) प्रथनलिङ्गो मन्त्रो विहितः प्रथनकर्मणि, यथा च,—"उरु प्रथा उरुप्रथस्वोरु ते यज्ञपतिः प्रथताम् (य० वा० सं० १, २२)"। यजुरिदम्, पुरो-डाशं प्रत्युच्यते। पुरोडाश! त्वं विस्तीर्णप्रथन सन् विस्तार-प्रथाः, स्वात्मानं ते तव यज्ञपतिश्चार्थं यजमानः प्रजापशुहिर-ण्यादिभिश्चोरुप्रथतां विस्तीर्य्यतामिति। तथा,—"प्रोहाणीति प्रोहति"—इति ब्राह्मणं द्रोणकलशप्रोहणविधायपि। "इदमह-मात्मानं प्रोहामि"—प्राञ्चं प्रेरयामि इति प्रोहाणीति प्रोहति, प्रोहणलिङ्गो विहितः प्रोहणकर्मणि। तस्माल्लिङ्गसम्पन्नविधा-नात् पश्यामो ब्राह्मणेनानर्थकस्वरूपमेव सन्तं मन्त्र नियुक्तम्। एवं सति, मन्त्रं मन्त्रं पुनर्विदधत ब्राह्मणमर्थवत्। अनर्थका मन्त्रा.—न ह्यर्थवन्तः सन्तो दासवद्ब्राह्मणेन विधीयेरन्, विहिताश्च।

तस्मादनर्थका मन्त्रा इति पश्यामः। अपि च,—ब्राह्मणस्यानर्थक्योपगम्ये देशकालकर्तृदक्षिणादिकर्माङ्गभूतं कुत उपलभ्येत? तथाच ब्राह्मणस्यानर्थक्येऽभ्युपगम्यमाने वेदैकदेशस्य मन्त्रस्यात्यन्तमेवानर्थकत्वमभ्युपगत स्यात्,—न हि ब्राह्मणस्य विधिस्तुत्यर्थावृतेऽर्थवत्तास्ति, मन्त्राणां पुनर्वाच्यवाचकत्वेनानर्थकानामपि सतां विनियोगमात्रेणार्थवत्ता स्यात्। एतस्माच्च काममनर्थका मन्त्रा वाच्यवाचकत्वेन सन्तो विनियोगमात्रेणैवार्थवतो विधेयत्वात् विधायकत्वाच्च ब्राह्मणमर्थवदस्त्विति॥

"अथापि" अयमपरो हेतुरनर्थकत्वे मन्त्राणाम्। आह,—कतमः? इति उच्यते,—"अनुपपन्नार्थाः" हि एते "भवन्ति" य एतेष्वर्थो लभ्यते,—अयमेतेष्वर्थः स्यादिति नासावुपपद्यते। तद्यथा,—"ओषधे त्रायस्व (य० वा० सं० ४, १, ६, १५) एनम्" —इत्याह। न चौषधिरात्मानमपि त्रातुं समर्था, किं पुनर्वृक्षम् तथा,—"स्वधिते मैनं हिꣳसीः (य० वा० सं० ४, १, ६, १५) इत्याह" आत्मानमेव "हिंसन्"। को हि नाम एवमुक्त्वा स्वयमेव हिंस्यात्? हिनस्ति च। लोके यान्येवंविधानि वाक्यान्युन्मत्तप्रभृतीनां तान्यनर्थकान्युच्यन्ते, तथैवेमानि। तस्मादिमान्यप्यनर्थकानीत्युपपद्यते॥

"अथापि" अयमपरो हेतुरानर्थक्ये मन्त्राणाम्। आह,—कतमः? इति, उच्यते,—"विप्रतिषिद्धार्था भवन्ति" इति। अन्यस्यान्येन विरुद्धार्थेन प्रतिषेधो विप्रतिषेधः, इतरेतरव्याघात इत्यर्थः। तद्यथा,—"एक एव रुद्रोऽवतस्थे न द्वितीय."

"असङ्ख्याता सहस्राणि ये रुद्रा अधि भूम्याम् (य० वा० सं० १६, ५४)" "अशत्रुरिन्द्र जज्ञिषे (ऋ० सं० ८, ७, २१, २)" "शतं सेना अजयत् साकमिन्द्रः (ऋ० सं ८, ५, २२, १)—इति"। एतान्युदाहरणानि। "एक एव रुद्रोऽवतस्थे न द्वितीयो रणे निघ्नन् पृतनासु शत्रून्। संसृज्य विश्वा भुवनानि गोप्ता प्रत्यङ् जनान् सञ्चुकोचान्तकाले॥" 'एक एवावतस्थे रुद्रः' स्थितवान्, 'रणे' रणाय रणार्थम्, 'न' अन्यो 'द्वितीयः' कश्चिदस्ति। इति रुद्रबहुत्वप्रतिषेधः। कथमवतस्थे? 'नि' निश्चयेन 'घ्नन्' 'पृतनासु' स्पर्द्धनीयेषु संग्रामेषु 'शत्रून्'। किञ्च, स एकः 'संसृज्य' सृष्ट्वा, 'विश्वा' विश्वानि भुवनानि 'गोप्ता' रक्षिता, सृष्ट्वा च सर्गकालानन्तरमेव पालयिता च स्थितिकाले। 'प्रत्यङ्' प्रतिलोमेन 'जनान्' 'सञ्चुकोच' सङ्कोचयति, 'अन्तकाले' प्रलयकाले। य एवं गुणयुक्तो रुद्रस्तं वयं स्तुमः। "असंख्याता०—०भूम्याम् तेषां सहस्रयोजनेऽव धन्वानि तन्मसि" (य० वा० सं० १६, ५४)। एषा शतरुद्रियेऽनुष्टुप्। अनेन चाग्निचयनेऽर्कपर्णेनाजार्क्षीरमिश्रा गवेधुकाः सक्तवो हूयन्ते उत्तरस्यां श्रोणावन्त्यायामिष्टकायाम्। प्रजापतेरार्षम्। 'असंख्याता' असंख्यातानि 'सहस्राणि' बहूनीति यावदुक्तं स्यात्, तेषाम्? 'ये रुद्राः' 'भूम्याम्' 'अधि' उपरि 'तेषां' 'सहस्रयोजने' अध्वनि अवस्थितानामेव 'अव' 'तन्मसि' तनुमः 'धन्वानि' धनूंषि। अप्राप्तानामेवास्मान् प्रतीत्यभिप्रायः। तावदेतानभिप्रुमो यावत्तानि तानि धनूंषि। "त्वं सिन्धूँ रवासृजोऽधराचो अहन्नहिम्। अशत्रुरिन्द्र जज्ञिषे विश्वं

'अनिमिषः' आदरवान् जयं प्रति, 'एकवीरः' एक एव विक्रान्तः अप्रतिद्वन्द्वः सङ्ग्रामेषु, 'शतं सेनाः' बह्वीः शत्रुसेनाः 'साकम्' अवस्थिताः 'अजयत्' एक इन्द्रो यः, तं वयं स्तुमः। एवमितरेतरप्रतिषिद्धान्येतानि मन्त्रवाक्यानि। यद्येको रुद्रः, नासङ्ख्यातानि सहस्राणि, अथासङ्ख्यातानि, नैकः यद्यशत्रुः, कथं शतं सेना अजयत्? अथ शतं सेना अजयत्, कथमशत्रुः? लोके हि यान्येवंलक्षणानि वाक्यानि उन्मत्तादीनाम्, तान्यनर्थकानीति॥

"अथापि" अयमपरो हेतुर्मन्त्राणामानर्थक्ये। कतमः? इति, उच्यते,—"जानन्तं सम्प्रेष्यति" अध्वर्युर्होतारम्। कथम्? 'अग्नये समिध्यमानायानुब्रूहीति "तदु हैक आहुः। अग्नये समिध्यमानाय होतरनुब्रूहीति।" (श० ब्रा० १, ३, २, २)। होता हि विधिज्ञ एव भवति,—नह्यविद्वान् विहितोऽस्तीति स विज्ञानात्येवामुष्मिन्नवधाविदं मयानुष्ठातव्यमिति। तदेतद्विज्ञातार्थस्य सतः सम्प्रेषणमनर्थकमेव भवति। यदेतदर्थकमेवमन्येऽपि मन्त्रा इति॥

"अथापि अयमपरो हेतुर्मन्त्राणामानर्थक्ये। आह,—कतमः? इति, उच्यते,—"आह" मन्त्रनिगमः "अदितिः सर्वमिति"। आह,—किमुदाहरणम्? 'अदितिर्द्यौरदितिरन्तरिक्षमिति' "अदितिर्द्यौरदितिरन्तरिक्षमदितिर्माता स पिता स पुत्रः। विश्वेदेवा अदितिः पञ्च जना अदितिर्जातमदितिर्जनित्वम्॥" (ऋ० मं० १, ६, १६, ५)। "तत्" एतदुदाहरणम् "उपरिष्टाद् व्याख्यास्यामः"। १६ त्ययमर्थमिथमुदाहृतः,—कथं यैव द्यौः, सा अन्तरिक्षम्?

यैव माता, स एव पुत्र, स एव पितेत्येवमादि किमपि बहुत्र परस्परासम्बद्धमुच्यते ? तदर्थवत्त्वे सत्युपपादयितुमशक्यम्। तस्मादनर्थका मन्त्रा इति ॥

"अथापि" अयमपरो हेतुरानर्थक्ये मन्त्राणाम्। आह,—कतम ? इति, उच्यते,—"अविस्पष्टार्था" अपि हि केचित् "भवन्ति"। तद्यथा,—"अम्यग्, याद्दस्मिन्, जारयायि, काणुका,—इति" एवमादय। न ह्येषा विस्पष्टार्थता मन्त्रेषु शक्यते परिज्ञातुम्,—न च केचिदर्थवन्त केचिदनर्थका इति न्याय्यमभ्युपगन्तुम्, अर्द्धवैशस हि स्यात्। तस्मात् सर्व एवा नर्थका इति ॥ परिसमाप्त पूर्वपक्ष ॥

स्वपक्षनिदान स्थापयिष्याम, तदर्थमिदमारभ्यते,—'अर्थवन्त शब्दसामान्यात्" इति। अर्थवन्त एव मन्त्रा इति प्रतिज्ञा। हेतुरुच्यते,—शब्दसामान्यादिति। समान एव हि शब्दो लोके मन्त्रे च। तथा च, य एव गोशब्दो लोके स्वरसंस्कारयुक्त, स एव मन्त्रेष्वपि। तत्रैव सति, स एवार्थवान् लोके स एव चानर्थको मन्त्रेष्विति विशेषहेतुर्नास्ति, असति च विशेषहेतौ अर्थवन्त एव मन्त्रा शब्दसामान्यादित्युपपद्यते। तत्पुनरेतदुक्तम्,—प्रयोगानियमाल्लोकेऽर्थवत्त्व प्रयोगनियमाच्च मन्त्राणामानर्थक्य मिति, तत् प्रति वक्ष्याम एतत् लोकेऽपि हि प्रयोगनियमो दृष्ट। तद्यथा,—पितापुत्राविति ॥

किञ्चान्यत्—"एतद्वै यज्ञस्य समृद्धं यद्रूपसमृद्ध यत् कर्म क्रियमाणमृग्यजुर्वाभिवदतीति च ब्राह्मणम्। एतदेव हि यज्ञ

कर्मणः समृद्धम्। तत् किम्? इति, उच्यते,—'यद्रूपसमृद्धम्' मन्त्रलिङ्गैरभिधीयते, तदेव हि समस्तबुद्ध्या युक्तं भवति, नेतरत्। एतदेव सुतरां स्पष्टीकरोति,—'यत् कर्म क्रियमाण-मृग्यजुर्वाभिवदतीति च ब्राह्मणमिति'। शब्दसामान्याद्ब्राह्मण-प्रामाण्याच्चेति। च शब्दो ब्राह्मणमपि च मन्त्राणामर्थवत्त्वमेवं दर्शयति। अनर्थका हि सन्तः कथं कर्माभिवदेयुः? कथं वाऽन-भिवदन्तः समर्द्धयेयुः? अर्थवाचं वाभ्युपगतं भवता ब्राह्मणस्य? अथापि ब्राह्मणेन रूपसम्पन्ना विधीयन्ते इति अत्र ब्राह्मणेन सिद्धमेवार्थवत्त्वमुक्तं मन्त्राणाम्। तदेतदुपदर्शितमस्माभिस्तस्मा-दर्थवन्त एव मन्त्रा इति॥ १॥

क्रीळन्तौ पुत्रैर्नप्तृभिरिति यथो एतन्नियतवाचो युक्तयो नियतानुपूर्व्या भवन्तीति लौकिकेष्वप्येतद्यथेन्द्राग्नी पितापुत्राविति यथो एतद् ब्राह्मणेन रूपसम्पन्ना विधी-यन्त इत्युदितानुवादः स भवति यथो एतदनुपपन्नार्था भवन्तीत्याम्नायवचनादहिंसा प्रतीयेत यथो एतद् विप्रतिपि-द्धार्था भवन्तीति लौकिकेष्वप्येतद्यथाऽसपत्नोऽयं ब्राह्मणो-ऽनमित्रो राजेति यथो एतज्जानन्तं संप्रेष्यतीति जानन्त-मभिवादयते जानते मधुपर्कं प्राह यथो एतददितिः सर्व-मिति लौकिकेष्वप्येतद्यथा सर्वरसा अनुप्राप्ताः पानीयमिति

यथो एतदनिस्पष्टार्था भवन्तीति नैष स्थाणोरपराधो यदेनदमन्धो न पश्यति पुरुषापराधः स भवति यथा जानपदीषु विद्यातः पुरुषविशेषो भवति पारोवर्यवित्सु तु खलु वेदितृषु भूयोविद्यः प्रशस्यो भवति ॥ २ ॥

प्रथमाध्यायस्य पञ्चमःपादः ॥ १, ५ ॥

किं पुन समृद्धरूपत्वे मन्त्राणामुदाहरणम्? उच्यते,—"क्रीलन्तौ"—इति। "इहैव स्त मा वियौष्ट विश्वमायुर्व्यश्नुतम्। क्रीलन्तौ पुत्रैर्नप्तृभिर्मोदमानौ स्वे गृहे॥" (ऋ० सं० ८, ३, २८, २)। सूर्याया आर्षम्। विवाहे विनियुक्ता। अनुष्टुप्। 'इहैव' 'स्त' भवन्त युवा, 'स्वे गृहे' 'मोदमानौ' हर्षमाणौ 'मा वियौष्टम्' मा च वियुज्येताम्। 'विश्व' सर्वम् 'आयु' व्यश्नुत क्रीलन्तौ 'पुत्रै' 'नप्तृभि' पौत्रैश्च सहेत्याशी। व्यापितमर्थवत्त्व मन्त्राणाम्॥

अधुना परपक्षे हेतवो निराकर्त्तव्या, तदर्थमिदमाह,—"यो एतत्" इति। यत् पुनरेतदुक्तम्। "नियतवाचो युक्तय, नियतानुपूर्व्या भवन्ति इति"। अत्र ब्रूम,—"लौकिकेष्वपि" ह्यर्थवत्सु शब्देषु नियतवाचो युक्तित्व नियतानुपूर्व्यत्वञ्च दृष्टमेव। "एत द्यथा,—इन्द्राग्नी पितापुत्राविति' च। तत्र, यदुक्त नियतवाचो युक्तित्वान्नियतानुपूर्व्यत्वाच्चानर्थका मन्त्रा इति। एतदयुक्तम्। लौकिकेष्वपि हि नियतप्रयोगा सन्त शब्दा केचिदर्थवन्तो

दृष्टाः, यथेन्द्राग्नी पितापुत्राविति। स एव प्रयोगस्त्वियमादनर्थका मन्त्रा इत्यनैकान्तिको हेतुः। तस्मादर्थवन्त एवेति॥

"अथो एतत्" यत् पुनरेदुक्तम्,—"ब्राह्मणेन रूपसम्पन्ना विधीयन्त इति"। अत्र ब्रूमः,—"उदितानुवादः स भवति"। न समर्थ आत्मानमेव स्वेन रूपेण विधातुमित्यतो ब्राह्मणेन विधीयते किन्तर्हि आत्मनियोगाश्रयमुक्तमेव सन्त मन्त्रेणार्थं ब्राह्मणमनुवक्ति विस्तरेण प्रकृतार्थसम्पुष्टया, न ह्यनुक्तं स्तोतुं शक्यते, सोऽयमेवमुदितानुवाद एव भवति, उक्तानुवाद इत्यर्थः। अपि चानेकेऽपि समानलिङ्गाः प्रकरणे मन्त्रा भवन्ति, ते ह्यहम्पूर्विकया एकं प्रयोगं प्रति 'एते कपोत'वत् सम्पतन्ति, तेषां समुच्चये विकल्पे च प्राप्ते सति अभिमत एको नियमार्थं ब्राह्मणेन विधीयते। एवमुभयोरर्थवत्त्वं मन्त्रब्राह्मणयोः। तत्र यदुक्तं रूपसम्पन्नविधानान्मन्त्रानर्थक्यम्, मन्त्रार्थवत्त्वे वा ब्राह्मणानर्थक्यमिति, एतदयुक्तम्। तस्मादुभयमर्थवत्,—मन्त्राश्च ब्राह्मणञ्चेति॥

"अथो एतत्" यत् पुनरेतदुक्तम्,—'ओषधे त्रायस्वैनम्, स्वधिते मैनं हिंसीः,—इत्यादयः अनुपपन्नार्थाः भवन्ति। अत्र ब्रूमः,—ओषध्यधिदेवतोच्यते, हे ओषधे! त्रायस्वैनम्, त्वत्पूर्वको ह्येष वृक्षश्छिद्यमानः सम्यक् छिन्नो भविष्यति, तत्रश्च यज्ञे विनियुक्तः। प्रतिविशिष्टमुत्कर्षमेतस्याः स्थावरत्वात् प्राप्स्यत इत्येतत् त्राणमभिप्रेत्योक्तमोषधे त्रायस्वैनमिति, न छेदनं प्रतिपत्स्यतेऽस्मित्यनेनाभिप्रायेण। तस्मादुपपन्नार्थ एवायम्। तत्र यदुक्तमनुपपन्नार्था इत्येवमादयो मन्त्रा इति, एतदयुक्तम्॥

यदपि चोक्तम्,—'स्वधिते मैनं हिंसीरित्याह हिंसन्निति'। तत्र ब्रूमः,—"आम्नायवचनादहिंसा" प्रतीयेत"। आह,—कथमहिंसा? प्रत्यक्षतो हि छिद्यते वृक्षः। शृणु,—इयमहिंसा, इयं हिंसा,—इत्यागमादेतत् प्रतीयते। प्रतिविशिष्टश्चायमेव वैदिक आम्नाय आगमः, एतत्पूर्वकत्वादन्येषामागमानाम्। स एव कृत्स्नस्य जगतः प्रतिविशिष्टाय श्रेयसेऽभ्युद्यतः सन् हिंसायाः कर्तारं विनियोज्यत इति। कुत एतत् पुनरियमहिंसैव? यतोऽस्मान् नियुनक्ति कर्तारम्। तदेतदागमप्रत्यक्षमेव यथेयमहिंसेति। अपि चैतदोषधिवनस्पतिपशुमृगपक्षिसरीसृपाः सम्यगुपयुक्ताः सन्तो यज्ञे परमुत्कर्षं प्राप्नुवन्ति। सोऽयमभ्युदय एव सम्पद्यते, न हिंसा। तत्र, यदुक्तमेनं हिंसीरित्याह हिंसन्निति, न ह्यसौ हिनस्ति। किन्तर्हि? अनुगृह्णाति यज्ञविनियोगार्थं विधानतः छिन्दन्। तस्मादुपपन्नार्थमेवमपि। तत्र यदुक्तमनुपपन्नार्थत्वादनर्थका मन्त्रा इति, एतदयुक्तम्॥

"अथो एनम्' यत् पुनरेतदुक्तम्,—"विप्रतिषिद्धार्था भवन्तीति"। अत्र ब्रूमः,—नैव विप्रतिषिद्धोऽर्थः,—"एक एव रुद्रोऽवतस्थे' "असंख्याता सहस्राणि'—इति,—देवता हि महाभाग्ययोगादेकापि सत्यनेकधा भवति, अनेकापि चैकधा, तदुपरिष्टाद् व्याख्यास्याम "माहाभाग्याद्देवतायाः (दै० का० ७, १, ४)" इत्यत्र॥

यत् पुनरेतदुक्तम्,—"अशत्रुरिन्द्र जज्ञिषे" "शतं सेना अजयत् साकमिन्द्र'—इति। अत्र ब्रूमः,—"लौकिकेष्वपि" अर्थवत्सु

शब्देषु "एतत्" एवमेवोच्यमानं दृष्टम्। तद् यथा,—"असपत्नोऽयं ब्राह्मणोऽनमित्रो राजेति"। न हि कश्चिदसपत्नोऽस्ति लोके। उक्तं हि,—'मुनेरपि वनस्थस्य स्वानि कर्माणि कुर्वतः। उत्पद्यन्ते त्रयः पक्षा मित्रोदासीनशत्रवः'—इति। तथापि स्वल्पसपत्नं दृष्ट्वा केचिदेवं वक्तारो भवन्ति,—'असपत्नोऽयं ब्राह्मणः' इति। एवमेव कस्मिंश्चिदतिप्रवृद्धे भृशं पातिते मेघेऽन्येषामसत्त्वामभिप्रेत्यैवमुक्तं स्यात्,—अशत्रुरिन्द्र जज्ञिषे यन्त्वामेतमेवमनिमत्रुद्गमहन्नहिम्—इति। यत् पुनरेतदुक्तम्,—'शतं सेना अजयत्'—इति। अत्र ब्रूमः,—कुतो हि सेनाः, या इन्द्रो जेष्यति?—न हि देवानां शत्रवः सन्ति, ये जेतव्या इति। किं कारणम्? विभवो देवा वशिनः अधिकरणधर्माश्च परेण महिम्ना युक्ताः। आह,—कथन्तर्हि 'शतं सेना अजयत्' इत्येतदुक्तम्? उच्यते,—रूपकल्पनयैवैषा युद्धप्रवादान् स्तुतिः, पश्यति च "अपाश्च ज्योतिषश्च मिश्रीभावकर्मणो वर्षकर्म जायते, तत्रोपमार्थेन युद्धवर्णा भवन्ति (नैग० का० २, ५, २)"—इति तदेतद् भक्त्या न सम्यग् दृश्यते, सम्यगन्विष्यतां देवतानन्त्यं नैरुक्तैस्य:, ततो मन्त्रार्थानविरोधेन सम्यगवभोत्स्यन्ते। नैवमशक्यतत्त्वज्ञेन मन्त्रार्थो विज्ञातुं शक्यः। गम्भीरपदार्था हि वेदः, कथमवबोध्यन्ते? वेदार्थविज्ञानविज्ञात्मा एव हि प्रवादिनः स्वबुद्धिनाम-पमाविर्भावयन्तो ब्राह्मणाः सन्तः सर्वधर्मार्थमानादि दर्शनान्तराणि प्रतिवेदिरे। यदुक्तं, विप्रतिषिद्धार्थान्यार्थका मन्त्रा इति। एतदयुक्तम्। न हीमे विप्रतिषिद्धार्थाः,—अपत गच

मतिविभ्रमो मन्दशिक्षितत्वात्। तस्मादर्थवन्त एव मन्त्रा इति ॥

"यथो एतत्" यत् पुनरुक्तम्,—जानन्त सम्प्रेष्यतीति"। अत्र ब्रूम,—लौकिकेष्वर्थवत्सु शब्देषु एतदेव स्वाभाव्य दृष्टम्। "जानन्तम्" गुरुम् "अभिवादयते" स्वगोत्रमभिवदन्। तथा च "जानते मधुपर्क प्राह" निर्मधुपर्कौ मधुपर्क इति। तदे तदर्थवत्स्वपि शब्देषु विहितार्थख्यापनार्थशब्दसामान्यादर्थवन्तो मन्त्रा इति ॥

"यथो एतत्" यत् पुनरेतदुक्तम्,—अथाप्याह "अदिति सर्वमिति"। अत्र ब्रूम,—द्विविधा हि शब्दप्रवृत्ति, मुख्यार्था गौणी च। तत्रैव सति यत्र मुख्यासम्भवस्तत्र गौण्याश्रीयते। स एव भक्तिवादोऽदिति, यथा कश्चिद् ब्रूयात् कश्चिदनेकोपकारे प्रवृत्तम्—'त्वमेव मे माता, त्वं मे पिता' एवमेतदपि द्रष्टव्यम्। "लौकिकेष्वपि' चार्थवत्सु शब्देषु "एतत्" उच्यमानं दृष्टम्, "यथा,—सर्वरसा अनुप्राप्ता पानीयमिति"। ततो हि तेषां प्रभव इत्यनया गुणवृत्त्या एवमुच्यते, एवमिहापि गुणवृत्त्या कयाचिददिते सर्वत्वमुच्यते। यदुक्तमितरेतरविरुद्ध किमपि यद्व्रवीति एतदयुक्तम्। सर्वमेतदुपपद्यत एव गुणवृत्त्या। तस्मादर्थवन्त एव सर्वमन्त्रा इति ॥

"यथो एतत्" यत् पुनरेतदुक्तम्,—अथापि "अविस्पष्टार्था भवन्तीति"। अत्र ब्रूम,—"नैष स्थाणोरपराध" इति। न ह्यत्र स्थाणुमपराध्यति "यदेनं" स्थाणुम् "अन्धो न पश्यति"

यदन्धासाधमिहन्यते। किन्तर्हि? "पुरुषापराधः स भवति" पुरुष एवापराधी तत्र, यदसावचक्षुष्मान्। एवमिहापि नैव मन्त्राणामपराधो यदशिक्षितैर्न भवता न विज्ञायन्ते, भवत एवापराधोऽस्ति, यो भवान् सर्वमात्मीयमपराधं मन्त्रेष्वस्मासु वा संयोजयितुमिच्छति, न तव प्रज्ञास्ति किञ्चित्॥

"यथा—जानपदीषु" कासुचित् प्रवृत्तिषु इतिकर्त्तव्यतासु कौशलशिक्षारूतः "विद्यातः पुरुषविशेषो भवति"। पुरुषाणां विशेषः। एवमिहापि मन्त्रार्थशिक्षाकौशलकृतपुरुषाणां विशेषो भवत्येव। तत्रैवं सति, केचित् पुरुषा येषु विस्पष्टानपि मन्त्रान् न शक्नुवन्ति निर्वक्तुम्, अपरे पुनरविस्पष्टार्थानपि शक्नुवन्ति विस्पष्टीकर्त्तुम्। तदुक्तम् "उत त्वः (ऋ० सं० ८, २, २३, ४। नैघ० का० १, ६, ३)"—इत्यत्र॥

तत्रैवं सति, "पारोवर्य्यवित्सु तु खलु वेदितृषु भूयोविद्यः प्रशस्यो भवति"—इति। य एते पारोवर्य्यविदो ब्राह्मणाः, पारोवर्य्येण विजानन्ति आचार्य्यपरम्परया, ते पारोवर्य्यविदः, न स्वातन्त्र्यधर्मेण इत्यभिप्रायः। तेषां किम्? तेषां य एव भूयोविद्यो भवति बहुश्रुतः कश्चित् स एव प्रशस्यते। य एव मन्त्रार्थविज्ञाता प्रशस्यो भवति, नेतरो मन्दबुद्धिरशिक्षितः स हि बहुश्रुतो बहुदृष्टत्वादनेकविषये मन्त्रार्थे न कश्चित् प्रतिबध्यते, न हि तस्याविस्पष्टार्थो नाम कश्चिदस्ति। तस्मादेतोः स त्वं बहु शृणु, ततः समधिगमिष्यसे मन्त्रार्थान्। तत्र यदवोचः 'अविस्पष्टार्था मन्त्राः' न हि ते अविस्पष्टार्थाः, तांश्चोपरिष्टात् स्पष्टी-

कृत्य व्याख्यास्यामहे। तत्रैव मतिं भ्रमयति सम्मोह। तस्मा दर्थवन्त एव मन्त्रा इति सिद्धम्। तस्माच्चैतदपि शास्त्रं मन्त्रार्थ प्रत्ययायारभ्यमाणमर्थवदेव भवतीति सिद्ध शास्त्रारम्भ। तत्र, यदुक्त 'यदि मन्त्रार्थप्रत्ययायानर्थक भवतीति' एतदयुक्तम्। इति प्रभिन्नेषु परस्य हेतुषु स्वपक्षसिद्धावुत्थिते च कारणे अव स्थिता मन्त्रगणस्य सार्थता, तदर्थमेतत् खलु शास्त्रमर्थवदिति ॥२॥

इति निरुक्तवृत्तौ प्रथमाध्यायस्य पञ्चम पाद ॥ ५ ॥

षष्ठः पादः

अथापीदमन्तरेण पदविभागो न विद्यते। अवसाय पद्वते रुद्रमृळेति। पद्वदवसङ्गाः पन्थदनमवतेर्गत्यर्थस्यावो नामकरणस्तस्मान्नावगृह्णन्ति। अवसायाश्वानिति। स्यति- रुपसृष्टो विमोचने तस्मादवगृह्णन्ति। दूतो निर्ऋत्या इद- माजगामेति। पञ्चम्यर्थप्रेक्षा वा षष्ठ्यर्थप्रेक्षा वाः- कारान्तम्। परो निर्ऋत्या आचक्ष्वेति। चतुर्थ्यर्थप्रेक्ष धाकारान्तम्परः सन्निकर्षः संहिता पदप्रकृतिः संहिता पद- प्रकृतीनि सर्वचरणानां पार्षदान्यथापि याज्ञे दैवतेन बहवः

प्रदेशा भवन्ति तदेतेनोपेक्षितव्यं ते चेद् ब्रूयुर्लिङ्गज्ञा अत्र स्म इति। इन्द्रं नत्वा शवसा देवता वायुम्पृणन्तीति। वायुलिङ्गं चेन्द्रलिङ्गञ्चाग्नेये मन्त्रेऽग्निरिव मन्यो त्विषितः सहस्वेति तथाऽग्निर्मान्यवे मन्त्रे त्विषितो ज्वलितस्त्विषिरित्यप्यस्य दीप्तिर्नाम भवत्यथापि ज्ञानप्रशंसा भवत्यज्ञाननिन्दा च ॥ १ ॥

"अथापीदमन्तरेण पदविभागो न विद्यते"। शास्त्रारम्भप्रयोजनाधिकारे वर्त्तमाने अथेदमन्तरेण मन्त्रेष्वर्थावधारणं नास्तीत्युक्ते यदि मन्त्रैत्यादिनानर्थक्यहेतुभिर्हेतुभिरानर्थक्य उपपादिते निरुक्तशास्त्रस्य, कौत्सेन मन्त्राणामर्थवत्तां स्थापयित्वा परपक्षहेतवः प्रत्युक्ताः। तेषु स्थितमर्थवत्त्वं मन्त्राणाम्। तेषामर्थं निर्वचनापेक्षमारभ्यमाणमर्थवदित्युपपन्नमर्थवत्त्वं निरुक्तशास्त्रस्य। तदेतत् सर्वमपि चोदकशास्त्रकारपक्षेण प्रसक्तानुप्रसक्तमुक्तं प्रज्ञया विवृद्धये शिष्यस्य। कथमासां स्याद् विवृद्धप्रज्ञा? शब्दार्थन्यायसङ्कटेषु हेतुमत्प्रधानभिन्नः परैः प्रतिरुध्यमानोऽपि पदार्थान् वाक्यार्थांश्चाप्रमोहेन निर्वाहयतीति। एवन्तावत्, यदन्तरेण मन्त्रार्थप्रत्ययो नास्ति। अथेदमपरमारम्भप्रयोजनमित्येवं विशेषाधिकारार्थोऽयमथशब्दः। अपि मन्त्रार्थप्रत्यय इदमन्तरेण नास्ति, नाप्यस्ति यदिदं पदप्रमाणम्, इत्यपिशब्दः एवं समस्यते।

आह,—किम्पुनस्तद् वक्ष्यमाणम्? इति, उच्यते,—'पद विभाग'। 'एव पदानि वक्तव्यानि'—इत्येतद् विभागपरिज्ञान नास्तीत्यर्थे। किं कारणम्? अर्थवशेन हि पदान्यवतिष्ठन्ते, न चेदमन्तरेणार्थपरिज्ञानमस्ति। तस्मादत एव पदविभागप्रसिद्धि रिति। इदमर्थवत्त्व मन्त्राणामन्तरेण पदविभागोऽप्यकिञ्चित्कर। प्रसिद्धश्चैव सर्वशाखासु। तस्मात् पदविभागार्थवत्त्वाय चार्थ वन्तो मन्त्रा इति केचिद् वर्णयन्ति॥

एव प्रतिज्ञाय समानसहितेषु ग्रन्थेष्वर्थहेतुक पदविभाग विशेषं दर्शयति तद्यथा,—"अवसाय पद्वते रुद्रमृळेति"। "पद्वत्" पादवत पादसयुक्तम्। "अवस गाव पश्यदनम्" इति निगम प्रसक्तस्य पर्य्यायवचनम्। "अवतेर्गत्यर्थस्यासौ नामकरण" प्रत्यय। "तस्मात्" असमासत्वादस्य "नावगृह्णन्ति" एतत्, पदकारा इति शेष। "मयोभूर्वातो अभिवातूस्रा ऊर्जस्वतीरोष धीरारिशन्ताम्। पीवस्वतीर्जीवधन्या पिबन्त्ववसाय पद्वते रुद्र मृळ॥ (ऋ० स० ८ ८,२७ १)॥ सुचरो नाम गौतम स मयोभूरित्यस्यास्त्रिष्टुभ पूर्वैस्त्रिभि पादै गवामाशिषमाशास्योत्त मेन तामामेव च रुद्रात् सुखमयाचत। गवामुपस्थाने विनियुक्ता। 'मयोभू' मयोभावयिता पाश्चात्य 'वात', एता 'उस्रा' 'अभि वातु' आभिमुख्येन वातु। किञ्च तेन सुखभुवा वातेनानुप्रे- जनायैन स्पृश्यमाना 'ऊर्जस्वता' प्रभूतरसा 'ओषधी' 'आरिश न्ताम्' आस्वादयन्तु। आस्वाद्यास्वाद्य च मत्यणस्यादमासा भिप्रेते काले उदक 'पिबन्तु'। तच्च पीनमोषधिसहितमासां तथा

कोष्ठे विपचयतां रसशोणितमांसमेदोमज्जाऽस्थिक्रमेण यथैताः पीवस्वत्यो भवेयुः। 'पीवस्वतीः' पीवगुणयुक्ताः स्थूला बलवत्यो बहुपयस्काः सति च बहुपयस्त्वे 'जीवधन्याः' जीवधनिन्यो रोगदुष्टमातृकाः। हे 'रुद्र!' वयम् एतासां गवाम् एताम् आशिषम् आशास्महे। इममप्यर्थं गोलक्षणाय 'पद्वते' 'अवसाय' पथ्यदनाय 'मृळ' सुखीमव। मैनां हिंसीस्त्वमासामीश्वर इत्यभिप्रायः॥

"अवसायाऽश्वानिति"। इदमपरमुदाहरणम्। अस्मिन् पूर्वेण रूपेण सरूपमेव पदमर्थहृत्वाद् विशेषायवगृह्णाति। द्वयोः पदयोः पदानां वा पदविच्छेदेनोच्चारणं स समासः। तयोरेवार्थविभागो-पदर्शनार्थमवच्छेदेन ग्रहणमवग्रहः। तदेतदवगृह्यते पदम्,— "स्यति." धातुः "विमोचने" अर्थे वर्त्तते, स पुनः "उपसृष्टः" उपसर्गेणावेत्यनेनोपसृष्टः संयुक्त इत्यर्थः। यतो धातूपसर्ग-विभागोपप्रदर्शनार्थमेव तत् पदमवगृह्यते अवस्यायेत्येतत्। "योनिष्ट इन्द्र निषदे अकारि तमा नि षीद स्वानो नार्वा। विमुच्या वयोऽवसायाऽश्वान् दोषा वस्तोर्वहीयसः प्रपित्वे॥ (ऋ० मं० १, ७, १८, १)। एतया त्रिष्टुभा कुत्स आङ्गिरस इन्द्रं तुष्टाव। "योनिष्टे"। हे 'इन्द्र'! 'योनिः' स्थानं 'ते' तव यदिदं 'निषदे' निषदनाय, मया 'अकारि' कृतम्, 'त' योनिं तत् स्थानम् 'आ निषीद' एत्य निश्चयेन सीद। कथं पुनर्निषीद? 'स्वानो न' स्वन्यमान इव 'अर्वा' अश्वः। संशब्द्यमान इत्यश्वजनेनाश्वः स यथा स्वे स्थाने निषीदेदेवं मया स्वमपि शब्द्यमानस्तुतिभिरेतस्मिन्

मया संस्कृते स्वास्तीर्णे बर्हिषि स्थाने निषीद। कथम्पुनर्निषीद? 'विमुच्य' एतान् 'वयः अश्वान्'। कुत.? रथात्। पुनरपि च एतान् 'अवसाय' वियोज्य रश्मिभ्योऽश्वान् लब्धोदकयवसान् कृत्वा 'दोषावस्तोर्वहीयस.' अहनि च रात्रौ च ये केचिद् वहन्ति, तेभ्योऽपि वहीयस शीघ्रतमेन जवेन वोढृतमान् ततस्त्वं स्वस्थो भूत्वा निषीद। एतस्मिन् यज्ञे एतस्मिन् संस्कृते बर्हिषि 'प्रपित्वे' प्राप्ते अस्माक त्वद्यजनकाले मा नो विघ्नं कार्षीरित्यभिप्रायः॥ एवन्तावदिदमवगृह्यमिदमनवगृह्यमित्यर्थपरिज्ञानद्वारेण "तस्मात्" एतन्निरुक्तशास्त्रात् विज्ञायते॥

यान्यपि च खल्वनवगृह्याणि पदानि समानसंहितानि, तेषामप्यर्थकृतमेव विभागवैशेष्यं भवति। तद्यथा,—"दूता निर्ऋत्या इदमाजगामेति पञ्चम्यर्थप्रेक्षा वा" अस्मिन् पदे पञ्चम्यर्थदर्शनं वेत्यर्थ, पञ्चम्यर्थोऽत्र दृश्यते? "षष्ठ्यर्थप्रेक्षा वा" षष्ठ्यर्थदर्शनं वेत्यर्थ', षष्ठ्यर्थोऽत्र दृश्यते? अत एतत् "आःकारान्तम्" पदं निर्ऋत्या इति। "देवाः कपोत इषितो यदिच्छन् दूतो निर्ऋत्या इदमाजगाम। तस्मा अर्चाम कृणवाम निष्कृतिं शं नो अस्तु द्विपदे शं चतुष्पदे॥" (ऋ० म० ८, ८, २३, १)। प्रचेता नामाङ्गिरस', तेनेयं कपोतसूक्ते दृष्टा। कपोतनिलयन' शान्त्यै कपोतपददर्शन एतत सूक्तम्। त्रिष्टुवेषा। हे 'देवाः!' 'कपोत' 'इषित.' प्रेषितः 'निर्ऋत्याः' स्वभृत', तयैवानुप्रेषित इत्येवं षष्ठ्यर्थः। अथवा निर्ऋत्याः सकाशादित्येवं पञ्चम्यर्थः। 'यत्' कर्तुम् 'इच्छन्' 'इदम्' अस्मद्गृहम् 'आजगाम'। यस्य नः

पापस्य च पापकर्मणो जन्मान्तरकृतस्य एतत् कपोतगृहनिलयनं यत्पद्दर्शनं च कुड्यादिषु विपाकलिङ्गम्। 'तस्मै' कर्मणे तदर्थं युष्मानेव 'अर्चाम'। समर्था यूयमेतत् पापकर्म विपच्यमानमस्माकमपहर्त्तुमृजु विपाकं वा कर्त्तुं वयमपि च तस्मै पापकर्मणे 'कृणवाम' 'निष्कृतिम्' निष्क्रमणं निर्णजनम्, तपसा एतद्भूतानुरूपेण। यतो ब्रूमः,—'शं नः' सुखं नः 'अस्तु' 'द्विपदे चतुष्पदे' युष्मत्प्रसादेन च स्वेन तपसेत्यभिप्रायः॥

"परो निर्ऋत्या आचक्ष्वेति"। एतस्मिन् पदे "चतुर्थ्यर्थप्रेक्षा" चतुर्थ्यर्थदर्शनम्। अत एतत् पदम् "ऐकारान्तम्"। "अपेहि मनसस्पतेऽपक्राम परश्चर। परो निर्ऋत्या आचक्ष्व बहुधा जीवतो मनः॥" (ऋ० सं० ८, ८, २२, १)। प्रचेता नाम आङ्गिरस एतामनुष्टुभमपश्यत्। दुःस्वप्नदर्शने विनियुक्ता। मन इति विज्ञानमुच्यते, बुद्ध्यादिः, तस्य पतिः मनसस्पतिरात्मा, इह पुनर्मृत्युर्व्याधिर्वा मनसस्पतिः। उभावपि स्वाभ्युत्कर्षापेक्षया प्राणिनां बुद्ध्यादिविज्ञानोपसंहारस्येशाते। तयोरन्यतरः सम्बोध्यते,—हे 'मनसस्पते!' 'अपेहि' अपगच्छ। अस्मत्तो गत्वा च रथमीपदपगम्य अस्मत्तः, समीप एव मा स्था अस्माकम्। किन्तर्हि? 'अपक्राम' दूरमपेत्य ग्राम, अपक्रम्य च 'परः' परतः, अन्यग्रामस्तः 'चर' अपुनरावर्त्तमानोऽस्मान् प्रति। किञ्च 'परः' परागत्य यस्याः त्व दूतः निर्ऋत्याः, तस्यै 'निर्ऋत्यै' 'आचक्ष्व'। किमिति? 'बहुधा जीवतो मनः'। अथवा 'परः' प्रकृष्ट आत्मयं तस्याः निर्ऋत्याः दूतो मां प्राणः। अविज्ञातमरणकाल एवाति

सम्मोहतो ब्रवीमि । तस्यै 'निर्ऋत्यै' गत्वा 'बहुधा' अनेकप्रकारम् 'आवक्ष्व' कथय। 'जीवत' यादृश मन भवति, तादृश मम 'मन' बुद्ध्यादिकरणज्ञातदिनकरकिरणस्पप्रवृत्तित्वेन तावत् स मुमूर्षुरित्येतदाचक्ष्व। मुमूर्षोर्हि उपक्षीणकर्मणा नातिस्पष्टा इन्द्रियवृत्तयो भवन्ति, न च मम तथेत्यभिप्राय ॥ एव समान सहितानामपि पदानामर्थभेदकृत विभागवैलक्षण्यम्। स चार्थ इदमन्तरेण न विज्ञायते। अत इदमुक्तम्,—'अथापीदमन्तरेण पदविभागो न विद्यते' इति ॥

पदविभागप्रसक्तमधुना सहितालक्षणमाह,—"पर सन्निकर्ष सहिता (पा० १, ४, १०९)"—इति। पर प्रकर्षो य सन्निकर्ष सश्लेष, परस्परेण स्वराणा स्वराभिरूढाणाञ्च व्यञ्जनाना सा सहितेत्युच्यते। सा च पुनरियं "पदप्रकृति सहिता (ऋ० प्राति० २, १)"। अत्र द्विविधा वर्णयन्ति। पदाना या प्रकृति, सेय पदप्रकृति सहिता। किं कारणम्? सहितातो हि पदानि प्रक्रियन्ते, तस्मात् सहितैव प्रकृति, विकार पदानीत्येवमेके मन्यन्ते। अपरे पुन, पदप्रकृति सहितेति पदानि प्रकृतिर्यस्या सेय पदप्रकृतिरिति। किं कारणम्? पदान्येव हि सहत्य मानानि सहिता भवति, तस्मात् पदान्येव प्रकृति, विकार सहितेति ॥

एवञ्च कृत्वा "पदप्रकृतीनि सर्वचरणाना पार्षदानि"। सर्वेषा चरणाना सर्वशाखान्तराणामित्यर्थ । किम्? पार्षदानि, स्व चरणपर्षद्येव ये प्रतिशाखानियतमेव पदावग्रहप्रगृह्यक्रमसहिता

स्वरलक्षणमुच्यते। तानीमानि "पार्षदानि" प्रातिशाख्यानीत्यर्थः। आह,—किं तेषाम्? इति। उच्यते,—तानि पदप्रकृतीनि। पदं येषु संहितायाः प्रकृतित्वेन चिन्त्यते, तानीमानि पदप्रकृतीनि। तेषामपि स एव समय इत्यभिप्रायः।

आह,—किम्पुनरत्र साधीयः,—पदानां प्रकृतित्वम्, संहितायाः विकारत्वम्? उत वा विकारत्वं पदानाम्, प्रकृतित्वं संहितायाः? इति। उच्यते, संहितायाः प्रकृतित्वं ज्यायः। आह,—किं कारणम्? उच्यते,—मन्त्रोऽयमभिव्यज्यमानः पूर्वमृषेर्मन्त्रदृशः संहितयैवाभिव्यज्यते, न पदैः, अतश्च संहितामेव पूर्वमध्यापयन्त्यनूचाना ब्राह्मणाः, अधीयते चाध्येतारः, पदैरेव विनियोक्ष्यन्त मन्त्राः कर्मसु। न त्वेतत् सर्वमस्ति। तस्मादेतैर्विशेषहेतुभिः संहितैव प्रकृतिर्न पदानीति पश्यामः, समयमात्रमितरत् स्वशास्त्रनियतमेव। यदुक्तं पदप्रकृतीनि सर्वचरणानां पार्षदानि, तेष्वेव हि व्याख्यायमानेषु पदानां प्रकृतित्वं भवति, न सर्वत्रैव। तस्मात् संहितैव प्रकृतिरित्येतदसाधीय इति॥

"अथापि याज्ञे दैवते न बहवः प्रदेशा भवन्ति"। अथेत्यमपरमास्मिन्नप्रयोजनमस्य शास्त्रस्येत्येवं विशेषाधिकारार्थोऽयमथशब्दः। अपीदं वक्ष्यमाणमपि यान्युक्तानीत्येवमपिशब्दः सम्भाव्यते। आह,—किम्पुनस्तत्? इति। उच्यते,—यज्ञे कर्मणि प्रवर्त्तमाने दैवतेन बहवः प्रदेशा भवन्ति, दैवतेन लिङ्गेन बहवो विधिषु देशा भवन्ति। तद्यथा,—उपतिष्ठते द्युमन्त्याऐन्द्र्यागार्ह्, आग्नेय्याग्नीध्रमित्यया हविर्धानमित्येवमादि। न्याय-

चिद् सत्यपि याज्ञिका पठन्ति,—लिङ्गतो मन्त्राणां शेषभाव मधिकृत्य, लिङ्गक्रमसमाख्यानात् काम्ययुक्त समाम्नानमित्यधि कारे,—एवञ्च मन्त्रविधेरेतदार्थयेषु शिष्टत्वादिति चैवमादि।

तत्रैव सति "ते चेद् ब्रूयुर्लिङ्गा अत्र स इति"। ते यद्यत्र ब्रूयु, किमिति? लिङ्गज्ञा, लिङ्गज्ञातारो वयमत्र एतस्मिन् नाम्नाये लिङ्गतो वयमत्र यस्मिन् देवताया तत्र विजानीम। विज्ञाय च तद्दैवत एव कर्मणि विनियुञ्ज्महे तं मन्त्रम्। एवञ्च सति न नो निरुक्तशास्त्रेण प्रयोजनमस्तीति लिङ्गमस्माकं ज्ञापक मिति केचिद् वर्णयन्ति।

तथ ब्रुवतो वक्तव्या,—यदि यूय लिङ्गतो मन्त्रदेवता विजानीध्वे, "इन्द्र न त्वा शवसा देवता वायु पृणन्ति (ऋ० स० ४, ७, ६, २) —इत्येतस्मिन् मन्त्रे का देवता? इति।

आह —केन पुनरभिप्रायेणास्मिन् मन्त्रे देवता पृच्छयते? इति। उच्यते,—"वायुलिङ्गं चेन्द्रलिङ्गं चाग्नेये मन्त्रे। अथ तावदयमाग्नेयो मन्त्र, अत्र च तावदेतस्मिन् मन्त्रे इन्द्रवायू अपि श्रूयेते, तदेतद् द्वयमिदं लिङ्गमात्रेण, कतमदत्र प्रधानं देवता भिधानम्? कतमदत्र नैघण्टुकम्? इति। ते चेत याज्ञिका लिङ्गमात्राभिरक्षणं येष्य मन्त्रान् कर्मसु विनियुञ्जाना गुणप्रधान भावमजानन्तो देवताभिधानानामितरमन्त्रगतानामन्यदैवतमन्त्रमन्य दैवते कर्मणि विनियुञ्जान्, ततश्चायथाकरणात् कर्मासमृद्धि स्यात्। न च केवल कर्मासमृद्धिरेव। किन्तर्हि? अपयशोऽपि स्यादेव दुरिष्टहेतुक। तस्मात् परिज्ञेय निरुक्तम्। तेन हि

गुणप्रधानभावः शक्यते विज्ञातुमेकमन्त्रगतानां देवताभिधानाना-मिति। तदेतदेवं देवतापरिज्ञानद्वारेण पुरुषस्य प्रति विशिष्टोप-कारकारि। तस्माद् युज्यते प्रारब्धुमिति॥

"त्वां हि मन्द्रतममर्कशोकैर्ववृमहे महि नः श्रोष्यग्ने। इन्द्रं न त्वा शवसा देवता वायुम्पृणन्ति राधसा नृतमाः॥" (ऋ० सं० ४, ५, ६, २)। भरद्वाजस्यार्षम्। आग्नेयी। प्रातरनुवाकाश्विनयोर्विनियोगः। हे 'अग्ने!' 'त्वां हि' त्वामेव 'मन्द्रतमं' मृदुतमं सुखाराध्यतमम्, त्वं हि देवेषु सर्वेषु मृदुहृदयतमो यतः, अतस्त्वामेव 'ववृमहे' सम्भजामहे। केन? अर्कशोकैः। एक-पदमेतत्। अर्चनैर्मन्त्रैः शोकैर्दीप्तैः यथोक्तब्रह्मचर्यजनित-वीर्य्यैः। स 'नः' त्वं भज्यमानः तैः मन्त्रैः संसेव्यमानः 'महि' महत् स्तोत्रं तैरेव मन्त्रैर्युष्मद्गुणानुस्मृतिसन्तानगर्भैरुपग्रथितं 'श्रोषि' शृणु। किञ्च, एवं त्वं महती देवता, येन 'त्वा' त्वामेवैकं 'देवताः' अपि सर्वा 'इन्द्रं न' इन्द्रमिव च 'वायुम्' इव च 'शवसा' बलेन बलाकृतिभिः अभ्यर्चन्ति। किम्पुनः स्वैः कर्मभिः? येऽपि च केचिदन्ये त्रिलोके नृणां मध्ये बलयशःश्रुतैः 'नृतमा' तेऽपि च त्वामेव 'पृणन्ति' पालयन्ति पूरयन्ति वा। 'राधसा' हविर्लक्षणेन धनेन। एवं सदैव मनुष्यस्य जगतः पूज्यस्त्वं न केवलमस्माकमिति।

एवमयमाग्नेयो मन्त्रः, स एष लिङ्गमात्रदर्शनेनाविज्ञातप्रधान-देवतो विनियुज्यमान ऐन्द्रये वायव्ये वा कर्मणि कर्त्तुरभिप्रेत-फलसिद्धे नाल स्यात्, कर्मवैगुण्याच्च कर्त्तुरपध्वंसाय स्यात्। तस्माद् विज्ञेयं मन्त्रदेवतानिश्चयज्ञानाय निरुक्तमिति॥

"अग्निरिव मन्यो त्विषितः सहस्व सेनानीर्नः सहुरे हूत एधि। हत्वाय शत्रून् विभजस्व वेद ओजो मिमानो विमृधो नुदस्वेति" ॥ (ऋ० सं० ८, ३, १६, २)। यथा पूर्वस्मिन्नाग्नेये वायुलिङ्गमिन्द्रलिङ्गं च, "तथा" एतस्मिन्नपि "मान्यवे मन्त्रे"। "अग्निः" अग्निलिङ्गं नैघण्टुकम्। एवमनेकदैवतालिङ्गसङ्कटेषु दुरवधारं देवतातत्वमनैरुक्तेनाप्रसिद्धमन्त्रव्याख्यानसमर्थेन।

यदुक्तं लिङ्गज्ञातारो वयमत्र लिङ्गत एव मन्त्रान् कर्मसु विनियोक्ष्यामहे, न नो निरुक्तेन प्रयोजनमस्तीत्येतदयुक्तमिति। "त्विषिरित्यप्यस्य दीप्तिर्नाम भवति" अपठितमपि दीप्तिनामसु न केवलं यान्येव पठितानि, अन्यान्यपीति ॥

"अथापि" इदमपरमारम्भप्रयोजनमस्याः। आह,—किम्? इति। उच्यते,—"ज्ञानप्रशंसाभवत्यज्ञाननिन्दा च" ज्ञानञ्च प्रशस्यते, अज्ञानञ्च निन्द्यते। तन्नैवं सति वयमनिन्द्या स्यामः प्रशस्याश्चेति ज्ञेयं निरुक्तम्। अतो हि आध्यात्माधिदैवताधियज्ञाभिधायिनां मन्त्राणामर्थाः परिज्ञायन्ते, ते च परिज्ञाताः सन्तः पुरुषस्योत्तमाय श्रेयसे भवन्ति। तदेवमखिलपुरुषार्थोपकारसमर्थशास्त्रमिति न्याय्यमारब्धुम् ॥ १ ॥

(१) स्थाणुरयं भारहारः किलाभूदधीत्यवेदं न विजानाति योऽर्थम्। योऽर्थज्ञ इत्सकलं भद्रमश्नुते नाकमेति ज्ञानविधूतपाप्मा। यद्गृहीतमविज्ञातं निगदेनैव शब्द्यते।

अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित्। स्थाणु-
स्तिष्ठतेरर्थोऽर्त्तेररणस्थो वा ॥ २ ॥

क पुनर्ज्ञानं प्रशस्यतेऽज्ञानं च निन्द्यते? इति। उच्यते,—
लोके, शास्त्रे च। लोके तावद् यः कश्चिद् विद्वान् भवति, स
पूज्यते पुष्पफलैरपि भिर्जनैः, तदेतत् प्रत्यक्षत एव दृष्टम्। शास्त्रे-
ऽपि "स्थाणुरयं भारहारः"—इत्यादि। स्थाणुर्वृक्षः, स यथा
पत्रपुष्पफलानामात्मीयानां धारणमात्रेणैव सम्बध्यते,—न तज्जै-
र्गन्धरसरूपस्पर्शोपभोगसुखैः। एवञ्च "किलासावधीत्य वेदं न
विजानाति योऽर्थम्" तस्य वेदस्याध्ययनभारमात्रमेव हासौ
बिभर्त्ति। "योऽर्थज्ञ इत् सकलं भद्रमश्नुते" य एवार्थज्ञो भवति,
न ग्रन्थमात्राध्येता, स एव सकलमनवखण्डितं भद्रम् अश्नुते,
अर्थपरिज्ञानफलमश्नुते प्राप्नोति। किम्पुनस्तत्? इह लोके
पूज्यतामुपेत्य शिष्टानाम्, इतो लोकादन्तकाले "नाकमेति" यत्रा-
सुखं किञ्चिदपि नास्ति, आध्यात्मिकमाधिदैविकमाधिभौतिकं
वा, "कमिति सुखनाम, तत् प्रतिषिद्धम्। प्रतिषिध्येत न वा
अमुं लोकं जग्मुषे किञ्च नाकम्। न वा अमुं लोकं जतवते
किञ्च नासुखम्। पुण्यकृतो ह्येव तत्र गच्छन्ति"—इति नैरु०
का० २, ४, २। तत् स्थानमेति निरतिशयम्। कस्मात् पुनर-
सावीदृशं स्थानमेति? इति। उच्यते,—यतः। यस्मादसौ
"ज्ञानविधूतपाप्मा"। ये हि नाकगमनप्रतिबन्धिनः पाप्मानः,

ते तस्य ज्ञानेन विधूताः, अतोऽसावेति नाकम्। युक्तञ्चान्यत्रापि,—न हि ज्ञानेन सदृशं पवित्रमिह विद्यते इति।

अथवा स्थाणुर्गर्दभः। स यथा चन्दनभारं वहत्येव, तदुपभोगैर्नाभिसम्बध्यते, एवं किलासौ या ग्रन्थमात्राध्येता, नार्थज्ञः। एवं तावदस्मिन् ज्ञानं प्रशस्तम्॥

अथैतस्मिन् अज्ञानं निन्द्यते,—"यद् गृहीतमविज्ञातम्"—इति। यद् गृहीतं गुरुमुखात्, अविज्ञातं चार्थतः। किञ्च "निगदेनैव शब्द्यते" निगदमात्रेणैव नित्यकालं शब्द्यते उच्चार्य्यते, न पुनरर्थतो विचार्य्यते। आह,—किं तस्य? उच्यते,—"अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित्"। शुष्कं काष्ठमनग्नौ प्रदेशे नालं ज्वलनाय प्रकाशाय। एवं यो वेदार्थस्यानभिज्ञोऽध्येता स वेदाध्ययनभारमात्रेणैव सम्बध्यते, न तु तदीयेन फलेन, परिज्ञानन्तु श्रेयसा चाभ्युदयेन च युनक्तीति। तस्मादेतत्परिज्ञानाय अवश्यं निरुक्तशास्त्रमारब्धव्यमिति॥

स्थाणुशब्दमर्थशब्दञ्च उदाहरणप्रसक्तौ निर्वक्ति,—"स्थाणुस्तिष्ठते."। स्थितो ह्यसौ नित्यकालमेव भवति, न कदाचिदप्यासीदिति। "अर्थोऽर्त्तेः" गतिकर्मणः, अर्य्यते ह्यसावर्थिभिः। "अरणस्थो वा" यदास्य स्वामी अरति गच्छति इतो लोकादमुं लोकं तदायमिहैव तिष्ठति, नानेनैव सहामुं लोकं गच्छति दीनारादिरर्थः, तत्सामान्यादितरोऽपि शब्दार्थोऽर्थ उच्यते।

एवं तावत् शिष्टानुगमस्मृतौ ज्ञानं प्रशस्यते, अज्ञानञ्च निन्द्यते॥२॥

उत त्वः पश्यन्न ददर्श वाचमुत त्वः शृण्वन्न शृणोत्येनाम्। उतो त्वस्मैतन्वं१ विसस्रे जायेव पत्य उशती सुवासाः। अप्येकः पश्यन्न पश्यति वाचमपि च शृण्वन्न शृणोत्येनामित्यविद्वांसमाहार्धमप्येकस्मै तन्वं विसस्र इति स्वमात्मानं विवृणुते ज्ञानं प्रकाशनमर्थस्याहानया वाचोपमोत्तमया वाचा जायेव पत्ये कामयमाना सुवासा ऋतुकालेषु सुवासाः कल्याणवासाः कामयमाना ऋतुकालेषु। यथा स एनां पश्यति स शृणोतीत्यर्थज्ञप्रशंसा। तस्योत्तरा भूयसे निर्वचनाय॥ ३॥

न केवलं स्मृतावेव ज्ञानप्रशंसा अज्ञाननिन्दा च। किन्तर्हि? वेदेऽपि,—"उत त्वः पश्यन् (ऋ० सं० ८, ३, २३, ४)"—इति। विद्यामन्त्रे द्वे अप्येते ऋचौ बृहस्पतेरार्षम्। 'उत' शब्दोऽपि शब्देन समानार्थः। 'त्वः' एक इत्यर्थः। बहूनामपि समान-श्रुतीन्द्रियाणामध्यापकानां समानमेवाध्ययनमधीयानानाम् एकः कश्चित् 'पश्यन्' अपि 'वाचं' मनसा सम्यक्त्वाभ्यपनोऽपि तीक्ष्णचित्तः सन् 'न ददर्श' न पश्यत्येव अर्थानभिज्ञत्वात्। न हि तां सम्यक् पश्यति, यस्मात्तस्या अर्थं विजानाति। अर्थपरिज्ञानफला हि वागित्यभिप्रायः। एवमेव 'शृण्वन्' अपि 'न शृणोति' 'एनां' वाचम्। स एव हि, सर्वमनुपश्यते वाचः, तेनैव सा सम्यक् श्रुता भवति,

नेतरेण, इतरो ह्यविद्वान् ध्वनिमात्रमेवोच्चारयति वाचम्। "अर्धम्" अनेनार्द्धर्चेन "अविद्वांसमाह" निन्दन् मन्त्रदृक्। साम्प्रतमुत्तरेणार्द्धर्चेनार्थज्ञप्रशंसन्नाह,—'उतो त्वस्मै' "अप्येकस्मै" कस्मैचिदर्थज्ञाय 'तन्वं' शरीरं 'विसस्रे' विस्रंसयति विवृणोतीत्यर्थः। अर्थो वाचः शरीरं तं विवृणोति आत्मानं दर्शयत्येवास्मै कस्मैचिदर्थज्ञाय "प्रकाशनमर्थस्याहानया वाचा" अनेन तृतीयेन पादेनेत्यर्थः। कथन्तर्हि विवृणुते तन्वम्? इति, अत, —"उपमोत्तमया वाचा" उत्तमेन पादेनोच्यते,—"जायेव पत्य उशती सुवासाः"—इत्यनेन। यथा हि 'जाया' विवृतसर्वाङ्गावयवा भूत्वा 'उशती' 'कामयमाना' 'पत्ये' इष्टाय भर्त्रे प्रेम्णा दर्शयेदात्मानम्। कस्मिन् काले? यदा 'सुवासाः' भवति, निर्णिक्तवासा भवति। निर्णिक्तवासा नीरजस्का "ऋतुकालेषु" तदा ह्यतितरां स्वपुरुषं प्रार्थयते। अत एतयावस्थयोपमीयते। "यथा स." पुरुषस्ताम् "एना" यथावत् 'पश्यति" स्त्रियम्, नेतरां या ह्यनपत्रप्रावृतसर्वगात्रा। एवं "स." एवैतां वाचं यथावत् "शृणोतीति"। यः पदशोऽवच्छिद्यैतां विगृह्य चार्थमस्याः पश्यति समस्तत्तमेवमस्यामृचीयम् 'अर्थज्ञप्रशंसा" ॥

अर्वायमपरा ऋक् "तस्याः" एव "उत्तरा" अस्यैवार्थस्य प्रकृतस्य ज्ञानप्रशंसापरस्य फलाभिधानद्वारेण "भूयसे" बहुतराय अमुना फलेनाभिसम्बन्धान् प्रतिविशिष्टज्ञान मित्येवं "निर्वचनाय" निर्विविच्य निर्द्धार्य्य वचनं कथनं निर्वचनम्, तस्मै निर्वचनाय ॥ ३ ॥

उत त्वं सख्ये स्थिरपीतमाहुर्नैनं हिन्वन्त्यपि वाजिनेषु। अधेन्वा चरति माययैष वाचं शुश्रुवाँ अफलामपुष्पाम्। अप्येकं वाक्सख्ये स्थिरपीतमाहू रममाणं विपीतार्थं देवसख्ये रमणीय स्थान इति वा विज्ञातार्थं यन्नाप्नुवन्ति वाग्ज्ञेयेषु बलवत्स्वप्यधेन्वा ह्येष चरति मायया वाक्प्रतिरूपया नास्मै कामान् दुग्धे वाग्दोह्यान् देवमनुष्यस्थानेषु यो वाचं श्रुतवान् भवत्यफलामपुष्पामित्यफलास्मा अपुष्पा वाग् भवतीति वा किञ्चित्पुष्पफलेति वार्थं वाचः पुष्पफलमाह याज्ञदैवते पुष्पफले देवताध्यात्मे वा ॥ ४ ॥

तद्यथा,—"उत त्वं सख्ये स्थिरपीतमाहुः (ऋ० सं० ८, २, २४, ४)"—इति। "अप्येकम्" अपि बहून् विदुषः "सख्ये" सखिभावे, कतरस्मिन् "देवसख्ये" समानख्यानतायां देवसायुज्ये इत्यर्थः। वक्ष्यति हि,—"यां यां देवतां निराह, तस्यास्तस्यास्ताद्भाव्यमनुभवति (प० का० १३, १३)"—इति। अथवा, "देवसख्ये" रमणीये स्थाने। यस्मिन् देवानां सखिभावः, तद्देवसख्यं स्थानम्, तस्मिन् देवसख्ये रमणीये स्थाने, देवलोके इत्यर्थः। किम्? इति 'स्थिरम्' अविचालिनम् अप्रच्यवनधर्माणम्। कमेवमाहुः? "विपीतार्थम्", आपीतार्थं गृहीतार्थमित्यर्थः। क एवमाह? इयमेव "वाक्" ऋक्संहिता। किञ्च,

"नैनं हिन्वन्त्यपि वाजिनेषु" । 'एनं' वागर्थज्ञं 'न हिन्वन्ति' नाननुगन्तुं शक्नुवन्ति । केषु ? 'वाजिनेषु' "वाग्ज्ञेयेषु" अर्थेषु ज्ञल्पवत्सु "अपि दुर्ज्ञेयेषु दुरवघटनीयेषु, समुद्रपिहितरत्नमिव भेषु देवतापरिज्ञानादिषु व्याकर्त्तव्येषु । स हि तान् व्याकर्तुं शक्नोति, नेतरे मन्दबुद्धयो बहवोऽपि समागता शक्नुवन्ति तान् र्थान् व्याकर्त्तुम्, यानसौ व्याकरोति । अत एतदुक्तम्,—"नैनं हिन्वन्त्यपि वाजिनेषु" । अपि एव तावदर्थज्ञः प्रशस्तः ॥

अथेदानीमविद्वानुत्तरेणार्द्धर्चेन निन्द्यते,—"अधेन्वा चरति" "अधेन्वा हि एष चरति न हि सा वाक् हितोर्ताह न परत्र च, यस्या अर्थो न परिज्ञायते । तया गृहीतयैव तामधीयान इत श्चेतश्चरति, तत्र प्रधान एव सर्वतः पर्य्यटतीत्यभिप्रायः । किञ्च मायया एव चरति गृहीतया । यथा हि कश्चिन्मायया सुवर्णं बिभृयात्, एवमयं "वाचम्" एव एतां बिभर्त्ति । सा तादृशी ध्रियमाणा "वाक्" किं करोति ? "नास्मै कामान् दुग्धे" । कतमान् ? ये तस्या वाचो दोग्धव्याः । क ? "देवताख्यानेषु मनुष्याख्यानेषु" च । "यः" । किं करोति ? य एव 'शुश्रुवान्' "श्रुतवान् भवति" । कथम् ? "अफलामपुष्पामिति" एव यः श्रुतवान् भवति, यस्य सकाशात् श्रुत्वा च दृढग्राहेण गृहीत्वा स्थितो भवति, अध्ययनादृते नान्यदस्ति वाचि किञ्चित् मूर्त्य मिति । तस्मै किम् ? इति "अफलैवास्मा अपुष्पा" च "वाग् भवतीति" । यथैव द्रष्टा पश्यति अफलामपुष्पां चेति तथैव भवतीत्यभिप्रायः । अथ "वा" "किञ्चित् पुष्पफलेति वा" ।

एतदुक्तं भवति,—अल्पफलामल्पपुष्पामिति। किङ्कारणम्? अस्ति ह्यध्ययनमात्रे किञ्चिदल्पं फलम्, नासौ परिश्रमो व्यर्थ एवेति भाष्यकाराभिप्रायः। आह,—किंपुनर्वाचः पुष्पफलम्? इति। उच्यते,—"अर्थंवाचः पुष्पफलमाह" एतस्मिन् मन्त्रे मन्त्रदृगाह। कः पुनरसावर्थः? इति। याज्ञदैवतमध्यात्ममित्येष वाचः समासतोऽर्थः। स पुनरेव रूपकल्पनया पुष्पफलविभागेन द्विधा प्रविभज्यते,—"याज्ञदैवते" पुष्पफले "दैवताध्यात्मे वा" इति। यज्ञपरिज्ञानं याज्ञम्, देवतापरिज्ञानं दैवतम्, आत्मन्यधि यद् वर्त्तते तदध्यात्मम्। स एव सर्वोऽपि मन्त्रब्राह्मणराशिरेवं त्रिधा विभक्तः। तत्रैवं सति,—यदा अभ्युदयलक्षणो धर्मोऽभिप्रेयते, तदा याज्ञपुष्पं दैवतफलम्। किं कारणम्? पूर्वं हि पुष्पं भवति फलार्थम्, याज्ञमपि पूर्वं तन्यते देवतार्थम्, इत्येतस्मात् सामान्याद् याज्ञं पुष्पम्, दैवतं फलम्। यदा पुनर्निःश्रेयसलक्षणो धर्मोऽभिप्रेयते, तदोभे एव याज्ञदैवते पुष्पत्वमेव बिभृतः। दैवते हि याज्ञमन्तर्भूतमेव तदर्थत्वात्, अतो न पृथगुच्यते। यत्र पुनरधिदैवतं सर्वमपि प्रतिविशिष्टज्ञानेनोपासकेन मुमुक्षुणा निरूप्य चेतसा आत्मानमेव प्रतिसम्पाद्यते कार्यकारणाधिदेवताद्वारेण, सोऽयमेवमधिदैवतमधियज्ञं चोच्छ्रियाध्यात्ममेवाभिसम्पादयति, तथा पुष्पभावमुच्छ्रिय पुष्पं फलभावायेति। एवं सोऽयमात्मयाज्येवाभिसम्पद्यते। तत्रैवं सति,—अध्यात्मार्थत्वादधिदैवतस्य, अध्यात्मस्य च पुरुषार्थस्य निष्पन्नत्वात्, दैवतं पुष्पम्, अध्यात्मं फलमित्युक्तम्॥ ४॥

साक्षात्कृतधर्माण ऋषयो बभूवुस्तेऽवरेभ्योऽसाक्षात्कृतधर्मभ्य उपदेशेन मन्त्रान् सम्प्रादुरुपदेशाय ग्लायन्तोऽवरे बिल्मग्रहणायेमं ग्रन्थं समाम्नासिषुर्वेदञ्च वेदाङ्गानि च बिल्मं भिल्मं भासनमिति वैतावन्तः समानकर्माणो धातवो धातुर्दधातेरेतावन्त्यस्य सत्त्वस्य नामधेयान्येतावतामर्थानामिदमभिधानं नैघण्टुकमिदं देवतानामप्राधान्येनेदमिति तद्यदन्यदैवते मन्त्रे निपतति नैघण्टुकं तत् ॥ ५ ॥

आह,—कुतः पुनरिदमायातं निरुक्तशास्त्रं प्रधानमितराणि चाङ्गानि ? इति। उच्यते,—"साक्षात्कृतधर्माण ऋषयो बभूवु."। साक्षात्कृतो यैर्धर्मः साक्षाद् दृष्टः प्रतिविशिष्टेन तपसा, त इमे साक्षात्कृतधर्माणः। के पुनस्ते ? इति। उच्यते,—ऋषयः। ऋषन्ति अमुष्मात् कर्मण एवमर्थवता मन्त्रेण संयुक्तादमुना प्रकारेणैवंलक्षणं फलविपरिणामो भवतीत्यृषयः। "ऋषिर्दर्शनात् (नै० २, ३, २)"—इति पश्यति। तदेतत् कर्मणः फलविपरिणामदर्शनमौपचारिक्या वृत्त्योक्तम्,—साक्षात्कृतधर्माण इति। न हि धर्मस्य दर्शनमस्ति, अत्यन्तापूर्वो हि धर्मः।

आह,—किन्तेषाम् ? इति। उच्यते,—"तेऽवरेभ्योऽसाक्षात्कृतधर्मभ्य उपदेशेन मन्त्रान् सम्प्रादुः"। ते ये साक्षात्कृतधर्माणस्तेऽवरेभ्यः अवरकालीनेभ्यः शक्तिहीनेभ्यः श्रुतर्षिभ्यः। तेषां हि श्रुत्वा ततः पश्चादृषित्वमुपजायते, न यथा पूर्वेषां

साक्षात्कृतधर्मणां श्रवणमन्तरेणैव। आह,—किं तेभ्य? इति। उच्यते,—ते अवरेभ्य उपदेशेन शिष्योपाधिकया वृत्त्या मन्त्रान् ग्रन्थतोऽर्थतश्च सम्प्रादुः सम्प्रदत्तवन्तः, तेऽपि चोपदेशेनैव जगृहुः।

अथ तेऽपि "उपदेशाय ग्लायन्तोऽवरे बिल्मग्रहणायेमं ग्रन्थं समाम्नासिषुर्वेदञ्च वेदाङ्गानि च"—इति। उपदेशाय उपदेशार्थम्। कथं नामोपदिश्यमानमर्थमेते शक्नुयुर्ग्रहीतुमित्येतमर्थमिहृत्य ग्लायन्तः खिद्यमानास्तेष्वनुगृह्णन्ति, तदनुकम्पया तेषामायुषः सङ्कोचमवेक्ष्य कालानुरूपाञ्च ग्रहणशक्तिम्। बिल्मग्रहणायेमं ग्रन्थं गवादिदेवपत्न्यन्तं समाम्नातवन्तः। किमेतमेव? नेत्युच्यते,—वेदं वेदाङ्गानि च इतराणीति।

कथम्पुनः समाम्नासिषुः? इति, आह,—शृणु। वेदं तावदेकं सन्तमतिमहत्त्वात् दुरध्येयमनेकशाखाभेदेन समाम्नासिषुः सुख-ग्रहणाय व्यासेन समाम्नातवन्तः। तद्यथा,—एकविंशतिधा बाह्वृच्यम्, एकशतधा आध्वर्य्यवम्, सहस्रधा सामवेदम्, नवधा आथर्वणम्। वेदाङ्गान्यपि। तद्यथा,—व्याकरणमष्टधा, निरुक्तं चतुर्दशधा इत्येवमादि। एवं समाम्नासिषुर्भेदेन ग्रहणार्थम्। कथं नाम? भिन्नान्येतानि शाखान्तराणि लघूनि सुखं गृह्णीयुरेते शक्तिहीना अल्पायुषो मनुष्याः,—इत्येवमर्थं समाम्नासिषुरिति।

बिल्मग्रहणं भाष्ययाकृतशक्तं निर्ब्रवीति,—यदेतत् "बिल्मम्" इत्युक्तम्, एतद् "भिल्मम्" वेदानां भेदनम्? भेदो व्यास इत्यर्थः। "भासनमिति वा"। अथ वा भासनमेव बिल्म-शब्देनोच्यते।

वेदाङ्गविज्ञानेन भासते प्रकाशते वेदार्थ इति। अत इदमुक्तं बिल्ममिति। एवं भिदेर्भासतेर्वा बिल्मशब्दः। एवमिदमृषिभ्यो निरुक्तशास्त्रमागतमितराणि चाङ्गानीति परिशोधित आगमः॥

अथेदानीं निघण्टुसमाम्नायविरचना वक्तव्या प्रकरणत्रयविभागेन सुखव्याख्यानार्थमस्य शास्त्रस्य। सेयमुच्यते,—"एतावन्तः समानकर्माणो धातव."—"एतावन्त्यस्य सत्त्वस्य नामधेयानि" इति। स एव पदराशिर्नैघण्टुकं नाम प्रकरणम्। एतावन्त इति या चैषु धातुषु व्याख्यातपदेषु प्रतिनियता सङ्ख्या, साभिप्रेयते। तद्यथा,—"गतिकर्माण उत्तरे धातवो द्वाविंशशतम् (नै० का० ३, २, ३)" "कान्तिकर्माण उत्तरे धातवोऽष्टादश (नै० का० ३, २, ३)—इत्येवमादि। एतावन्त्यस्य सत्त्वस्येति या नामसु प्रतिनियता सङ्ख्या, साभिप्रेयते। तद्यथा,—"पृथिवीनामधेयान्येकविंशतिः "हिरण्यनामान्युत्तराणि पञ्चदश (नै० का० २, ३, १)"—इत्येवमादि। यत्रैतावर्थौ प्रायेण चिन्त्येते, प्रसङ्गतोऽन्यद् यत् किञ्चित्। एवंलक्षणं, नैघण्टुकं नाम प्रकरणम्। गवादि, प्राग् "जहा (नैग० का० ४, १, १)"—शब्दात्।

अथ पुनर्यत्र "एतावतामर्थानामिदमभिधानम्"—इत्यर्थः प्रायेण चिन्त्यते। तद्यथा,—"आदित्योऽप्यकूपारः समुद्रोऽप्यकूपारः (नैग० का०, ३, २)"—इत्येवमादि। अनवगतसंस्कारास्य निगमाः जहादयः प्रायेण चिन्त्यन्ते, प्रसङ्गतोऽन्यद् यत् किञ्चित्। अथ पुनर्यत्र "नैघण्टुकं" "देवतानाम् अप्राधान्येन" अस्मिन् मन्त्रे "इदम्" अन्यदत्र प्राधान्येन वर्त्तत इत्ययं विभागः प्रायेण

चिन्त्यते। तद्देवलक्षणम् ऐकपदिकं नाम प्रकरणम्, जहादि, प्राक् अग्निशब्दात् (दै० का० १, ३, ६)।

दैवतं नाम प्रकरणम्, अग्निशब्दादि देवपत्न्यन्तम् (दै० का० १२, ९, १०)। तान्येतानि त्रीणि प्रकरणानि,—नैघण्टुकम्, ऐकपदिकम्, दैवतम् इति। अनेन प्रकरणत्रयविभागप्रपञ्चेनैवमवस्थितं निरुक्तशास्त्रमिति।

"तद्यदन्यदैवते मन्त्रे निपतति नैघण्टुकं तत्"। इदमुक्तं नैघण्टुकमिदं देवतानामप्राधान्येनेदमिति, तत्र न ज्ञायते किमिदमुक्तं भवति, तद्देवलक्षणत उपदिश्यत इति पर्य्युपयुक्तस्त्वब्दः। यत् अभिधानम् अन्यदैवते, अन्या यस्मिन् प्रधानदेवताः सोऽयमन्यदैवतः, तस्मिन् अन्यदैवते मन्त्रे। यमर्थमन्यस्यां प्रधानायां मन्त्रदेवतायां निपतति निगमयति अभिप्रयुज्यमानमङ्गभावं गच्छति मन्त्रवाक्ये नैघण्टुकं तदित्युच्यते गुणभूतमित्यर्थः। संज्ञा हि तस्येयमस्मिञ्छास्त्रे ॥ ५ ॥

अश्वं न त्वा वारवन्तम्। अश्वमिव त्वा बालवन्तं वाला दंशवारणार्था भवन्ति दंशो दशतेः। मृगो न भीमः कुचरो गिरिष्ठाः। मृग एव भीमः कुचरो गिरिष्ठा। मृगो मार्ष्टेर्गतिकर्मणो भीमो बिभ्यत्यस्माद्भीष्मोऽप्येतस्मादेव। कुचर इति चरतिकर्म कुत्सितमथ चेद्देवताभिधानं क्वायं न चरतीति। गिरिष्ठा गिरिस्थायी गिरिः पर्वतः समुद्गीर्णो

भवति पर्ववान् पर्वतः पर्व पुनः पृणाते प्रीणातेर्वार्द्धमास-पर्व देवानस्मिन् प्रीणन्तीति तत् प्रकृतीतरत्सन्धिसामान्यान्मेनस्थायी मेघोऽपि गिरिरेतस्मादेव तद्यानि नामानि प्राधान्यस्तुतीनां देवताना तद्दैवतमित्याचक्षते तदुपरिष्टाद् व्याख्यास्यामो नैघण्टुकानि नैगमानीहेह ॥ ६ ॥

तद्यथा,—"अश्वन्न त्वा वारवन्त वन्दध्या अग्निन्नमोभि । सम्राजन्तमध्वराणाम् ॥" (ऋ० स० १, ०, २७, १)। अस्यामृचि अश्वो नैघण्टुक, अग्नि प्रधानम्। शुन शेपस्यार्षम्। गायत्री। वारवन्तीयानुशासने विनियुक्ता। साम्नश्च वारवन्तीयस्य एषा योनि । 'अश्व न त्वा' अश्वमिव त्वा हे अग्ने! 'अग्निम्' अग्रे नेतारं देवाना, 'वारवन्त' वालवन्त वृषाश्वम्। स हि अतितरा वालवान् भवति। वन्दने परिचर्यते च। न तथान्ये। तमिव त्वा 'वन्दध्यै' वन्दामहे स्तुम । 'नमोभि' नमस्कारै, अन्नैर्वा हविर्भिरित्यर्थ। क पुनरवस्थितम्? कथ वा वन्दामहे? इति 'सम्राजन्त' दीप्यमानम् 'अध्वराणा' यज्ञाना मध्येऽवस्थितमुत्तरवेद्यादिषु धिष्ण्येषु अभिप्रेतार्थसिद्धये वन्दामहे ॥

वालशब्दस्य निगमप्रसक्तस्य निर्वचनम्,—"वाला दंशवारणार्था भवन्ति"। नैर्हि दंशादयो निवार्य्यन्ते। दंशशब्दस्य प्रसक्तस्य निर्वचनम्,—"दंशो दशते" इति। दशति हन्ति ॥

द्वितीयमुदाहरणम्,—"प्रतद्विष्णु स्तवते वीर्य्येण मृगो न

भीमः कुचरो गिरिष्ठाः। यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियन्ति भुवनानि विश्वा ॥" (ऋ० सं० २, २, २४, २)। किञ्च, "मृगो न भीमः कुचरो गिरिष्ठाः परावत आजगन्थापरस्याः। सृकं संशाय पविमिन्द्र तिग्मं वि शत्रून् ताळ्हि विमृधो नुदस्व ॥" (ऋ० सं० ८, ८, ३८, २)। इति। गयो नामेन्द्रपुत्रः, तस्यैयमार्षम्। त्रिष्टुप्। वैमृधस्य हविषो याज्या (आ० सू० २, १०)। इन्द्रोऽस्य प्रधानम्, मृगो नैघण्टुकः। 'मृगो न' मृग इव, व्याघ्रो वा सिंहो वा। 'भीमः' भीषणः। 'कुचरः' कुत्सितचरणः हिंस्रः, प्राणिवधजीवनः। 'गिरिष्ठाः' पर्वताश्रयः। स यथा कश्चिद्‌दन्यं प्राणिविशेषं हन्ति। तैरलभिभूयमान इह कर्मणि हे 'इन्द्र!' एतत्समस्मद्वचः कुरु। 'सृकम्' यः शत्रुकार्येषु सत्तु शक्नोति। 'परावतः' परस्मात् अतिदूरस्थानात्, 'परस्याः' दिवः सम्बन्धिन 'आजगन्थ' आगच्छ। एतदर्थमागत्य च ते 'पविं' वज्रं 'संशाय' तीक्ष्णीकृत्य 'तिग्मं छेदनायोत्साहवन्तं सुनिशितं कृत्वा ततो 'वि ताळ्हि' विताडय, एतानस्मच्छत्रून् ('शत्रून्') एकप्रहारवर्जितदेहान् कुरुष्व। यानपि च स हि हिनस्ति कथञ्चित् तानपि 'मृध' हिंसकान् 'विनुदस्व' नानाप्रकारं प्रेरयस्व दूरमपुनरागमनाय ॥

"अथ चेद् देवताभिधानम्" एतत् कुचर इति, ततः "क्वायं न चरतीति" सर्वत्र चरतीति। "गिरिष्ठा मेघस्थायी" इति च। [अनुपश्चीणशक्तयो हि विभवो वेदशब्दा यथायदा न युञ्जन्तो पुरुषाणामर्थाभिधानेषु विपरिणममानाः सर्व-

इति निरुक्तटीकायां जम्बूमार्गाश्रमवासिन आचार्यभगवद्दुर्गस्य कृतौ षष्ठोऽध्यायः (प्रथमोऽध्यायः) समाप्तः ॥१॥

(समाम्नायस्तत्रचतुष्ट्वमतोऽन्येऽथनिपातावायुर्वात्वानन्नूनंनूनंसातकृचान्त्वोऽक्षण्वन्तोनिष्ट्वक्त्रासोहविर्भिरितीमान्यथापियोयथोहिन्वथापीदमर्थवन्तोऽथापीदंस्थाणुरयमुतत्वःपश्यन्नुतत्वंसख्येविंशतिः ॥)

इति निरुक्ते पूर्वषट्के प्रथमोऽध्यायः ॥१॥

अथ द्वितीयाध्यायस्य

प्रथमः पादः ।

—:०:—

ॐ३म् । अथ निर्वचनं तद्येषु पदेषु स्वरसंस्कारौ समर्थौ प्रादेशिकेन गुणेनान्वितौ स्यातां तथा तानि निर्ब्रूयादथानन्वितेऽर्थे प्रादेशिके विकारेऽर्थनित्यः परीक्षेत केनचिद् वृत्तिसामान्येनाविद्यमाने सामान्येऽप्यक्षरवर्णसामान्यान्निर्ब्रूयान्न त्वेव न निर्ब्रूयान्न संस्कारमाद्रियेत विशयवत्यो हि वृत्तयो भवन्ति यथार्थं विभक्तीः सन्नमयेत् प्रत्तमवत्तमिति धात्वादी एव शिष्येते ॥१॥

"अथ निर्वचनम्" । नामाख्यातोपसर्गनिपातलक्षणमुक्त्वा शास्त्रारम्भप्रयोजनानि च वेदाङ्गव्यूहं च सप्रयोजनं निघण्टुसमाम्नायविरचनाञ्च प्रकरणत्रयविभागेनोक्त्वा दैवतमुत्क्रम्य नैघण्टुकनैगमे प्रकरणे पुरस्तात् नैघण्टुकानि नैगमानीहेति । ते पुनरेते निर्वचनलक्षणमनुक्त्वा न शक्येते व्याख्यातुं यस्मात्, 'अथ' एतस्मात् कारणात् 'निर्वचनम्' लक्षणतो व्याख्यास्याम

इति शेष । अपि हि तस्यार्थस्य परोक्षवृत्तावतिपरोक्षवृत्तौ वा शब्दे नि रुप्य विगृह्य वचनं निर्वचनम् । स एव निर्वचनाभ्युपाय इत्युच्यते ॥

इह द्विधा शब्दा,—समर्थस्वरसंस्काराश्च असमर्थस्वरसंस्काराश्च। "तत्" तत्रैव सति, "येषु" तावत् "पदेषु" "स्वरसंस्कारौ समर्थौ" अवैपरीत्येन "प्रादेशिकेन" च "गुणेनान्वितौ स्याताम्"। प्रदेशाभिधायिना धातुरूपेणान्वितौ सम्बद्धावनुगतावभिधेयस्थे धातुरूपे स्याताम् ॥

"तानि" तावत् "तथा" एव यथालक्षणमेवमेषु नैरुक्तो 'निर्ब्रूयात्"। तस्मा भूदित्यत इदमुच्यते,—"येषु पदेषु स्वरसंस्कारौ समर्थौ स्याता तथा तानि निर्ब्रूयात्" इति ॥

"अथानन्वितेऽर्थेऽप्रादेशिके विकारेऽर्थनित्य परीक्षेत केनचिद्वृत्तिसामान्येन"। अथ पुनरनन्वितेऽर्थे न्यायस्वरसंस्कारयुक्तेन शब्देन यत्र निपुणमप्यन्विष्यमाण शब्दोऽर्थो कल्पयितु न शक्यते, अन्यथैवार्थो व्यवतिष्ठते,—अन्यथैव शब्द । प्रादेशिकेन विकारेण विनियमाणेऽपि चार्थौ शब्दो निपरिणम्यमान अप्रादेशिक एव स्यादसमार्थ एव। ता प्रदेशाख्यामभिधेयसत्त्वस्था नियाममभिधातुमाह। तत्र किं कर्त्तव्यम्? इति। उच्यते,—तथैवं सति अर्थनित्यो भूत्वा, अर्थप्रधान । तद्यथा, —मुद्गनित्यमेवास्य भोजनमित्युक्ते मुद्गप्रधानमिति गम्यते, एवमिहापि अर्थनित्य इत्युक्ते अर्थप्रधान इति गम्यते, अर्थप्राधान्येनानादृत्य स्वरसंस्कारौ परीक्षेत। ततस्तदभिधानं बुद्ध्या

केनचिदर्थवृत्तिसामान्येन क्रियागुणसामान्येनेत्यर्थः। कतमस्य धातोरर्थसामान्यमत्रास्तीति ? ततस्तर्कयित्वा सामान्यं तेन निर्ब्रूयात्। अर्थो हि प्रधानम्, तद्गुणभूतं शब्दः। तस्मात् अर्थसामान्यं बलीयः शब्दसामान्यात्॥

अथ पुनर्यत्रार्थसामान्यमपि नास्ति, तत्र ? "अविद्यमाने-(ऽर्थ)सामान्येऽप्यक्षरवर्णसामान्यान्निर्ब्रूयात्, न त्वेव न निर्ब्रूयात्, न संस्कारमाद्रियेत, विषयवत्यो हि वृत्तयो भवन्ति, यथार्थं विभक्तीः सन्नमयेत्"। स्वरवर्ण सामान्येनापि निर्ब्रूयादेव,—अमुष्मिन् धातावयं स्वरो वर्णो वा मया दृष्टः, स एव यस्मिन्नभिधाने लक्ष्यते इत्येवमुत्प्रेक्ष्य स धात्वर्थः सन्नद्ध इव तस्मिन्नभिधाने आहृत्य संस्कारीकृत्य कृत्स्नः प्रकाशयितव्यः। एवमविद्यमाने अर्थसामान्ये स्वरवर्णसामान्यमात्रेणापि निर्ब्रूयादेव। नत्वेव निर्ब्रूयात्, इतरथा ह्यनर्थकमेव निरुक्तशास्त्रं स्यात्। तन्मा भूदित्यत इदमुच्यते लक्षणपराङ्मुखेषु शब्देषु न संस्कारमाद्रियेत।

किन्तर्हि अर्थसामान्यमाद्रियेत, शब्दसामान्यं वा ? तद्यथा,—प्रवीणोदारनिस्त्रिंशशब्दा उत्कृष्टत्वार्थाभिधेयसम्बन्धाः सन्तः क्रियागुणं सामान्यं हेतुमात्रमाश्रित्यान्येष्वेवार्थान्तरेषु वर्त्तन्ते।

तद्यथा,—प्रकृष्टो वीणायां प्रवीणो गान्धर्वे, अत्र ह्यस्य मुख्या वृत्तिः। स एव स्वमर्थमभिधेयमुत्सृज्यैव गान्धर्वमभ्यासपाटवमात्रसामान्यमाश्रित्य सर्वत्रैवाभिप्रवृत्तः, यो हि यस्मिन् कृतयत्न उत्पन्नकौशलो भवति, स तत्रोच्यते प्रवीण इति। तद्यथा,—'प्रवीणो व्याकरणे', 'प्रवीणो निरुक्ते' इति।

एवमेवोदार इति। प्रागारसनिपातात् आकृतेनैव सारथ्यौ वहत्यश्वोऽलङ्वान् वा स उद्गतारत्वादुदार। तत्र हि समञ्जसा वृत्तिरस्य शब्दस्य। स एव उत्सृज्यैव स्वमर्थमाकृतानुविधायित्वमात्रमेव सामान्यमाश्रित्य प्रवृत्तो यो हि कश्चित् कस्मैचिदाकृत लक्षयित्वा प्रागेव प्रार्थनात् ददाति, स उदार इत्युच्यते।

एवमेव निस्त्रिंश। त्रिभि प्रदेशैर्द्वाभ्यां धाराभ्यामग्रेण च निशित श्यतीति निस्त्रिंश खड्ग, मुख्यग्रहणात्, तत्र ह्यस्य शब्दस्य समञ्जसा वृत्ति। स एव छेदनसमानरूप क्रौर्यसामान्यमाश्रित्य सर्वत्रैव प्रवृत्त। यो हि लोके क्रूरो भवति, स निस्त्रिंश इत्युच्यते। एवमेते क्रियागुणसामान्यमात्रेण वर्त्तन्ते।

यथैते, एवमन्येऽप्यभ्यूहितव्या। अभ्यूह्य च एवमर्थसामान्येन निर्वक्तव्या। स्वरवर्णसामान्ये तु प्रचुराण्येवोदाहरणानि। सर्व एव हि नैगमा शब्दा जहादय स्वरवर्णसामान्यमात्रेणैव निरुच्यन्ते॥

न च निरुक्ते कारकहारकलावकादिशब्दा व्युत्पाद्यन्ते, सुगोधैव हि तेषां व्युत्पत्ति प्रसिद्धैव च व्याकरणे इति। य एव दुर्बोधा परोक्षातिपरोक्षवृत्तय निरमृदरोदारवैतसपर्वशब्दादय, त एव हि व्युत्पाद्य निरुच्यन्ते। तेषु हि विशेषेणार्थवत्ता निरुक्तस्य। तान्येव अर्थसामान्येन वा शब्दसामान्येन वा निब्रूयात्, न तेषु संस्कारमाद्रियेतेति।

आह,—किं कारणम्? इति। उच्यते,—"विषयवत्यो हि वृत्तयो भवन्ति"। हिरयं हेत्वर्थे। तस्माद्विषयवत्यो बहुसंशयवत्यः शब्दानामर्थेषु वृत्तयो भवन्ति, नानाभावेनार्थेषु अवस्थिता प्रवृत्तिरिति एवं स्यादेवं स्यादिति विचारयन्तः सन्तः प्रतिपक्षसम्मोहाच्छेरत इवास्मिन्निति विषयः संशय इति।

अत्र,—केचिदर्थसामान्येन कनिक्रत्तन्ते शब्दाः, केचित् स्वरसामान्येन, केचिद्वर्णसामान्येन, यत एवम्, अतो विभक्तीरपि यथार्थमेव सन्नमयेत् विपरिणमयेत्, पूर्वोत्तरपदप्रकरणाविरोधेन। किं कारणम्? तासामपि हि व्यत्ययो भवत्येव,—सुपां स्थाने सुपो भवन्ति इति हि वैयाकरणा पठन्ति। दर्शयिष्यति न्यायमपि विभक्तिविपरिणामम्। तद्यथा,—"इत्सु शोकौ ०—०हृदयानि शोकैः (दै० का० ६, ३, १२)"—इत्येवमादि।

अधुनैवमुक्त्वा विषयवत्यो भवन्तीति, अर्थवदेन व्याकरणेऽपि शब्दविपरिणामो भवतीत्येवं दर्शयति,—"प्रत्तमवत्तमिति धात्वादी एव शिष्येते" इत्येवमादि। 'डु दाञ् दाने (जु० उ०)' तस्य प्रपूर्वस्य प्रत्तमिति। अत्र दकार आकारश्च धातुः, परो निष्ठाप्रत्ययस्तकारः, तत्रैवं सति 'दो दद् घोः (पा० ७, ४, ४६)'—इति वर्त्तमाने 'अच उपसर्गात् तः (पा० ७, ४, ४७)'—इति आकारस्य तकारो भवति, 'झरो झरि सवर्णे (पा० ८, ४, ६५)'—इति धात्वन्तस्य तकारस्य लोपे कृते, 'खरि च (पा० ८, ४, ५५)'—इति तकारस्य चर्त्वे कृते 'परः सन्निकर्षः संहिता (पा० १, ४, १०९)'—इति धातुतकारः प्रत्ययतकारेण संयोगतामपैति

'हलोऽनन्तरा संयोगः (पा० १, १, ७)'—इति, तत प्रादिस मासे कृते 'प्रत्तम्'—इति भवति। एवमेव 'दो अवखण्डने (दि० प०)'—इत्यस्यावपूर्वस्य 'अवत्तम्'—इति। अत्रापि दकार ओकारश्च धातुः, परा निष्ठातकारः। अत्र 'आदेच उपदेशेऽशिति (पा० ६, १, ४५)'—इत्योकारस्याकारे कृते तभावलोपवत्वे परगमनप्रादिसमासा पूर्ववदेव। एवमनयोर्धात्वोरादी एव शिष्येते। यथानयोरेवमन्येषामपि दृष्ट्वा यथासम्भवमनु विधेयम्॥ १॥

अथाप्यस्तेर्निवृत्तिस्थानेष्वादिलोपो भवति स्तः सन्तीत्यथाप्यन्तलोपो भवति गत्वा गतमित्यथाप्युपधालोपो भवति जग्मतुर्जग्मुरित्यथाप्युपधाविकारो भवति राजा दण्डीत्यथापि वर्णलोपो भवति तत्त्वा यामित्यथापि द्विवर्णलोपस्तृच इत्यथाप्यादिविपर्ययो भवति ज्योतिर्घनो विन्दुर्वाट्य इत्यथाप्याद्यन्तविपर्ययो भवति स्तोका रज्जुः सिकतास्तर्कित्यथाप्यन्तव्यापत्तिर्भवति॥ २॥

"अथाप्यस्तेर्निवृत्तिस्थानेष्वादिलोपो भवति, स्तः सन्तीति"। 'अस् भुवि (अदा० प०)'—इत्यस्य निवृत्तिस्थानेषु गुणवृद्धि निवृत्तिस्थानेषु क्ङितीति वर्त्तमाने 'श्नसोरल्लोपः (पा० ६, ४, १११)' —इत्यादिलोपो भवति। योऽयं धात्वादावकार एवं लुप्यते,

तस्मिन् लुप्ते प्रयोगः स्तः सन्तीति। एवमन्येषामपि द्रष्टव्यानुविधेयं यथासम्भवम् ॥

"अथाप्यन्तलोपो भवति, गत्वा गतमिति"। अत्र, गमेः (भू० प०) क्त्वाप्रत्यये, निष्ठाप्रत्यये च परतोऽनुनासिकलोपो भवति, अनुदात्तोपदेशेत्यधिकृत्य क्ङितीति। एवमन्येष्वपि द्रष्टव्यमनुविधेय च यथासम्भवम् ॥

"अथाप्युपधालोपो भवति, जग्मतुर्जग्मुरिति"। अत्र, गमेः (भू० प०) अलोपः। 'अलोन्त्यात् पूर्व उपधा (पा० १, १, ६५)'—इत्युपधा सञ्ज्ञा, तस्य 'गमहनजनखनघसां (पा० ६, ४, ६८)'—इत्युपधालोपः। एवमन्येषामपि द्रष्टव्यमनुविधेयं यथासम्भवम् ॥

"अथाप्युपधाविकारो भवति, राजा दण्डीति"। राजन्, दण्डिन् इति स्थिते 'नोपधायाः (पा० ६, ४, ७,)'—'सर्वनामस्थाने चासम्बुद्धौ (पा० ६, ४, ८)'—इति दीर्घत्वम्,—दण्डिन्नित्यत्रापि 'इन्हन्पूषार्य्यम्णां शौ (पा० ६, ४, १२)'—'सौ च (पा० ६, ४, १३)'—इति दीर्घत्वम्, 'नलोपः प्रातिपदिकान्तस्य (पा० ८, २, ७)'—इत्युभयोरपि नकारलोपे कृते राजा दण्डीति। एवमुपधाविकारो भवति ॥

"अथापि वर्णलोपो भवति, तत्त्वा यामीति"। अत्र चकारलोपः। याचामीत्येवमेतद् द्रष्टव्यम्। अयञ्च छान्दस एव। अत एव च छान्दसत्वादेवमेव याच्ञाकर्मस्वयं पठितः "यामि" (३५४ पृ०) "मन्महे" (३५४ पृ०) इति। भाषायां याचे इति भवति ॥

"तत्त्वा यामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः। अहेळमानो वरुणेह बोध्युरुशंस मा न आयुः प्रमोषीः॥" (ऋ० सं० १, २, १५, १)। किञ्च "तत्त्वा यामि सुवीर्यं तद् ब्रह्म पूर्वचित्तये, येना यतिभ्यो भृगवे धने हिते येन प्रस्कण्वमाविथ॥" (ऋ० सं० ५, ७, २६, ४)।—इत्यनया त्रिष्टुभा उपाकृतः शुनःशेपो वरुणं तुष्टाव। आज्याहुतिरनया साग्निकेषु क्रतुषु समिष्टयजुष उत्तरकालं हूयते। चतुर्मास्येषु च वरुणप्रघासेषु वारुणस्य हविषो याज्यैषा। हे 'वरुण!' 'तत्' अहं 'त्वा' वरुणं 'यामि' याचे इत्यर्थः। किम्? यत् ममाभिप्रेतम्। कथं पुनर्याचे? 'ब्रह्मणा' ऋग्यजुःसामाख्येन 'वन्दमानः' स्तुवन्। किञ्च यदेव त्वं मया याच्यसे, 'तत्' एव अयमपि 'यजमानः' 'हविर्भिः' संस्कृतैः सान्नाय्यादिभिः 'आशास्ते'। तावावां भवन्तमेकमेवार्थं याचावहे, स्तुतिभिर्हविर्भिश्च। स त्वम् 'अहेळमानः' अक्रुध्यन्। सर्वो हि याच्यमानः क्रुध्यतीत्यत एवमुच्यते॥ हे 'वरुण!' 'बोधि' बुध्यस्व। बुद्ध्वा चैतमावयोरभिप्रेतार्थं कुरु। उरुशंसेत्येक पदं सम्बोधनञ्च। हे 'उरुशंस' बहुस्तुत्य! वरुण! 'मा' 'नः' अस्माकं याचमानानाम् 'आयुः' 'प्रमोषीः'। कुरु नोऽभिप्रायसिद्धिमित्यभिप्रायः॥

"अथापि द्विवर्णलोपस्तृच इति" अत्र ऋवर्णरेफयोर्लोपः। स लुप्यते ऋवर्णेन साकम्॥

"अथाप्यादिविपर्ययो भवति, ज्योतिर्घनो विन्दुर्वाट्य इति"। 'द्युत दीप्तौ (भ्वा० आ०)' तस्यादिव्यापत्त्या ज्योतिः। 'हन हिंसा-

गत्योः (भ्वा० प०) तस्य घन इति। 'भिदिर विदारणे (रु० उ०)' तस्य बिन्दुः। 'भट भृतौ (भू० प०)'। तस्य वाट्यः॥

"अथाप्याद्यन्तविपर्ययो भवति, स्तोका रज्जुः सिकता-स्तर्क्विति"। 'श्चुतिर् क्षरणे (भू० प०)' तस्याद्यन्तविपर्ययेण स्तोकाः। 'सृज विसर्गे (दि० आ, तु० प०)' तस्य रज्जुः। 'कस विकसने (भू० प०)' तस्य सिकता। 'कृती छेदने (तु० प०), तस्य तर्कु॥

"अथाप्यन्तव्यापत्तिर्भवति" ॥ २ ॥

ओघो मेघो नाधो गाधो वधूर्मध्वित्यथापि वर्णोपजन आस्थद्वारो भरूजेति तद्यत्र स्वरादनन्तरान्तस्थान्तर्धातु भवति तद्द्विप्रकृतीनां स्थानमिति प्रदिशन्ति तत्र सिद्धायामनुपपद्यमानायामितरयोपपिपादयिषेत्तत्राप्येकेऽल्पनिष्पत्तयो भवन्ति तद्यथैतदूतिर्मृदुः पृथुः पृषतः कुणारुमित्यथापि भाषिकेभ्यो धातुभ्यो नैगमाः कृतो भाष्यन्ते दमूनाः क्षेत्रसाधा इत्यथापि नैगमेभ्यो भाषिका उष्णं घृतमित्यथापि प्रकृतय एवैकेषु भाष्यन्ते विकृतय एकेषु ॥ ३ ॥

"ओघो मेघो नाधो गाधो वधूर्मध्विति"। 'वह प्रापणे, (भू० प०)' तस्यान्तव्यापत्त्या ओघः। 'मिह सेचने (भू० प०)' तस्य मेघः। 'णह बन्धने (दि० उ०)' तस्य नाधः। 'गाह

विलोडने (भू० आ०)' तस्य गाधः। 'वह प्रापणे (भू० उ०)' तस्य वधूः। 'मद तृप्तौ (चु० आ०)' तस्य मधु॥

"अथापि वर्णोपजन', आस्थद्वारो भरूजेति"। 'अस क्षेपणे (दि० प०)' तस्य आस्थत्। 'वृङ् सम्भक्तौ (क्र्या० आ०)' तस्य द्वारः। 'भ्रस्ज पाके (तु० उ०)' तस्य भरूजः॥

एवं व्याकरणेऽपि लक्षणप्रधाने सति अर्थवशेन लोपागमौ विपरिणामश्च शब्दानां दृष्टः, किमुत निरुक्ते यदर्थप्रधानमेव। तस्मात् साधूक्तम्,—"अथानन्वितेऽर्थेऽप्रादेशिके विकारेऽर्थनित्यः परीक्षेत केनचिद् वृत्तिसामान्येनाविद्यमाने सामान्येऽप्यक्षरवर्ण-सामान्यान्निर्ब्रूयात्" "विभक्तीः" अपि "यथार्थं" "सन्नमयेत्" इति॥ एवमयमादिमध्यान्तलोप आदिमध्यान्तविकारो वर्णलोपो द्विवर्णलोप आदिविपर्यय आद्यन्तविपर्ययो वर्णोपजनश्छन्दसि भाषायाञ्च द्रष्टव्या, दृष्ट्वा च यथासम्भवमनुविधेयम्॥

अतः परं सम्प्रसारणचिन्ता वर्त्तिष्यते, तदर्थमिदमारभ्यते—"तत्र स्वरादनन्तरान्तस्थान्तर्धातु भवति, तद्विप्रकृतीनां स्थानमिति प्रदिशन्ति"। सम्प्रसार्य्यप्रकृतयश्चासम्प्रसार्य्यप्रकृतयश्चोभयप्रकृतयश्च धातवः। तत्रैवं सत्युभयप्रकृतिषु शास्त्राविषयगतं यद्वक्तव्यं 'तत्' इदमुच्यत इति पर्य्युपयुक्तम्—

'तत्' एतदेव लक्षणं धातुरूपं हि 'द्विप्रकृतीनां' द्विस्वभावानां शब्दानां 'स्थानम्' आश्रयः 'इति' एवमाचार्य्याः 'प्रदिशन्ति' प्रविभागेनोपदिशन्ति।

तद्यथा,—'यज देवपूजासङ्गतिकरणदानेषु (भू० उ०)'—इति। अत्र द्वे शब्दप्रकृती भवतः। सम्प्रसारणपक्षे तावत्,—इष्टवान्, इष्टः, इष्ट्वा, एताः शब्दप्रकृतयो भवन्ति। असम्प्रसारणपक्षे पुनः,—यष्ट्वा, यष्टुं, यष्टव्यमित्येताः॥

"तत्र सिद्धायामनुपपद्यमानायामितरयोपपिपादयिषेत्"। 'तत्र' एवं सति एकप्रकारेण 'सिद्धायाम्' अर्थसिद्धौ 'अनुपपद्यमानायाम्', 'इतरथा' 'उपपिपादयिषेत्' उपपादयितुमिच्छेत्। अर्थं द्वयोः सम्प्रसारणासम्प्रसारणप्रकृत्योर्यथैवोपपद्यतेऽर्थतस्तथैवोपपादयेत्। अथवोभयथाप्यनुपपद्यमानेऽर्थे स्वयमुत्पाद्य निर्द्धार्य्य यथा यथोपपद्यतेऽर्थः तथा तथोपपादयेत्, अपि तल्लक्षणशास्त्रविहितेनार्थसाधनोपायेन, अर्थस्य प्रधानत्वात्।

"तत्राप्येकेऽल्पनिष्पत्तयो भवन्ति"। 'तत्रापि' एतस्मिन्नपि सम्प्रसारणलक्षणे सति "एके" धातवः 'अल्पनिष्पत्तयो भवन्ति' अल्पेषु शब्दरूपेषु सम्प्रसारणप्रकृतिरभिनिष्पद्यते तदप्युपेक्षितव्यम्॥

"तद्यथैतदूतिर्मृदुः पृथुः पृषतः कुणारुमिति"। 'तद्यथा' एतदुदाहरणजातम्,—ऊतिः, मृदुः, पृथुः, पृषतः, कुणारुम् इति। अवतेर्गत्यर्थस्य (भू० प०) क्तिन्प्रत्यये परतः 'च्छ्वोः शूडनुनासिके च (६, ४, २० ११)'—इति वर्त्तमाने 'ज्वरत्वरश्रिव्यवि-

मवामुपधायाश्च (६, ४, २०)"—इत्यूड्भाव क्रियते, तत ऊति रिति भवति। 'म्रद मर्दने (भू० आ०)', तस्य मृदु, रेफ सम्प्रसार्यमाण ऋकारो भवति? एवमेव 'प्रथ प्रख्याने (भू० आ०)', तस्य पृथु। 'प्रुष दाहे (भू० प०)', तस्य पृषत। 'क्वण शब्दार्थ (भू० प०)', कुणार ॥

एवमपि सम्प्रसार्यासम्प्रसार्यविशेषपरिज्ञेयशब्दान् निर्ब्रुवता पुनः "अथापि भाषिकेभ्यो धातुभ्यो नैगमा कृतो भाष्यन्ते"। 'अथापि' इदमपरमुपेक्षितव्यमागमशब्दान् निर्ब्रुवता। आह,—किम्? इति। उच्यते,—'भाषिकेभ्यो धातुभ्य' भाषाया ये प्रायेण प्रसिद्धप्रयोगास्ते भाषिकास्तेभ्य। 'नैगमा' छन्दो विषया। 'कृत' कृत्प्रत्ययान्ता शब्दा। भाष्यन्ते' विनियन्ते निरुच्यन्त इत्यर्थ ॥

तद्यथा,—"दमूना क्षेत्रसाधा इति"। 'दम उपशमे (दि० प०)' "तस्य, भाषाया दाम्यति अनड्वान्, शमयति अनड्वाहम् दान्त अनड्वान् इत्येवमादय प्रयोगा भवन्ति छन्दसि पुन दमूना अग्निरुच्यते स भाषासामान्ये न केनचिन्निर्वक्तव्य दममना इत्येव मादिना। एवमेव साध्यतेर्भाषाप्रयोगवृत्ते साधा इति। "मित्र न क्षेत्रसाधसम् (ऋ० म० ३, २, ८)"—इत्येवमादयो मित्रमिव क्षेत्रसाधनमित्येवमादिना प्रकारेण निर्वक्तव्या ॥

"अथापि नैगमेभ्यो भाषिका"। निगमे छन्दसि ये प्रायो वृत्त्या प्रसिद्धा, तेभ्य सामान्य गृहीत्वा 'भाषिका, कृत्प्रत्ययान्ता भाष्यन्ते विनियन्ते।

तद्यथा,—"उष्णं घृतमिति"। 'उष दाहे (भू० प०)' एष प्रायेण छन्दसि प्रसिद्धः,—"प्रत्युष्टं रक्षः प्रत्युष्टा अरातयः (य० वा० सं० १, ७)"—इत्येवमादि। भाषायां पुनरुष्णमिति श्रूयते। स एषो नैगमशब्दसामान्येन निर्वक्तव्यः। एवमेव 'घृ क्षरणदीप्त्योः (भू० प०)' तस्य, छन्दसि "आ त्वा जिघर्मि (य० वा० सं० ११, २३)"—इत्यादिषु सिद्धः प्रयोगः, भाषायां पुनः घृतमिति श्रूयते। स एवं जिघर्तेरेव छान्दसस्य सामान्ये निर्वक्तव्यः। एवं भाषाविषयेभ्यश्छन्दोविषया निर्वक्तव्याः, छन्दोविषयेभ्यश्च भाषाविषयाः॥

अथापीदमपरमुपेक्षितव्यमनेन शब्दान् निर्ब्रुवता। आह,—किम्? इति। उच्यते,—"अथापि प्रकृतय एवैकेषु भाष्यन्ते, विकृतय एकेषु"। एकेषु प्रदेशेषु प्रकृतय एव धातुशब्दानां भाष्यन्ते, विकृतय एकेषु। धातोराख्यातपदभावेन यः प्रयोगः, सा प्रकृतिः। नामभूतस्य तस्यैव यः प्रयोगः, सा विकृतिः॥२॥

शवतिर्गतिकर्मा कम्बोजेष्वेव भाष्यते कम्बोजाः कम्बलभोजाः कमनीयभोजा वा कम्बलः कमनीयो भवति विकारमस्यार्येषु भाषन्ते शव इति दातिर्लवनार्थे प्राच्येषु दात्रमुदीच्येष्वेवमेकपदानि निर्ब्रूयाद्य तद्धितसमासेष्वेकपर्वसु चानेकपर्वसु च पूर्वं पूर्वमपरमपरं प्रविभज्य निर्ब्रूयात् दण्ड्यः पुरुषो दण्डमर्हतीति वा दण्डेन सम्पद्यत इति

वा दण्डो ददतेर्द्धारयतिकर्मणोऽक्रूरो ददते मणिमित्यभिभाषन्ते दमनादित्यौपमन्यवो दण्डमस्याकर्षतेति गर्ह्यायाम् ॥ ४ ॥

"शवतिर्गतिकर्मा" गत्यर्थो धातु "कम्बोजेष्वेव भाष्यते" म्लेच्छेषु प्रकृत्या प्रयुज्यते, आख्यातपदभावेन। शवति गच्छतीत्यर्थ। उदाहरणविशेषप्रसक्त कम्बोजशब्दो निरुच्यते,—"कम्बोजा कम्बलभोजा" ते हि प्रायेण कम्बलानुपभुजन्ते, हिमप्रायत्वात्तस्य देशस्य। "कमनीयभोजा वा" कमनीयानि प्रार्थनीयानि चैते हि द्रव्याणि उपभुजन्ते प्रचुरत्वात् हि स देश इति। कम्बलशब्द विग्रहप्रसक्त निर्ब्रवीति,—"कम्बल कमनीयो भवति" प्रार्थनीयो हि स शीतार्त्तैर्भवति। "विकारमस्यार्य्येषु भाषन्ते शव इति" आर्य्येषु जनपदेषु अस्यैव शवतेर्विकार भाषन्ते, मृतकनामधेयभूतमेव प्रयुञ्जते, कथम्? शव इति। एवमेतेष्वाख्यातस्थ एव प्रयुज्यते, नामीभूतएतेषु,—इत्येतन् प्रकृतिन्त्व विकारत्त्व च। अथवा चेतनावत्त्वेतेषु गमनक्रियायोगिनि द्रव्ये प्रयुज्यते, एतेषु पुनश्चेतनारहित एव,—इत्येतन् प्रकृतित्व विकारत्वञ्च॥

द्वितीयमुदाहरणम्।—"दातिर्लवनार्थे प्राच्येषु"। दाति र्धातुराख्यातस्थो लवनार्थे प्राच्येषु जनपदेषु प्रयुज्यते। तद्यथा,—व्रीहीन् दाति, यवान् दाति। अयमेव नामीभूत 'उदीच्येषु' जनपदेषु प्रयुज्यते 'दात्रम्' इति। दीयते अनेनेति दात्रम्, लूयत इत्यर्थ॥

"एवमेकपदानि निर्ब्रूयात्" अनेन प्रकारेण एकपदानि निर्ब्रूयात्,—भाषानिगमव्यवस्थया, देशभाषाप्रसिद्धिविभागेन च ॥

आह,—एवं तावदतद्धितयुक्तेषु पदेष असमासयुक्तेषु च निर्वचनम्। अथ पुनर्यानि तद्धितयुक्तानि समासयुक्तानि च पदानि तानि कथं निर्वक्तव्यानि?—तानि किं तद्धितयुक्तेषु पदेषु पूर्वपदार्थो निर्वक्तव्यः उत तद्धितार्थसमासयुक्तेष्वपि? किं पदार्थः पूर्वम् उत समासार्थो वा पूर्वम्? इति। उच्यते,—"अथ तद्धितसमासेष्वेकपर्वसु चानेकपर्वसु च पूर्वं पूर्वमपरमपरं प्रविभज्य निर्ब्रूयात्"। अथशब्दो विशेषाधिकारार्थः। 'तद्धिताः (पा० ४, १, ७६)'—इत्यधिकृत्य ये प्रत्यया विहिताः, ते तद्धिताः, 'समर्थः पदविधिः (पा० २, १, १)'—इत्यधिकृत्य ये विहिताः, ते समासाः। तेषूभयेष्वपि तद्धितसमासेषु अविशेषेण एकपर्वसु चानेकपर्वसु च एकपदेषु चानेकपदेषु च। तद्यथा,—दण्ड्यः इत्येकपदस्तद्धितः, धार्ष्यायणिरित्यनेकपदः। अनेकानि ह्येव पदानि स्वात्मन्यन्तर्णीय प्रवर्त्तते। तद्यथा,—वृषस्यापत्यं वार्ष्यः, वार्ष्यस्यापत्यं वार्ष्यायणः, तस्यापि वार्ष्यायणिरिति। एवं समासेष्वप्येकपदेषु चैवं निर्ब्रूयात्। यथा वक्ष्यामः,—एकशेषः एकपदः समासः। 'सरूपाणामेकशेष एकविभक्तौ (पा० १, २, ६४)'—इति। तद्यथा,—पुरुषश्च पुरुषश्च पुरुषौ, पुरुषश्च पुरुषश्च पुरुषश्च पुरुषाः इत्येवम्।

"द्विगुर्द्वन्द्वोऽव्ययीभावः कर्मधारय एव च।
पञ्चमस्तु बहुव्रीहिः षष्ठस्तत्पुरुषः स्मृतः॥"

एतेऽनेकपदाः समासाः। पाणिनेः सूत्रम्,—'सङ्ख्यापूर्वो द्विगुः (पा० २, १, ५२)'। पञ्चमूली, पञ्चरथी, दशरथी इत्येवमादि। सूत्रम्,—'चार्थे द्वन्द्वः (पा० २, २, २९)'। स च पुनर्विभाषयैकवद् भवति। तद्यथा,—प्लक्षन्यग्रोधौ, अहिनकुलम्, भीमार्जुनवासुदेवाः इत्यादि। उपसर्गनिपातपूर्वकोऽव्ययीभावः। तद्यथा,—उपमणिकम्, अनुसमुद्रम्, व्यभ्रम्, इत्येवमादि। तुल्यविभक्तिलिङ्गयोरुभयोः पदयोः समानाधिकरणः कर्मधारयः। तद्यथा,—कृष्णमृगः, रक्तोऽश्वः, श्वेतपताका इत्येवमादि। एतेष्वेकपर्वसु चानेकपर्वसु च तद्धितसमासेषु पूर्वं पूर्वमेव निर्ब्रूयाद-परमपरमेव प्रविभज्य विगृह्णीयाः स्यर्थः। पूर्वं तद्धितार्थं निर्ब्रूयात, पश्चात् पदार्थम्। समासेष्वपि,—पूर्वं समासार्थम्, पश्चात् पदार्थम्॥

तदेतत् उदाहरणेनैव दर्शयति, तद्यथा,—"दण्ड्यः पुरुषो दण्डमर्हतीति वा दण्डेन सम्पद्यत इति वा"। दण्ड्य इत्येष तद्धितः, पुरुषशब्दविशेषणम्। पूर्वं तावत् तद्धितार्थं निर्वक्ति,—कस्मिंश्चिदपराधे दण्डमर्हतीति दण्ड्यः दण्डेन वा कार्षापणादिना यः सम्पद्यते संयुज्यते स दण्ड्यः।

अधुना पदार्थनिर्वचनम्,—"दण्डो ददतेर्धारयतिकर्मणः"। ददतेः धारयत्यर्थे वर्त्तमानस्य, धार्य्यते हि तेनाऽपराधेषु राजभिः।

आह,—क्व पुनः कस्मिन् ददतेः धारयत्यर्थे? इति। उच्यते,—क्वचिद् वेदे लोके च। वेदे तावत्,—विदद्वसुः पुष्कारे हस्ता ददन्त (ऋ० सं० ५, ३, २४, १)"—इति। "अक्रूरो ददते मणि-

मित्यभिभाषन्ते" । तथा लोके,—'अक्रूरो ददते मणिम्' । अक्रूरो नाम राजा वृष्ण्यन्धकाधिपतिः, स ददते मणिं स्यमन्तकनामानं शिरसा । लोकेऽप्येवं ददतिर्धारणार्थे भाष्यते ।

"दमनादित्यौपमन्यवः" आचार्य्यो मन्यते । तेन हि अदान्तो दम्यते राजभिः, तेनादान्तान् दमयेदित्युक्तम्, लोके हि प्रसिद्धो यः कश्चिददान्तो भवति तमधिकृत्य वक्तारो भवन्ति ।—"दण्डमस्याकर्षत हे सभासदः ! तेन सम्पद्यतामयं ततो दान्तो भविष्यति,—इत्येवमयं गर्ह्यायां दृष्टः। एवं दमनाद् दण्डः, इत्यौपमन्यव आचार्य्यो मन्यते ॥ ४ ॥

कक्ष्या रज्जुरश्वस्य कक्षं सेवते कक्षो गाहतेः क्स इति नामकरणः ख्यातेर्वानर्थकोऽभ्यासः किमस्मिन् ख्यानमिति कषतेर्वा तत्सामान्यान्मनुष्यकक्षो बाहुमूलसामान्यदश्वस्य राज्ञः पुरुषो राजपुरुषो राजा राजतेः पुरुषः पुरिषादः पुरिशयः पूरयतेर्वा पूरयत्यन्तरित्यन्तरपुरुषमभिप्रेत्य । यस्मात् परं नापरमस्ति किञ्चिद्यस्मान्नाणीयो न ज्यायो ऽस्ति किञ्चित् । वृक्ष इव स्तब्धो दिवि तिष्ठत्येकस्तेने-दं पूर्णं पुरुषेण सर्वम् । इत्यपि निगमो भवति ॥ ५ ॥

तद्धितस्यैव द्वितीयमुदाहरणम्,—"कक्ष्या रज्जुरश्वस्य"—इति । कक्ष्या इत्येष तद्धितः । आह,—कः पुनरियं कक्ष्या ? इति । उच्यते,—या अश्वस्य सन्नाहरज्जुः सा कक्ष्येत्युच्यते ।

एव कक्ष्याशब्दस्य तरधमुक्त्वाधुना तद्धितार्थं ब्रवीति,—"कक्ष सेवते"। सा हि कक्ष सेवने, कक्षसयुक्ता भवति। कक्षे भवा वा कक्ष्या।

अधुना पदार्थं निर्वक्ति,—"कक्षो गाहने" विलोडनार्थस्य (भू० आ०)। कक्षयोरेव हि विलोडयति, द्रष्टव्यम। अत्र पुन,—"क्स इति नामकरण। सर्वमन्यदाद्यन्तविपर्य्ययादि यथोप दर्शित यथासम्भव योज्य तत्र तत्र। "ख्यातेर्वानर्थकोऽभ्यास" ककार, कख्य सन् कक्ष इत्युच्यते। 'अर्थवानेव वा ककार। कख्य सन् कक्ष इत्युच्यते। अर्थवानेव वा ककार। कथम्? "किमस्मिन् ख्यानमिति"। एव किमस्मिन् ख्यापनीयमस्ति? न किञ्चिदपि अदर्शनीयत्वात्, गूहनीयोऽयमित्यर्थ। स एव एव कृत्वा किं ख्य सन् कक्ष इत्युच्यते? "कषतेर्वा (भू० प०)" नित्यकाल ह्यसौ स्वेदशीलत्वात् कण्डू ददाति, ततो नखै कष्यते यत, तस्मात् कषणक्रियायोगात् कक्ष इत्युच्यते। "तत्सामा न्यान्मनुष्यकक्ष"। स्त्रीकक्षस्य सामान्यात् मनुष्यकक्षोऽपि कक्ष इत्युच्यते? "बाहुमूलसामान्यादश्वस्य"। अश्वस्यापि यो बाहुमूलप्रदेश, स कक्ष इत्युच्यते। त सेवत इति कक्ष्या।

अन्ये तु ब्रुवते,—"पूर्व पूर्वमपरमपर प्रविभज्य निर्ब्रूयात्" पूर्वं पद पूर्वमेव प्रविभज्य निर्ब्रूयात्, अपर पदमपरमेवेति। एतस्मिन् अर्थे कल्प्यमाने पदानामेव पौर्वापर्य्ये निर्वचने तद्धित-समासयोस्त्वनियम पूर्वं पश्चाद्वेति। पूर्व एव त्वर्थ साधीयान्॥ उक्त तद्धितनिर्वचनलक्षण सोदाहरणम्॥

अधुना समासोदाहरणमुच्यते,—"राज्ञः पुरुषो राजपुरुषः"। राज्ञ इत्युक्ते सर्वं स्वं गम्यते, षष्ठीसामर्थ्यात्। तथा पुरुष इत्युक्ते सर्वः स्वामी गम्यते, निर्देशसामर्थ्यात्। अथेदानीं राजपुरुष इत्युक्ते, राजा पुरुषमन्येभ्यः स्वामिभ्यो विनिवर्त्य स्वात्मनि संयुनक्ति, पुरुषोऽपि राजानमन्येभ्यः स्वेभ्यो विनिवर्त्य स्वात्मना संयुनक्ति। ता उभावप्यन्योन्यविमिश्रपदार्थकौ मिथः संसृष्टपदार्थौ समस्येते। अथेदानीं राजपुरुष आनीयतामित्युक्ते न राजानमानयन्ति, नापि पुरुषमात्रम्, नाप्युभयम्, किन्तु राजस्वामिकं पुरुषमानयन्ति। एवं समासार्थः। कुतः पुनरेतत् राजस्वामिकमिति? प्रधानोपसर्जने हि सहभूते विपश्चितमेकमर्थं ब्रूतः॥

"राजा राजतेः"। राजतेर्दीप्त्यर्थस्य (भ्वा० उ०)। दीप्यते ह्यसौ पञ्चानां लोकपालानां वपुषा "पुरुषः पुरिषादः"। पूः शरीरं बुद्धिर्वा, तयोरसौ विषयोपलब्ध्यर्थं सीदतीति पुरिषादः, पुरुषः। "पुरिशयः" अथवा तयोरसौ शेते विशेषेणास्ते इति पुरिशयः सन् पुरुष इत्युच्यते। "पूरयतेर्वा" पूर्णमनेन पुरुषेण सर्वगतत्वात् जगदिति पुरुषः। "पूरयत्यन्तरित्यन्तरपुरुषमभिप्रेत्य"। अन्तरित्यन्तरपुरुषाभिप्रायेणैवमुच्यते प्रासङ्गिकम्।

निगमश्च भवति,—"यस्मात् परं नापरमस्ति किञ्चिद्यस्मान्नाणीयो न ज्यायोऽस्ति किञ्चित्। वृक्ष इव स्तब्धो दिवि तिष्ठत्येकस्तेनेदं पूर्णं पुरुषेण सर्वम्"। यस्मात् परमपरं वा न किञ्चिदस्ति, यस्माच्च न किञ्चिदप्यणीयो नापि ज्यायोऽन्यदस्ति, स

एव सर्वमित्यभिप्रायः। वृक्ष इव स्तब्धो नित्यसङ्कोचविकाश-धर्मादिविद्योतनवति स्वात्मनि सर्वविभागेन तिष्ठति यः तेन पुरुषेणेदं पूर्णं सर्वं जगदिति ॥ ५ ॥

विश्वकद्राकर्षो वीति चकद्र इति श्वगतौ भाष्यते द्रातीति गतिकुत्सना कद्रातीति द्रातिकुत्सना चकद्राति कद्रातीति सतोऽनर्थकोऽभ्यासस्तदस्मिन्नस्तीति विश्वकद्रः कल्याणवर्णरूपः कल्याणवर्णस्येवास्य रूपं कल्याणं कमनीयं भवति वर्णो वृणोते रूपं रोचतेरेवं तद्धितसमासान्निर्ब्रूयान्नैकपदानि निर्ब्रूयान्नावैयाकरणाय नानुपसन्नायानिदंविदे वा नित्यं ह्यविज्ञातुर्विज्ञानेऽसूयोपसन्नाय तु निर्ब्रूयाद्यो वालं विज्ञातुं स्यान्मेधाविने तपस्विने वा ॥ ६ ॥

समासस्यैव द्वितीयमुदाहरणम्,—"विश्वकद्राकर्षः" इति। विश्वकद्रमाकर्षतीति विश्वकद्राकर्षः।

आह,—कः पुनरयं विश्वकद्र इति? "वीति चकद्र इति श्वगतौ भाष्यते"। वीति चकद्र इति शब्दद्वय श्वगतौ भाष्यते श्वभिः साकं यो गच्छति मनुष्यः, तस्मिन् भाष्यते। "द्रातीति गतिकुत्सना"। अत्र पुनः द्रातीति गतिकुत्सना। 'द्रा कुत्सायाम् (अदा० प०)'—इत्युक्तम्, इदं हि तस्य कुत्सितगतित्वम्, यदस्य श्वभिः सह राति। "कद्रातीति द्रातिकुत्सना"। इदानीं कद्रातीति द्रातिकुत्सना कुत्सितकुत्सनेत्यर्थः। इदमपरं कुत्सिततरम्, यद्

गत्वा श्वभिः सह निहन्ति, तस्मात् कद्रातीति कुत्सितकुत्सनेत्युपपद्यते। "चकद्राति कद्रातीति सतोऽनर्थकोऽभ्यासः"। अथेदानीं च इत्येव कद्रातीति एवमेव सतः शब्दस्वरूपस्यानर्थक एवाभ्यासः। यदेवोक्तं भवति कद्रातीति तदेव चकद्रातीति। "तदस्मिन्नस्तीति विश्वकद्रः"। तदस्मिन् द्वितयमप्यस्ति,— कुगतिश्च, कुत्सिततरगतित्वञ्च, नानाप्रकारमिति विश्वकद्रः श्वजीवनः पुरुषः। तमपराधे कस्मिंश्चित् वर्त्तमानमन्योन्य आकर्षति, स विश्वकद्राकर्षः॥

अन्ये तु ब्रुवते,—श्वैव विश्वकद्रः, अस्यैव हि स्वभावत एव हिंस्रत्वाद् गतिः कुत्सिता, स च पुनः पादविकलः, अतस्तस्य कुत्सितकुत्सितत्वम्। धीत्युभयोरर्थयोर्मत्वर्थः, तमाकर्षति यः पुरुषः, स विश्वकद्राकर्षः॥

अधुना रूपसमासं दर्शयति,—"कल्याणवर्णरूपः, कल्याणवर्णस्येवास्य रूपम्"। कल्याणवर्णं सुवर्णम्, तस्येव यस्य रूपं स कल्याणवर्णरूपः। अग्निरन्यो वा कश्चित्।

कल्याणादिशब्दान् विग्रहप्रसक्तान् निर्ब्रवीति,—"कल्याणं कमनीयं भवति"। प्रार्थ्यते तन् सर्वेणैव। "वर्णो वृणोतेः"। आवृणोति हि स आश्रयम्। "रूपं रोचतेः"। तद्धि रोचते, तद्धि रोचिष्णुः भवति।

"एवं तद्धितसमासान्निर्ब्रूयात्"—इत्युपसंहारवचनम्॥

"नैकपदानि निर्ब्रूयात्" प्रकरणोपपदविदितानि सन्ति तानि, केवलान्येव परेणाभिप्रोहबुद्ध्या पृच्छ्यमानानि न निर्ब्रूयात्, न

निर्वक्तव्यानीति। किङ्कारणम्? तेषां प्रकरणादुपपदाद्वा अर्थः शक्यतेऽवधारयितुम्, सोऽसौ प्रकरणानभिज्ञोऽन्यथैव निर्ब्रूयात्, ततश्च प्रत्यवायेन योगादपहारश्च स्यात्। तद्यथा,—'जहा' —इत्येकं पदं प्रकरणोपपदरहितम्, न विज्ञायते, किं हन्ते (अदा० प०) उत "ओ हाक् त्यागे (जु० प०)'—इत्यस्य धातोः स्यात्? इति। ननु पुनरेतत्—"मा न एकस्मिन्नागसि मा द्वयोरुत त्रिषु। वधीर्मा शूर भूरिषु॥ (ऋ० सं० ८, २, ४८, ४)"—इत्येतस्यामृचि यदेतन्मा वधीरिति पदम्, एतस्माद् गम्यते हन्ते स्यादिति। किङ्कारणम्? विज्ञातप्रकरणोपपदस्य हि समञ्जसं ह्यर्थकरणं न्याय्यमित्येवमनवगतसंस्काराणामेकपदानां प्रकरणादर्थावधारणमुपपदाद्वा शक्यते कर्त्तुम्। अत इदमुक्तम्,—"नैकपदानि निर्ब्रूयात्"—इति॥

नावैयाकरणायेति। उक्तं निर्वचनलक्षणम्, अधुना यस्मै निर्वक्तव्योऽयमुक्तनिर्वचनलक्षणः समाम्नायः, तस्य लक्षणं वक्तव्यमिति तदर्थमिदमारभ्यते,—"नावैयाकरणाय"। यस्तावदवैयाकरणः, तस्मै न निर्वक्तव्योऽयं समाम्नायो न ह्यसावलक्षणज्ञत्वात् व्युत्पाद्य निरुच्यमानमेतद् बुध्येत, ततो व्यर्थ एव श्रमः स्यादिति।

किञ्च "नानुपसन्नाय"। किमिति महदद्भुतमनेन कृतं यत् व्याकरणमधीतमिति,—एतावता गौरवेण वैयाकरणायापि न निर्ब्रूयात्, धर्मो हि सर्वथैवापरित्याज्यः, तस्माद् वैयाकरणायापि सम्यगुपसन्नाय परां शिष्यवृत्तिमास्थितायैव निर्ब्रूयात्।

नैवमेव, किञ्च "अनिदंविदे वा"। अवैयाकरणोऽपि अज्ञः कश्चिदसमर्थ एव वेदितुं स्यात्, बहु वेदितव्यमत्रास्ति, देवतादि किञ्चित् तस्मै वैयाकरणायापि इदं वेदितुमसमर्थाय अनिदंविदे नैव निर्ब्रूयात्। अथवा। इदमित्यात्मपर्य्यायवाचि। इदंविदे आत्मविदे, योगिने। स ह्यात्मज्ञानविधूतकल्मषोऽल्पेनैव यत्नेन बोद्धुं सूक्ष्मानर्थान् शक्त इति इदं विदे निर्ब्रूयात्। अथवा। यत्किञ्चिच्छास्त्रमिदमिति निर्दिश्यते। येन ह्यन्यत् किञ्चिदश्रुतं पूर्वशास्त्रम्, तस्मै न निर्ब्रूयादिदं निरक्तशास्त्रमनास्फालितहृदयकुड्मलाय॥

किङ्कारणम्? "नित्यं ह्यविज्ञातुर्विज्ञानेऽसूया"। यो हि न विजानाति नावबुध्यते, तस्याविज्ञातुर्नित्यकालमेव विज्ञाने असूया, स ह्यनवबुध्यमान आत्मीयं दोषमाचार्य्ये एवावसृजति,—स्वयमेव तावदयं न बुध्यते किमस्मान् बोधयिष्यतीति। एतस्मात् कारणादश्रुतपूर्वान्यशास्त्राय अविदितमनसे नेदं निर्ब्रूयात्॥

"उपसन्नाय तु निर्ब्रूयात्, यो वालं विज्ञातुं स्यान्मेधाविने तपस्विने वा"। य एव तु मेधावी स्यात्,—अन्यजन्मान्तरानुभावितया प्रज्ञया युक्तः, यो वा तपस्वी, कामं ताभ्यामवैयाकरणाभ्यामपि निर्ब्रूयादेव,—न हि तयोरसाध्यं किञ्चिदस्ति, —तपसा हि स्वयमपि वेदार्थः प्रादुर्भवेदेव। पूर्वेषामृषीणां मेधाव्यपि च स्वयमुत्प्रेक्षितुं शक्नुयात्, किमुतोच्यमानमवबोद्धुम्। यो वान्यः कश्चिदलं पर्य्याप्तो विज्ञातुमेतच्छास्त्रं भवेत्, दृढग्राही स्थिरबुद्धिः, तस्मै निर्ब्रूयादेव सर्वथा। अनुपसन्नाय नैव निर्ब्रूयात्, यद्यपि तपस्वी, मेधावी, दृढग्राही वा।

उक्तं हि,—"यश्चान्यायेन निर्ब्रूयाद्यश्चान्यायेन पृच्छति। तयोरन्यतरो मृत्युं विद्वेषं वाधिगच्छति" ॥ ६ ॥

विद्या ह वै ब्राह्मणमाजगाम गोपाय मा शेवधिष्टेऽहमस्मि। असूयकायानृजवेऽयताय न मा ब्रूया वीर्य्यवती तथा स्याम्॥ य आतृणत्त्यवितथेन कर्णावदुःखं कुर्वन्नमृतं सम्प्रयच्छन्। तं मन्येत पितरं मातरञ्च तस्मै न द्रुह्येत् कतमच्चनाह॥ अध्यापिता ये गुरुं नाद्रियन्ते विप्रा वाचा मनसा कर्मणा वा। यथैव ते न गुरोर्भोजनीयास्तथैव तान्न भुनक्ति श्रुतं तत्॥ यमेव विद्याः शुचिमप्रमत्तं मेधाविनं ब्रह्मचर्य्योपपन्नम्। यस्ते न द्रुह्येत् कतमच्चनाह तस्मै मा ब्रूया निधिपाय ब्रह्मन्निति निधिः शेवधिरिति॥ ७॥

इति द्वितीयाध्यायस्य प्रथमः पादः ॥ २, १ ॥

अथाप्येतमर्थमृचिरन्योदाहरन्ति,—"विद्या ह वै ब्राह्मणमाजगाम"—इति। विद्या किल कामरूपिणी भूत्वा विद्याधिदेवता संयतात्मानं विदितवेदार्थं ब्राह्मणं प्रति कश्चिदाजगाम। तमेनद ब्रह्मसूनोपाय,—किम्? इति। "गोपाय मा" रक्ष माम्। ततः "ते" "अहं" गुप्ता सती "शेवधि" भविष्यामि, गुप्तनिधान-

मित्यर्थः। आह,—कुतः पुनस्त्वां रक्षामि? "असूयकायानृजवेऽयताय"। असूयकः, पराप्रवादशीलः। अनृजुः, यस्य मनोवाग्देहेषु असमाः प्रवृत्तयः। अयतः, विप्रकीर्णेन्द्रियः,—यत्किञ्चन कायाशुचिः। एवंलक्षणाय "न मा ब्रूयाः" त्वम्। किन्तथा भविष्यति? "वीर्य्यवती तथा" अहं तव "स्यां" भवेयमित्यर्थः॥

"य आतृणत्त्यवितथेन कर्णौ"। अधुना शिष्योपदेशमाह,—य आतृणत्ति, आभिनत्ति, अपिहिताविव सन्तौ कर्णौ विवृणोति। अवितथेन, सत्येन ब्रह्मणा। कथम्पुनरातृणत्ति? "अदुःखं कुर्वन्नमृतं सम्प्रयच्छन्"। यो हि किञ्चिदातृणत्ति, स दुःखयति, अयं पुनः सुखमातृणत्ति। किञ्च अमृतत्त्वप्राप्तिहेतुज्ञानं सम्प्रयच्छन्। य आतृणत्ति तस्मै किम्? इति। उच्यते,—"तं मन्येत पितरं मातरञ्च" नेतरौ मातापितरावित्यभिप्रायः। उक्तञ्च,—"उत्पादकब्रह्मदात्रोर्गरीयान् ब्रह्मदः पिता। ब्रह्मजन्म हि विप्रस्य प्रेत्य चेह च शाश्वतम् (म० सं० २, १४६)"। "तस्मै" मातापितृभूताय गुरवे "न द्रुह्येत्"। "कतमच्चनाह"—कदाचिदपि आपद्यपि कष्टायामित्यभिप्रायः॥

अधुना इतरान् दुष्टशिष्यान् अभिशपन्ती विद्या इदमाह,—

"अध्यापिता ये गुरुं नाद्रियन्ते" इत्यादि। अध्यापिताः सन्तो ये गुरुं प्रति नाद्रियन्ते, नादरं कुर्वन्ति। के पुनस्ते? इति। उच्यते,—"विप्राः" मेधाविनः सन्तो गृहीतविद्याः। कथम्पुनर्नाद्रियन्ते? "वाचा मनसा कर्मणा वा"। आह,—

किं तेषाम्? इति। उच्यते,—"यथैव" "ते" तस्य "गुरोः" "न" "भोजनीयाः" न भोज्याः, न भोजनार्हाः, "तथैव" "तान्" "तत्" "श्रुतम्" अपि "न भुनक्ति" न पालयन्ति, श्रुतफलेन न संयुनक्तीत्यर्थः ॥

अधुना यस्मै वक्तव्या, तस्य लक्षणं ब्रवीति,—"यमेव" "विद्याः" जानीयाः त्वम्। 'शुचिमप्रमत्तम्' यमनियमेषु। 'मेधाविनं च "ब्रह्मचर्य्येणोपपन्नम्'। किञ्च, यः ते न "द्रुह्येत्" न द्रोहमुपगच्छेत्। 'कतमच्चनाह" कदाचिदपि सर्वास्ववस्थासु 'तस्मै मा ब्रूयाः' "त्वम्" "निधिपाय" गोप्त्रे 'ब्रह्मन्!' ॥

आह,—"निधिः" कः? इति। उच्यते 'शेवधिः" इति। शेव इति सुखनाम सुखनिधानमित्यर्थः। ब्रह्मकोशो हि निधिः सुखानां कृत्स्नस्य जगतो यद्द्वारेण अत इदमुक्तं "निधिः शेवधिरिति" ॥७॥

इति जम्बूमार्गाश्रमवासिन आचार्य्यभगवद्दुर्गस्य कृतौ
निरुक्तव्याख्यायां [द्वितीयाध्यायस्य] सप्तमस्याध्यायस्य
प्रथमः पादः ॥१॥

— —

द्वितीयः पादः

अथातोऽनुक्रमिष्यामो गौरिति पृथिव्या नामधेयं यद् दूरङ्गता भवति यच्चास्याम्भूतानि गच्छन्ति गातेर्वौ-कारो नामकरणोऽथापि पशुनामेह भवत्येतस्मादेवाथाप्य-स्यान्ताद्धितेन कृत्स्नवन्निगमा भवन्ति गोभिः श्रीणीत मत्सरमिति पयसो मत्सरः सोमो मन्दतेस्तृप्तिकर्मणो मत्सर इति लोभनामाभिमत्त एनेन धनं भवति पयः पिबतेर्वा प्यायतेर्वा क्षीरं क्षरतेर्घसेर्वेरो नामकरण उशीर-मिति यथा। अंशुं दुहन्तो अध्यासते गवीत्यधिषवण-चर्मणोंऽशुः शमष्टमात्रो भवत्यननाय शम्भवतीति वा चर्म चरतेर्वोच्चृत्तं भवतीति वाथापि चर्म च श्लेष्मा च। गोभिः सन्नद्धो असि वीलयस्वेति रथस्तुतावथापि स्नाव च श्लेष्मा च। गोभिः सन्नद्धा पतति प्रसूतेतीषुस्तुतौ। ज्यापि गौरुच्यते गव्या चेत्ताद्धितमथ चेन्न गव्या गम-यतीषूनिति ॥ १ ॥

"समाम्नायः समाम्नातः, स व्याख्यातव्यः"—इति प्रतिज्ञातम् (२ पृ०)। सा च पुनरियं व्याख्या सामान्या वैशेषिकी

च। तत्र सामान्या,—सर्वेषां नाम्नामिदं सामान्यलक्षणम्, इदमाख्यातानाम्, इदमुपसर्गाणाम् इदं निपातानाम् इति। सोऽयमनयैव प्रकारया व्याख्यया कृत्स्नः समाम्नायो व्याख्यातः, तदनुपक्तान्येव च शास्त्रारम्भप्रयोजनान्युक्तानि, आगमश्च परिशोधितः, वेदो वेदाङ्गान्यूहश्च सप्रयोजन उक्तः, निघण्टुसमाम्नायविरचना चोपदिष्टा प्रकरणत्रयविभागेन, निर्वचनलक्षणञ्चानेकप्रपञ्चमुक्तम्।

अथेदानीं विशेषव्याख्यया प्रतिपदमयं समाम्नायो व्याख्यातव्यः, तदधिकारार्थोऽयम् "अथ" शब्दः। "अतः" शब्दः क्रमे हेतौ वा। सामान्यव्याख्यानादनन्तरं विशेषव्याख्यानमेवावसरप्राप्तमित्येवं क्रमे। अथवा हेतौ। यस्मात् सामान्यतः समाम्नायो व्याख्यातः अत इदानीं विशेषतः "अनुक्रमिष्यामः" आनुपूर्व्येण क्रमिष्यामो वर्णयिष्यामः, व्याख्यायेति शेषः।

आह,—किंलक्षणा पुनरसौ व्याख्या? इति। उच्यते,—तत्त्वपर्यायभेदसङ्ख्यासन्दिग्धसन्दिग्धोदाहरणतन्निर्वचनविभागेन यद्व्याख्यानं सा व्याख्या निघण्टुप्रकरणे। तद्यथा। तत्त्वम्,—"गौरिति पृथिव्या नामधेयम्"—इत्येवमादि। पर्यायवचनम्, प्रसिद्धेनाभिधानेनाप्रसिद्धस्यार्थस्य ख्यापनम्, तद्यथा,—पृथिव्या नामधेयं गौरिति। भेदो व्युत्पत्तिरिति समानार्थः, तद्यथा,—"यद् दूरं गता भवति"—इत्येवमादि। सङ्ख्या, तद्यथा,—"पृथिवीनामधेयान्येकविंशतिः"। सन्दिग्धम्,—"तत्र निम्नं निर्निगमनाद्गच्छतेः इच्छापत्तिस्मिन् सा पृथिव्या सन्दिह्यते"

इत्येवमादि। सन्दिग्धोदाहरणम्,—"य ईं चकार"—इत्येवमादि। तन्निर्वचनम्,—"बहुप्रजाः कृच्छ्रमापद्यत इति परिव्राजकाः"—इत्येवमादि। एवम्प्रकारया व्याख्यया इदं नैघण्टुकप्रकरणं व्याख्यास्यते॥

"गौरिति पृथिव्या नामधेयम्"। आह,—यस्मात् कारणात् द्रव्ये शब्दोनिवेशो नैरुक्तानां, तदुच्यतां कारणं, केन कारणेन गोशब्दः पृथिव्यां सन्निविष्टः? इति। उच्यते,—"यत्" तस्मात् इयं "दूरम्" अध्वानं प्रति "गता भवति" न ह्यस्या अन्त उपलभ्यते, "यत्" यस्मात् "च" "अस्यां भूतानि गच्छन्ति" आधारभूतायाम्। एवं कर्तृकारकमधिकरणं वा योज्यम्। "गातेर्वा" 'गाङ्गतौ (भू० आ०)'—इत्यस्य धातोः "ओकारो नामकरणः" प्रत्ययः।

"अथापि" गौरित्येतत् "पशुनाम" "भवति" "इह" एव कारकद्वये, "एतस्मादेव" धातुद्वयाद् गमेर्गातेर्वा। "अथाप्यस्याम्" एव पशुगवि "ताद्धितेन" प्रयोगेनाहृतायां सत्यां "तत्स्थवन्निगमा भवन्ति"। तद्यथा,—"गोभिः श्रीणीत मत्सरमिति" गोरेकदेशस्य "पयसः" तत्स्थवत् प्रयोगः। तदेतच्छिष्यबुद्धिव्युत्पादनार्थमनेकप्रकारं शब्दवृत्तिविषयोपमदर्शिनं क्रियते, कथन्नामोपप्रदर्शितशब्दवृत्तिविषयोऽसंमुढा न मन्त्रार्थान् निब्रूयादिति॥

आधावत, सुहस्त्यः शुक्रा गृभ्णीत मन्थिना। गोभिः श्रीणीत मत्सरम्॥" (ऋ० सं० ७, १, ३, ४)। इमां गायत्री-

मयास्य आङ्गिरसोऽपश्यन्। ग्रावस्तुतौ विनियुक्ता। हे अध्वर्यवः! एभिः ग्रावभिः संस्कृत एव सोमः। ते यूयं हे 'सुहस्त्यः' सुवर्णनालङ्कृतहस्ताः किम्? 'आधावत'। 'गृभ्णीत' गृह्णीत, एतौ 'शुक्रा' 'मन्थिना ग्रहावनतिक्रान्तकालम्। किञ्च, 'गोभिः' गोभ्योऽभिनिष्पन्नेन रसेन 'श्रीणीत' एनम् 'मत्सरं' मादयितारं सोमं मैत्रावरुणग्रहाणामुपगतम्। "शृतशीतेन तृतीयसवने वा पूतभृत्याशिरेण ततोऽनतिक्रान्तकालं जुहुत" एवं मन्त्रविधानादशक्यत्वाच्च गोभिः श्रपणस्य गव्येन पयसेति गम्यते॥

"मत्सरः सोमो मन्दतेस्तृप्तिकर्मणः" तृप्यन्ति हि अनेन देवताः॥

शब्दसामान्यप्रसङ्गप्रसक्तमुच्यते,—"मत्सर इति लोभनामाभिमत्त एनेन धनं भवति"। तेन ह्याविष्टो धनाभिमुख्येन मत्तो भवति॥

पर्यायाख्यानप्रसक्तं निरुच्यते,—"पयः पिबतेर्वा पानार्थस्य (अदा० प०), पीयते हि तत्। "प्यायतेर्वा" वृद्ध्यर्थस्य (भ्वा० आ०), तेन हि वर्द्धन्ते प्राणिनः॥

प्रसक्तानुप्रसक्तं निरुच्यते,—"क्षीरं क्षरते." श्च्योतनार्थस्य (भ्वा० आ०), श्च्योतते हि तदूधसः। "घसेर्वरो नामकरणः" अदेर्घस आदेशः क्रियते, अतस्तेनैव सिद्धरूपेण निर्दिश्यते। धात्वन्तरमिति वा केचित्। ज्ञापकञ्च ददाति,—"उशीरमिति यथा"। 'वश कान्तौ (अदा० प०)' तस्य कृतसम्प्र-

सारणस्य ईरप्रत्ययेनोशीरमिति भवति। तद्धि सौगन्ध्या-कान्तं भवति॥

"अंशुं दुहन्तो अध्यासते गवीत्यधिषवणचर्मणः"। ऋगचर्-मिधायकः। "ते सोमादो हरी इन्द्रस्य निंसतेऽंशुं दुहन्तो अध्यासते गवि। तेभिर्दुग्धं पपिवान् सोम्यं मध्विन्द्रो वर्द्धते प्रथते वृषायते॥" (ऋ० सं० ८, ४, ३०, ४)। एषा जगती। अर्बुदो नाम काद्रवेय ऋषिः तस्यार्षम्। ग्रावस्तुतौ विनियुक्ता। 'ते' एते ग्रावाणः 'सोमादः' सोमभक्षयितारः यज्ञाभिषवकर्मणि प्रवर्त्तन्ते, अथ तदा 'हरी इन्द्रस्य' अश्वौ, यज्ञागमनार्थमेनेषां शब्दमुपश्रुत्य संस्कृतं सोमं मन्वानौ, रथे योगमिच्छन्तौ, आत्मना ऋजीषं भक्षयिष्यन्तौ, इन्द्रञ्च सोमं पाययिष्यन्तौ, स्वयमेव 'निंसते, मीचैर्नामिते युक्तौ आवाहे,—इन्द्र! गच्छ यज्ञायतनं संस्कृतः सोमः' इति। तदैव च ऋत्विजोऽपि त्वरमाणा इन्द्रो—स्थानकालमभ्यर्णमन्वानाः 'अंशुं' सोमांशम् अभिप्रेत्य 'दुहन्तः' प्रपूरयन्तः। 'गवि अधि' गोरुपरि गोरवयवे अधिषवणचर्मणि। एतत् कर्मकुर्वाणा इदं प्रतीक्षमाणा 'आसते'। अथ स 'इन्द्रः' एत्य 'तेभिः दुग्धम्' ऋत्विग्भिः प्रचारितं 'पपिवान्' पीतवान् 'सोम्यं मधु' सोममयं तेन तृप्तः। ततोऽनन्तरं 'वर्द्धते' वीर्य्येण। अथ तेन च शरीरेण 'प्रथते' विस्तीर्य्यते, विस्तीर्णश्च स्येन वीर्य्येण मेघं विदार्य्य 'वृषायते' वर्षं प्रवर्त्तयते। तदिदं सर्वमपि वर्षादि जगदनुग्राहकमैन्द्रं कर्म। अभिषवद्वारेण, सोमाभिषवो ग्रावाधी-नमित्येवं ग्रावस्तुतिः॥

निगमप्रसक्त निरुच्यते,—"अशु शमष्टमात्रो भवति"। व्याप्तमात्रो हि यजमानेन तस्यैव श भवति, सुखी भवति। इष्टसोमो ह्यनृणोऽहमिति विगतमनोदुःखो भवति "अननाय श भवतीति वा"। अननाय जीवनाय श सर्वेषां भूतानां भवति, सुखो भवतीति वा। यज्ञो हि वर्षे प्रवृत्तिहेतुस्ततश्च सर्वभूतानि सुख जीवन्ति ॥

व्याख्यानप्रसक्त निरुच्यते,—चर्म चरतेर्वा' चरित हि तत्सर्वस्मिन् शरीरे गतमित्यर्थ। "उच्चृत भवतीति वा" उच्चृत्तम् उत्कर्त्तित शरीरादिति।

"अथापि चर्म च श्लेष्मा च" गोशब्देनोच्यत इति शेष। "गोभि सन्नद्धो असि वीलयस्वेति रथस्तुतौ' "वनस्पते वीड्वङ्गो हि भूया अस्मत्सखा प्रतरण सुवीर। गोभि सन्नद्धो असि वीलयस्वास्थाता ते जयतु जेत्वानि॥" (ऋ० स० ४, ७, २५, १)। (य० वा० स० २६, ५२)। (अथ० स० ६, १२५, १)। स हि चर्मणावनद्धो भवति, श्लेष्मणा च तस्यारादय सश्लेषिता भवति॥

"अथापि स्नाव च श्लेष्मा च" गोशब्देनोच्यत इति शेष। "गोभि सन्नद्धा पतति प्रसूतेतीषुस्तुतौ' सुपर्णं वस्ते मृगो अस्या दन्तो गोभि सन्नद्धा पतति प्रसूता। यत्रा नर सञ्च वि च द्रवन्ति तत्रास्मभ्यमिषव शर्म यसन्॥ (ऋ० स० ५, ३, २१, १)। (य० वा० स० २९, ४८)। सा हि स्नाव्ना वेष्टिता भवति, श्लेष्मणा च सश्लेषिता॥

"ज्यापि गौरुच्यते"। सा पुनः "चेत्" यदि "गव्या ताद्धितम्" अभिधानम्, "अथ" पुनः "न चेत् गव्या, गमयतीषूनिति" गौरन्यद्द्रव्यमपि,—॥ १ ॥

वृक्षे वृक्षे नियतामीमयद्गौस्ततो वयः प्रपतान पूरुषादः। वृक्षे वृक्षे धनुषि धनुषि वृक्षो व्रश्चनान्नियतामीमयद्गौः शब्दं करोति मीमयतिः शब्दकर्मा ततो वयः प्रपतन्ति पुरुषानदनाय विरिति शकुनिनाम वेतेर्गतिकर्मणोऽथापीषुनामेह भवत्येतस्मादेवादित्योऽपि गौरुच्यते। उतादः परुषे गवि। पर्ववति भास्वतीत्यौपमन्यवोऽथाप्यस्यैको रश्मिश्चन्द्रमसं प्रति दीप्यते तदेतेनोपेक्षितव्यमादित्यतोऽस्य दीप्तिर्भवतीति। सुषुम्णः सूर्य्य रश्मिश्चन्द्रमा गन्धर्व इत्यपि निगमो भवति। सोऽपि गौरुच्यते। अत्राहगोरमन्वतेति तदुपरिष्टाद् व्याख्यास्यामः सर्वेऽपि रश्मयो गाव उच्यन्ते ॥ २ ॥

"वृक्षे वृक्षे नियतामीमयद्गौस्ततो वयः प्रपतान् पूरुषादः। अथेदं विश्वं भुवनं भयात इन्द्राय सुन्वदृषये च शिक्षत्॥" (ऋ० सं० ७, ७, १६, २)। वसुक्रस्येन्द्रपुत्रस्येदमार्षम्। त्रिष्टुबैन्द्री। महाव्रते मरुत्वतीये शस्यते। इन्द्रो भगवानैश्वर्य्ययोगात् सङ्ग्रामेष्वनेकयाहुर्भूत्वानेकानि धनूंष्यादत्ते, तानि मन्त्रदृग्दृष्ट्वैवमाह,

—"वृक्षे वृक्षे" वृक्षावयवे "धनुषि धनुषि" यावन्तीन्द्रेण गृहीतानि धनूंषि, तेषु सर्वेषु, प्रत्येकं "नियता" निबद्धा, "गौः" गव्या, गमयित्री वा शराणाम्, इन्द्रबाह्वाकृष्टा "अमीमयत्" मीमयति "शब्दं करोति"। जात्यभिप्रायेणैकवचनम्। "ततः" शब्दकरणानन्तरमेव "प्रपतान्" "प्रपतन्ति" "वयः" अथवा 'ततः' ततो धनुषः 'वयः' पक्ष्यवयवपत्रसम्बन्धात् इषवोऽपि 'वयः' पक्षिणः। अथवा "वेतेर्गतिकर्मणः। साक्षादेव इषवः 'वयः' न गुणवृत्त्या। ते 'प्रपतान्' प्रपतन्ति 'पुरुषादनाय" भक्षणाय, ते हि शत्रूणां प्राणान् भक्षयन्ति। अथ अयमेवमतिप्रभाव इन्द्र इति ज्ञात्वा 'विश्वं' सर्वं 'भुवनं' भूतजातं यावत् किञ्चिदविकृतं कर्मणि 'भयाते' बिभेति। अथ बिभ्यत् किं करोति? 'इन्द्राय' इन्द्रार्थं 'सुन्वत्' अभिषवम् उचिते काले कुर्वन् 'ऋषये च' ऋत्विजे 'शिक्षत्' दक्षिणां ददते। इन्द्रोन्मुखमादरवदास्ते। सर्वमन्यत् परिहाय य एवम्प्रभाव इन्द्रः, तं वयमभिप्रेतार्थसिद्धये स्तुमः॥

निगमप्रसक्तं निराह,—"वृक्षो व्रश्चनात्" इति। स हि वृश्च्यते छिद्यते इन्धनार्थम्।

अत्र व्याख्याने गतार्थत्वात् न दोषो विद्यते। एवं तावदेकदेशे कृत्स्नवदभिधानं भवतीति प्रदर्शितम्॥

अथेदानीमन्येष्वर्थान्तरेषु गोशब्दोऽभिप्रयुक्तो बहुष्वित्येतत् प्रसङ्गतो दर्शयति। एतद्यैकपदिके पठितव्यमिह तु गोशब्दप्रसक्तमुच्यते,—"आदित्योऽपि गौरुच्यते" एतस्मिन् मन्त्रे।—

उताद परुषे गवि सूरश्चक्रं हिरण्ययम्। न्यैरयद्रथीतम" (ऋ० सं० ४ ८, २२, ३)। भरद्वाजस्यैयमार्षम्। गायत्री। पौष्णी। पूषा पुनरादित्यो नैरुक्ताना द्रष्टव्य, अन्यत्र इय वै पूषेति भूमिरुच्यते। "उताद" 'उत' अपि, अथ इति छन्दसि समानार्थो। अपि त्वन्नमीरय, अपि रसानादत्ते, अपि तमा स्यपहन्ति। 'अद्' अमुष्मिन् आदित्यमण्डले परुषि' पर्वभिस्त इति। अथवा भास्वति, भासा तद्वताति। अहोरात्रादि पर्व तद्वतात्यौपमन्यव। 'गवि' गमनशीले मुहूर्त्तमप्यनवस्थायिनि 'सूर' सूर्य्य अवस्थित। पूषा आदित्यमण्डलान्त पुरुष, तद्देव पर्ववन् भास्वद् वा। 'चक्र' चकन क्रमण वा गमनशील मण्डलं 'हिरण्यय' तेजोमय चक्र चक्राकृति। 'न्यैरयत्' नियतगमन वृत्तिना मार्गेण नित्यकालमीरयति। उदयास्तमयमध्यन्दिनका लोपलक्षणार्थम्। अथवा अमुष्मिन् मण्डलेऽवस्थित, पर्ववति मण्डलान्त पुरुष सूर्यो भगवान्। 'चक्र' लवक्षणनिमेषत्रुटि मुहूर्ताहोरात्रार्द्धमासमासर्त्वयनसवत्सरलक्षण काल चक्र सर्व भूतहारि 'हिरण्यय' हिरण्मय सर्वभूतविनाशस्थितिहेतु 'न्यैरयत्' नित्यमीरयति। कीदृश पुन स सूर्याय ईरयति? रथीतम अन्येऽपि रथिन सन्ति, अयन्तु मुहूर्त्तमप्यनवस्थितरथ इत्यतो रथीतम। स एवड्गुणयुक्त पूषा न वयमभिप्रेतार्थमिद्धये स्तुम॥

"अथाप्यस्यैको रश्मिश्चन्द्रमस प्रति दीप्यते"। एको रश्मिरा दित्यस्य सुषुम्णो नाम, चन्द्रमस प्रत्यवस्थितो दीप्यते। "तदे

तेन" मन्त्रार्थविदा मन्त्रानुपेत्य "ईक्षितव्यम्" द्रष्टव्यम्। सेयमस्य चन्द्रमसो "दीप्ति" ज्योत्स्ना इत्यर्थः "आदित्यत" आदित्यस्य अनुग्रहादेव "अस्य भवतीति"। जलमुपरि यच्चन्द्रमसो मण्डलं तत्तेजः सम्बन्धाद् दीप्तिमद् भवति, तत सर्वा दिशः प्रकाशयति।

यथा चैतदेव तथा "सुषुम्णः सूर्यरश्मिश्चन्द्रमा गन्धर्व इत्यपि निगमो भवति" राष्ट्रभृत्सु। "सुषुम्णः सूर्यरश्मिश्चन्द्रमा गन्धर्वस्तस्य नक्षत्राण्यप्सरसो भेकुरयो नाम। स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट् ताभ्यः स्वाहा॥" (य० वा० स० १८, ४०)। अप्ययमप्यन्ये बहव इत्यपिशब्दः। 'सुषुम्णः' सुष्ठु सुखः इत्यर्थः। सर्वाणि भूतानि नित्यमसौ ह्लादयति। कोऽसौ? इति। 'सूर्यरश्मिः' सूर्यान् रश्मिः कृत्य चन्द्रमसं प्रति गतः 'चन्द्रमा'। 'गन्धर्वः' सति सुषुम्णगमने गोशब्दवाच्यता। 'तस्य' गन्धर्वस्य सतः चन्द्रो धारयिता गन्धर्वसहितस्य प्रतिष्ठा। 'स न इदं' सोऽस्माकमिदं 'ब्रह्म क्षत्रं च' 'पातु' रक्षतु। किञ्च 'तस्मै' सुषुम्णाय सूर्यरश्मये 'स्वाहा' सु शोभनमिदमाभिमुख्ये नाह, हविराज्यलक्षणमस्तु। स चेद 'वाट्' वेतु पिबत्वित्यर्थः॥

"सोऽपि" सुषुम्णो रश्मिरेक एव "गौः"—इति "उच्यते" यथासौ गौस्तथैवमुदाहरणम्,—"अत्राह गोरमन्वतेति"। "तत्" पुनरेतत् "उपरिष्टात्" ऐकपदिके "व्याख्यास्याम"।

"सर्वेऽपि रश्मयो गाव उच्यन्ते"। यथैतदेव तथेयमृगु दाहरणम्, ॥२॥

ता वां वास्तून्युश्मसि गमध्यै यत्र गावो भूरिशृङ्गा अयासः। अत्राह तदुरुगायस्य वृष्णः परम पदमवभाति भूरि। तानि वां वास्तूनि कामयामहे गमनाय यत्र गावो बहुशृङ्गा भूरीति बहुनो नामधेयं प्रभवतीति सतः शृङ्गं श्रयतेर्वा शृणातेर्वा शम्नातेर्वा शरणायोद्गतमिति वा शिरसो निर्गतमिति वायासोऽयनास्तत्र तदुरुगायस्य विष्णोर्महागतेः परमं पदं परार्द्ध्यस्थमवभाति भूरि पादः पद्यतेस्तन्निधानात्पदं पशुपादप्रकृतिः प्रभागपादः प्रभागपादसामान्यादितराणि पदान्येवमन्येषामपि सत्त्वानां सन्देहा विद्यन्ते तानि चेत् समानकर्माणि समाननिर्वचनानि नानाकर्माणि चेन्नानानिर्वचनानि यथार्थं निर्वक्तव्यानीतीमान्येकविंशतिः पृथिवीनामधेयान्यनुक्रान्तानि तत्र निर्ऋतिर्निरमणादृच्छतेः कृच्छ्रापत्तिरितरा सा पृथिव्या सन्दिह्यते तयोर्विभागस्तस्या एषा भवति ॥ ३ ॥

"ता वां वास्तूनि"—इति। दीर्घतमस आर्षम्। वैष्णवी। त्रिष्टुप्। यूपावधाने विनियुक्ता, सोमातिरेकशस्त्रे च। वामिति दम्पतीत्यभिप्रेत्य द्विर्वचनम्। 'ता' "तानि" "वां" युवाभ्यामर्थाय "वास्तूनि" निवासस्थानानि 'उश्मसि' "कामयामहे"।

'गमध्यै' "गमनाय" "यत्र" येषु स्थानेषु। किम्? "गाव" रश्मय। 'भूरिशृङ्गा' "बहुशृङ्गा" बहुदीप्तय 'अयास' अयना मुहूर्त्तमप्यनवस्थायिन। किञ्च, 'अत्राह' तेषु स्थानेषु 'तत्' पदम् 'उरुगायस्य' उरुगमनस्य महागते भगवतो 'वृष्ण' "विष्णो' 'परम पदम्' आदित्यमण्डल स्थानम्। स्थाने हि पदसञ्ज्ञा, पदस्थ इति लोकेऽपि वक्तारो भवन्ति। 'अवभाति' अर्वागिद सर्व कृत्वा भाति दीप्यते भूरि बहुत्यर्थ। इति समस्तार्थ ॥

अथैकपदनिरुक्तम्।—"भूरीति" एतत् 'बहुनो नामधेयम्'। "प्रभवति' हि तद् बहुधापि दीयमानम्। 'शृङ्ग श्रयते" तद्ध्याश्रित भवति शिरसि। "शृणातेवा' हिंसार्थस्य। तेन हि हिनस्ति। "शिरसो निर्गतमिति वा" शृङ्ग परमेऽर्द्धे स्थित परार्द्ध्यस्थम्। अथवा परमङ्गर्या युक्ते स्थाने स्थित परार्द्ध्य स्थम्। "पाद् पद्यते' गत्यर्थस्य। पद्यते हि तेन। "तन्नि धानात् पदम्" यदुत्पद्यते, तत सरूपमेव पार्श्वे अन्यत्र वा तत् पदमित्युच्यते पशोर्मनुष्यस्य वा। 'पशुवादप्रकृति" चतुर्भाग सामान्यात्। "प्रभागपाद" दीनारादिपाद। "प्रभागपाद-सामान्यादितराणि पदानि" ग्रन्थपदानि क्षेत्रपदानि वा। विभागो हि तेष्वपि समान एव ॥ प्रसक्तानुप्रसक्तमिदमुक्तम् ॥

अधुनोपसहरति,—"एवमन्येषामपि सत्त्वाना सन्देहा विद्यन्ते" न केवल गोशब्दे पदशब्दे वा। तेषु हि स्वैसर्गोत्सर्गिक निर्वचनं लक्षण द्रष्टव्यम्,—"तानि" 'चेत् समानकर्माणि' यदि

सामान्यक्रियया युक्तानि, ततः "समाननिर्वचनानि" एव कर्त्तव्यानि। अथ पुनः "नानाकर्माणि" ततो "नानानिर्वचनानि"। एवं "यथार्थ निर्वक्तव्यानीति"॥

अधुनैवमुक्त्वोदाहरणैरेव तत्र सन्देहपदान्यनुक्रम्य मन्त्रेष्वेव दर्शयन्नाह,—"इमान्येकविंशतिः पृथिवीनामधेयान्यनुक्रान्तानि"। 'तत्र निर्ऋतिर्निरमणादृच्छतेः कृच्छ्रापत्तिरितरा"। लोके हीदं सर्वभूतजातमन्तर्भूतं यदभिधानानि यदाश्रयक्रियावचनाश्च शब्दा निघण्टव उच्यन्ते, तेषाञ्च पृथिवी प्रथमा, तस्मात् तत आरम्भः। एकविंशतिरिति संख्या (२१)। पृथिवीनामधेयानि, स्वार्थे धेयप्रत्ययः, नामैव नामधेयम्। अनुक्रान्तानि, आनुपूर्व्येण पठितानीत्यर्थः। एकविंशतिर्यान्यनुक्रान्तानि, एभ्योऽन्यान्यपि यानि कानिचित् स्युः, तान्युपलभ्य निर्वक्तव्यानि। तद्यथा,—कु इत्येतदसमाम्नातम् पृथिव्या नामधेयम्। उक्तं हि,—"नाग्निविन्नरकं याति न सत्पुत्री न कुप्रदः"—इति। तत्रैतस्मिन्नेकविंशके गणे "निर्ऋतिः" इत्येतदभिधानम्। "निरमणात्" निविष्टानि रमन्तेऽस्यां भूतानीति निर्ऋतिः पृथिवी। रमेर्धातोः (भू० आ०)। "ऋच्छतेः (तु० प०)" "इतरा" "कृच्छ्रापत्तिः" दुःखसम्भूतका, निर्ऋतिः पाप्मा। "सा" पुनरियं समाननामधेयत्वात् समानश्रुतित्वात् "पृथिव्या सन्दिह्यते"। "तयोः" समाननामधेयत्वेऽपि सति एव कर्मकृतो "विभागः"—एका निविष्टानां भूतानां रमयित्री, एका पुनः कृच्छ्रमापादयित्री। एवं नानाकर्माण्यभिधानानि निर्वक्तव्यानि॥

"तस्याः" कृच्छ्रापत्तेः पृथिव्या अपि "एषा" निर्वाचिका ऋग् "भवति"—॥ ३ ॥

य ईं चकार न सो अस्य वेद य ईं ददर्श हिरुगिन्नु तस्मात्। स मातुर्योना परिवीतो अन्तर्बहुप्रजा निरृतिमाविवेश। बहुप्रजाः कृच्छ्रमापद्यत इति परिव्राजका वर्षकर्मेति नैरुक्ता य ईं चकारेति करोतिकिरती सन्दिग्धौ वर्षकर्मणा न सो अस्य वेद मध्यमः स एवास्य वेद मध्यमो यो ददर्शादित्योपहितं स मातुर्योनौ मातान्तरिक्षं निर्मीयन्तेऽस्मिन् भूतानि योनिरन्तरिक्षं महानवयवः परिवीतो वायुनायमपीतरो योनिरेतस्मादेव परियुतो भवति बहुप्रजा भूमिमापद्यते वर्षकर्मणा शाकपूणिः सङ्कल्पयाञ्चक्रे सर्वा देवता जानामीति तस्मै देवतोभयलिङ्गा प्रादुर्बभूव तान्न जज्ञे तां पप्रच्छ विविदिषाणि त्वेति सास्मा एतामृचमादिदेशैषा मद्देवतेति ॥ ४ ॥

"य 'ईं' चकार"—इति। दीर्घतमस आर्षम्। त्रिष्टुप्। महाव्रते वैश्वदेवे शस्त्रे शस्यते। "अयं स शिङ्क्ते"—इतीयमपि तथैव समानार्षविनियोगा। जगती। हे अग्ने अम्यधार्माणे। कश्चित् "बहुप्रजाः" बह्वपत्यो दरिद्रः पुरुषः स दुष्पोषत्वादपत्यानां व्यापन्नत्वात् "कृच्छ्रं" दुःखम् "आपद्यते"। सा या तस्य

कृच्छ्रापत्तिः, सैवैतस्यामृचि निर्ऋतिशब्देनोच्यते "इति" एव "परिव्राजकाः" परिव्राजकानामस्यामृचि सम्प्रज्ञेयोऽर्थः ॥

स एष विस्तरेण प्रदर्श्यते।—'यः' 'चकार' करोति 'ईं' गर्भं 'न सः' 'अस्य' गर्भस्य तत्त्वं 'वेद' केवलं त्वसौ कामार्त्तः पुत्रार्थी वा करोत्येव गर्भम्। 'यः ईं ददर्श' यश्चैनं पश्यति 'हिरुग्' अन्तर्हितमेतस्मिन् जठरे, एतस्मिन् वा शरीरे। 'ईं नु' जन्तुम्। 'तस्मात्' तस्यैव एष गर्भो याथात्म्यतः प्रत्यक्षो भवत्यध्यात्मशास्त्रदृष्ट्या, नेतरस्य गर्भकर्त्तुः। 'सः' पुनरेष गर्भो 'मातुर्योनौ' गर्भाशयस्थाने 'अन्तः' उदरे पुष्यति, स मातुरशितपीतलीढभक्षितेन चतुर्विधाहारपरिणामे ततः 'परिवीतः' जरायुणा परिवेष्टितो यथाकालं जायते। अथैवं 'बहुप्रजाः' बहुशः प्रजायमानः स गर्भकर्त्ता गर्भतत्त्वमजानानः 'निर्ऋतिं' दुःखम् 'आविवेश' आविशतीत्यर्थः। एवं गर्भतत्त्वापरिज्ञानात् यो गर्भं करोति स दुःख मापद्यते, यस्तु अध्यात्मदृष्ट्या गर्भतत्त्वं वेद, स गर्भकर्मणो निवर्त्तते, स निर्ऋतिं नापद्यते। एवमस्यामृचि निर्ऋतिर्वेदनेत्येव परिव्राजकार्थः ॥

अन्ये तु ब्रुवते,—यः करोति गर्भं स गर्भभूतो जन्मान्तरेषु बहुशः प्रजायमानो जन्ममरणसन्तानानुभवविदां निर्ऋतिमाविशति। यो रेतः सिञ्चति, तद्रूपो भूयो जन्मान्तरेषु बहुशः प्रजायमानो जन्ममरणसन्तानाननुभवतीत्युक्तम्।

"वर्षकर्मेति नैरुक्ताः" वर्षकर्मैतदुच्यते। निर्ऋतिश्चात्र भूमिरुच्यते। एवं नैरुक्ता मन्यन्ते। यः करोति वर्षं, यो वा

किरति क्षिपति। कः पुनरसौ ? मेघः। स हि वर्षस्य कर्त्ता विक्षेप्ता वा। मेघाद्धि वर्षं प्रवर्त्तते। किं तस्य ? न सोऽस्य वर्षस्य तत्त्वं "वेद" यो ददर्श यः पश्यति "आदित्योपहितम्" आदित्यस्य रश्म्यन्तर्गतं वर्षमनभिव्यक्तम्। कश्चासौ अन्तर्गतः ? प्रावृट्काले वर्षभावेनाभिव्यक्तो बहुप्रजाः बहुशः प्रजायमाना निर्ऋतिं भूमिमाविशतीति समस्तार्थः॥

अथैकपदनिरुक्तम्।—"करोतिकिरती सन्दिग्धौ" धातू "वर्षकर्मणा" सम्बध्येते। उभयथा ह्युपपद्यते,—यः करोति यो वा क्षिपति। "मातान्तरिक्षम्" एतस्मिन् हि "भूतानि" "निर्मीयन्ते"। एतदुभयवकाशदानेन विशिष्टमुपकारं करोति। भूतानां जायमानानां "योनिरन्तरिक्षम्" आकाशस्यैव प्रदेशविशेषः कश्चित्। स वायुसंयुतः सन् उदकयोनिभावं पुष्णाति। तदेतत् "वायुना" तस्य सद्भावन्तं दृष्ट्वोक्तम्,—"परिवीत" भवति। इति शब्दसारूप्यप्रसक्तमुच्यते,—"अयमपीतरः" स्त्रीयोनिः "एतस्मादेव"। असावपि "परियुत." एव "भवति" स्नायुना मांसेन च॥

एवमेतस्मिन् मन्त्रे, नैरुक्तानां निर्ऋतिशब्देन भूमिरुच्यते, परिव्राजकानां कृच्छ्रापत्तिः। तदेवं मन्त्रेषु शब्दगतिविभुत्वादुभयमप्युपपद्यत एव। तद्यथा,—"दधिक्राव्णो अकारिषम् (ऋ० सं० ३, ७, १२, ६)"—इत्येष मन्त्रः, अग्न्युपस्थाने अग्निहोत्रे, धयमेव चाग्निष्टोमे "दधिक्राव्णोअकारिषमित्याग्नीध्रे दधि भक्षयन्ति (आ० गृ० ६, १३)"—इति दधिभक्षणे, तथाचाश्वमेधे

"दधिक्राव्णो अकारिषमित्युत्थितायां सर्वा जपन्ति"—इत्यश्वसन्निधावेनं पत्न्यो जपन्ति महिष्यामुत्थितायाम्। तत्रैवं सति प्रतिविनियोगमस्यान्येनार्थेन भवितव्यम्। त एते वक्तुरभिप्रायवशादन्यत्वमपि भजन्ते मन्त्राः, न हि एतेषु अर्थस्येयत्तावधारणमस्ति, महार्था ह्येते दुःपरिज्ञानाश्च। यथाश्वारोहवैशिष्ट्यादश्वः साधुः साधुतरश्च वहति, एवमेते वक्तृवैशिष्ट्यात् साधून् साधुतरांश्चार्थान् स्रवन्ति।

तत्रैवं सति लक्षणोद्देशमात्रमेवैतस्मिञ्छास्त्रे निर्वचनमेकैकस्य क्रियते। क्वचिच्च आध्यात्माधिदैवाधियज्ञोपदर्शनार्थः। तस्मादेतेषु यावन्तोऽर्था उपपद्येरन्—आधिदैवाध्यात्माधियज्ञाश्रयाः सर्व एव ते योज्याः, नात्रापराधोऽस्ति॥

'एवमेव सन्देहाधिकारमुपजीवन्नाह'—"शाकपूणिः सङ्कल्पयाञ्चक्रे,—सर्वा देवता जानामीति"। शाकानि यः पूणयति संहन्ति, स शाकपूणः, तस्यापत्यं शाकपूणिः आचार्य्यः। स सङ्कल्पयाञ्चक्रे, सङ्कल्पं कृतवान्। किम्? इति। सर्वा देवता जानामीति। "तस्मै" सङ्कल्पमेवं कृतवते "देवतोभयलिङ्गा" स्त्रीपुंलिङ्गा, अथवा मध्यस्थानलिङ्गा द्युस्थानलिङ्गा च "प्रादुर्बभूव"। "तां" पुरतोऽवस्थितां सतीं "न जज्ञे" न ज्ञातवान्,—किमियं स्त्री स्यादथवा पुरुष इति, अथवा किमियं मध्यस्थाना अथवा द्युस्थानेति। "ताम्", अजानन् "पप्रच्छ" "विविदिषाणि त्वा"। वेदितुमिच्छामि त्वाम्,—किमसि पुरुषः अथवा स्त्री? इति, अथवा किमस्यन्तरिक्षस्थानाथवा द्युस्थाना? इति।

"सा" एवं पृष्टा सती "अस्मै" शाकपूणये "एतामृचम्" "आदिदेश" आदिष्टवती। किम्? इति। "एषा मद्देवतेति" अस्यामृचि अहं देवतेति, त्वञ्च नैरुक्तः मामेतस्या ऋचः सकाशादर्थावगत्यावधारयेति—॥४॥

अयं स शिङ्क्ते येन गौरभीवृता मिमाति मायुं ध्वसनावधिश्रिता। सा चित्तिभिर्नि हि चकारमर्त्यं विद्युद्भवन्ती प्रति वव्रिमौहत ॥ अयं स शब्दायते येन गौरभिप्रवृत्ता मिमाति मायुं शब्दङ्करोति मायुमिवादित्यमिति वा वागेषा माध्यमिका ध्वंसने मेघेऽधिश्रिता सा चित्तिभिर्निकरोति मर्त्यं विद्युद्भवन्ती प्रत्यूहते वव्रिं वव्रिरिति रूपनाम वृणोतीति सतो वर्षेण प्रच्छाद्य पृथिवीं तत् पुनरादत्ते ॥५॥

इति द्वितीयाध्यायस्य द्वितीयःपादः ॥ २, २ ॥

कतमा पुनरस्मादृग्? इति। उच्यते,—"अयं स शिङ्क्ते" —इति। "अयं स शब्दायते" स एव मेघः शब्दं करोति। येन मेघेन किं कृतम्? इति। 'येन गौरभीवृता' येन माध्यमिका वागभिप्रच्छादिता सती "मिमाति मायु" निर्मिमीते निर्वर्त्तयति मायुम्, "शब्दं करोति" इत्यर्थः। 'मायुः, काकुत्'—इति च वाङ्नामसु पठितम्। अथवा मायुरादित्यो भवति, सर्वभूतनिर्माता। तमिवात्मानं निर्मिमीते। क्वावस्थितः? "ध्वसने"

उदकध्वंसने उदकस्रंसने मेघे "अधिश्रिता"। अयं तावदर्द्धर्चो मेघान्तर्वर्त्तिन्या वाचो व्यक्तविद्युद्रूपाया अभिधायकः, मेघरूपत्वात् पुरुषत्वाभिप्रायः। अथवायमुत्तरस्त्रीत्वाभिप्रायः। यैवं-लक्षणा वा कर्मलरूपा, मेघशरीरा वा। 'सा चित्तिभिः' चट-चटाशब्दकर्मभिः 'नि हि चकार' नीचैः करोति 'मर्त्य' मनुष्यम्। सर्वो हि विभ्यत्तस्या आसीदिति अवनमति च। कदा पुनर्नि-करोति मर्त्यम्? इति, उच्यते,—"विद्युद् भवन्ती" इति, विद्यु-दात्मना स्वशरीरेणाभिनिर्वर्त्तमाना, तदा हि दारुणशब्दचटाशब्दो भवनीति विशेषेण भयङ्करम्, न तथा विद्युद्रहितः। सैवमात्मान माविष्कृत्य विद्युद्रूपेण विक्षिप्य सर्वासु दिक्ष्वात्मानं वर्षेण प्रच्छाद्य पृथिवीम्। ततो वर्षव्युपरमे "प्रति" 'औहत' "ऊहते" "वव्रिम्" प्रत्युपसंहरति रूपमात्मीयमदृश्यं करोतीत्यर्थः। "वव्रि-रिति रूपनाम", तद्व्यावृत्या समाश्रयं वर्त्तते। यस्मिंस्तु पक्षे मध्यस्थानलिङ्गा द्युस्थानलिङ्गा चेति तस्मिन् पक्षे मेघरूपत्वमवि-वक्षितम्, मेघवाचो विद्युद्रूपत्वञ्च। किन्तु एतावद्विवक्षितम्,— मेघाश्रया शब्दवती भूत्वा माध्यमिका वाक् विद्युदात्मना स्थित्वा वर्षेण प्रच्छाद्य पृथिवीं तद्वर्षमुदकरूपभूतं जलाशयेभ्यश्चादित्या-त्मना स्थित्वा पुनरादत्ते, विद्युदात्मना मध्यस्थाने स्थित्वा वर्षति, आदित्यात्मना द्युस्थाने स्थित्वा पुनरादत्त इत्यभिप्रायः। पश्यति हि,—"त्रेधाभावाय पृथिव्यामन्तरिक्षे दिवि (दै० १२, २, ८)" —इति॥

सेयमेवैव देवता मध्यस्थाना विद्युद्रूपा, मध्यस्थाना वाऽऽदि

त्यरूपा, इत्ययमेवंलक्षणो देवतातत्त्वसन्देह उपेक्षितव्यो मन्त्र-दर्शनाच्च निर्वक्तव्य इत्ययं मन्त्रसङ्क्षेपार्थः ॥

सा पृथिव्या सन्दिह्यत इत्यनेन सन्देहसामान्येनोदाहृतमिद-मत्र मतं शाकपूणेरित्येवमादि ॥

अनुक्रमणं त्वधिकृतम्। तस्मिन् गोशब्द एको निरुक्तः प्रकारोपदर्शनार्थम्, इतराण्यभ्यूह्य निर्वक्तव्यानि। तद्यथा,— 'गमा' गमनात्, अस्यां गच्छन्ति भूतानि, 'ज्मा' जमनात्, जमन्ति गच्छन्ति अस्यां भूतानि,—इत्येवमादि ॥

नैघण्टुकांस्तु याञ्छब्दान् प्रत्यर्थगणसंस्थितान्।
छन्दोभ्योऽन्विष्य तत्त्वार्थान् निर्ब्रूयाद् योगतस्तु तान्॥
इति निरुक्तवृत्तौ सप्तमाध्यायस्य द्वितीयः पादः ॥ २ ॥

तृतीयः पादः

हिरण्यनामान्युत्तराणि पञ्चदश हिरण्यं कस्माद्ध्रियत आयम्यमानमिति वा ह्रियते जनाज्जनमिति वा हितरमणं भवतीति वा हर्यतेर्वा स्यात् प्रेप्साकर्मणोऽ-न्तरिक्षनामान्युत्तराणि षोडशान्तरिक्षं कस्मादन्तरा क्षान्तं भवत्यन्तरेमे इति वा शरीरेष्वन्तरक्षयमिति वा तत्र समुद्र इत्येतत्पार्थिवेन समुद्रेण सन्दिह्यते समुद्रः

कस्मात्समुद्द्रवन्त्यस्मादापः समभिद्रवन्त्येनमापः सम्मोदन्तेऽस्मिन् भूतानि समुदको भवति समुनत्तीति वा, तयोर्विभागस्तत्रेतिहासमाचक्षते देवापिश्चार्ष्टिषेणः शन्तनुश्च कौरव्यौ भ्रातरौ बभूवतुः स शन्तनुः कनीयानभिषेचयाञ्चक्रे देवापिस्तपः प्रतिपेदे ततः शन्तनो राज्ये द्वादश वर्षाणि देवो न ववर्ष तमूचुर्ब्राह्मणा अधर्मस्त्वया चरितो ज्येष्ठं भ्रातरमन्तरित्याभिषेचितं तस्मात्ते देवो न वर्षतीति स शन्तनुर्देवापिं शिशिक्ष राज्येन तमुवाच देवापिः पुरोहितस्तेऽसानि याजयानि च त्वेति तस्यैतद्वर्षकाममूक्तं तस्यैषा भवति ॥ १ ॥

"हिरण्यनामान्युत्तराणि पञ्चदश"। हिरण्यस्य नामान्युत्तराणि। कुतः? प्रकृतेभ्यः पृथिवीनामभ्यः, पृथिव्यामेव हिरण्यमुत्पद्यत इत्यतः पृथिव्यभिधानानन्तरं हिरण्यनामानि समाम्नातानि। कियन्ति पुनस्तानि? पञ्चदश, पञ्च च दश च पञ्चदश। यानि समाम्नातानि। असमाम्नातान्यपि सन्ति,—हाटकसुवर्णचामीकरजशातकुम्भादीनि। कतमानि पुनस्तानि समाम्नातानि? इति। उच्यते,—"हेम, चन्द्रं, रुक्मम्"—इत्येवमादीनि। हितं ममेदमिति सर्वं एवैतन्मन्यते, तस्माद्धेम। चन्द्रम्, चन्दतेः कान्तिकर्मणः, सर्व एव हि तत् कामयते। रुक्मम्, रोचतेर्ज्वलतिकर्मणः, तद्धि रोचिष्णुर्भवतीति। एवमूहितव्यं सर्वत्र निर्वचनम् ॥

आह,—"हिरण्यं कस्मात्" ? उच्यते,—"ह्रियते आयम्यमानमिति वा"। आयम्यमानं ह्रियत एव शिल्पिभिः, कटकरुच कस्वस्तिकादिभावेन विस्तीर्य्यमाणम्। "ह्रियते जनाज्जनमिति वा"। तेन हि व्यवहारः क्रियते। ततस्तन्नैकत्रावतिष्ठते, ह्रियत एव सर्वदा। "हितरमणं भवतीति, वा"। यस्य हि तद् भवति, तस्य हितञ्च दुर्भिक्षादिषु, तद् भवति रमणञ्चेति। तेन गृहीतेन मूषिकोऽपि रमते, किमुत मनुष्यः। "हर्य्यतेर्वा स्यात् प्रेप्साकर्मणः" तद्धि सर्वैरेव प्रार्थ्यते लोकानुक्रमेणैव॥

"अन्तरिक्षनामान्युत्तराणि षोड़श"। षट् च दश च षोड़श कतमानि पुनस्तानि ? "अम्बरं, वियद्, व्योम"—इत्येवमादीनि। अम्बरमम्बुमद्भवति। नानाभावेन सर्वतो वियतमिति वियत्। नानाप्रकारमेतदवति भूतानीति व्योम। एवमाद्यन्यूहितव्यम्॥

आह,—"अन्तरिक्षम्" एव तावत् "कस्मात्" ? उच्यते,—"अन्तरा" हीदं द्यावापृथिव्योरवस्थितम्, "क्षान्त" च "भवति" पृथिव्यन्तमित्यर्थः। अथ "वा" "अन्तरा" "इमे" द्यावापृथिव्यौ क्षियति निवसति "इति" अन्तरिक्षम्। अथ "वा" "शरीरेषु" एतदेव "अन्तर्" मध्येऽवस्थितम् "अक्षयम्"। इतराणि पृथिव्यादीनि भूतानि क्षीयन्ते तस्मादक्षयत्वादन्तरिक्षम्॥

"तत्र" तस्मिन् षोड़शके अन्तरिक्षनामसमुदाये "समुद्रः इत्येतत्" अभिधानमुभयाभिधानम्। उभयाभिधायित्वात् "पार्थिवेन समुद्रेण" एतेन जलाशयेन "सन्दिह्यते" एतदत्र सन्देहपदम्।

आह,—"समुद्रः कस्मात्" ? इति। उच्यते,—"समुद्द्रव-न्त्यस्मादापः" वीचितरङ्गशीकरादिभावेन। "समभिद्रवन्त्येन-माप." सर्वा एव ह्यापो निम्नानुसारित्वात् समुद्रमेवाभिमुख्येन द्रवन्ति, स हि निम्नो भवति। "सम्मोदन्तेऽस्मिन् भूतानि" संहृष्यन्ति जलचराणि सत्त्वानि, बहूदकत्वात्। "समुदको भवति"। उद्र इत्युदकनाम, तदस्मिन् संहतमिति समुद्रः। "समुनत्तीति वा" सङ्क्लेदयतीत्यर्थः। अतो हि प्रसृतैरम्भोभिः सर्वमिदं सङ्क्लिद्यते। "तयोर्विभागः"॥

यस्मिन्नुदाहरणे लक्ष्यते, "तत्र" "इतिहासमाचक्षते" आचार्य्याः। निदानभूतः 'इति हैवमासीत्'—इति य उच्यते स इतिहासः। कतमः पुनरसौ ? इति। उच्यते,—"देवापिश्चा-र्ष्टिषेणः" इत्येवमादीनि। देवापिश्चार्ष्टिषेणः, "शन्तनुश्च" आर्ष्टिषेण एव "कौरव्यौ" कुरुवंशप्रभवौ "भ्रातरौ बभूवतुः"। तयोरेको यः "कनीयान्" "शन्तनुः" नाम, "स." आत्मानम् "अभिषेचयाञ्चक्रे" अभिषेचितवानित्यर्थः। सोऽभिषिक्तः सन् राजा बभूव, इतरः पुन-र्ज्येष्ठः "देवापिस्तपः प्रतिपेदे"। स किल तीव्रेण तपसा ब्राह्म-ण्यमापेदे, विश्वामित्रवत्। "ततः" तेनापचारेण ज्येष्ठातिक्रम-जेन "शन्तनोः" "राज्ये" राष्ट्रे "द्वादश वर्षाणि देवो न ववर्ष"। अवर्षति देवे "तं" शन्तनुम् "ऊचुः" उक्तवन्तः "ब्राह्मणाः"— "अधर्मस्त्वया चरितः"—"ज्येष्ठं भ्रातरम्" "अन्तरित्य" अति-क्रम्य "अभिषेचितम्" अभिषेक आत्मनः कारितो यतस्त्वया, "तस्मात्" तेन मर्य्यादातिक्रमेण "ते" तव राज्ये "देवो न वर्षति"

प्राप्तकालं प्रतिपद्यस्व—"इति"। "सः" एवमुक्तः "शन्तनुः" "देवापिं" "शिशिक्ष" पुनः पुनः शशास अभिगमितवानित्यर्थः। कथम्? "राज्येन" अभ्युद्यतेन। अर्थ्यमानः "देवापिरुवाच" काममहं "पुरोहितस्ते" "असानि" भवानि "याजयानि च" "त्वां" त्वां यार्षिकेण कर्मणा। न च राजा भविष्यामि, भवानेवास्तु राजेत्यभिप्रायः॥

"तस्य" देवापेः "एतद् वर्षकामसूक्तम्" आविरभूत्। तत्र "तस्य" समुद्राभिधानसन्दिग्धस्य प्रविभागोपदर्शनाय "एषा" निर्वाचिका ऋग् "भवति"॥ १॥

आर्ष्टिषेणो होत्रमृषिर्निषीदन्देवापिर्देवसुमतिं चिकित्वान्।
स उत्तरस्मादधरं समुद्रमपो दिव्या असृजद्वर्ष्या अभि।

आर्ष्टिषेण ऋष्टिषेणस्य पुत्र इषितसेनस्येति वा सेना सेश्वरा समानगतिर्वा पुत्रः पुरु त्रायते निपरणाद्वा पुं नरकं ततस्त्रायत इति वा होत्रमृषिर्निषीदन्नृषिर्दर्शनात् स्तोमान् ददर्शेत्यौपमन्यवस्तद्यदेनांस्तपस्यमानान् ब्रह्म स्वयम्भ्वभ्यानर्षत्तदृषीणामृषित्वमिति विज्ञायते देवापिर्देवानामाप्त्या स्तुत्या च प्रदानेन च देवसुमतिं देवानां कल्याणीं मतिं चिकित्वांश्चेतनावान्। स उत्तरस्मादधरं समुद्रमुत्तर उद्धततरो भवत्यधरोऽधोरोऽधो न धावतीत्यूर्ध्वगतिः प्रतिषिद्धा तस्योत्तरा भूयसे निर्वचनाय॥ २॥

"आर्ष्टिषेणः ऋष्टिषेणस्य पुत्रः, इषितसेनस्येति वा"। अन्यकल्पान्तरीणोऽन्यकल्पान्तरीणस्यैव शन्तनोर्वर्षार्थीये कर्मणि होतृत्वे वृतः 'होत्रं' कर्म प्रति 'निषीदन्' उपविष्टवान्। ततोऽपि "देवापिः" नाम नाम्ना "देवसुमतिं" देवानां कल्याणीं मतिमुदकसम्प्रदानाभिमुखीं कर्त्तुं "चिकित्वान्" जानानः। स हि तथाऽस्तौत्, यथा देवानामुदकसम्प्रदानाभिमुखी मतिरभूत्। ततः परितुष्टेषु देवेषु 'सः' देवापिः 'उत्तरस्मात्' अन्तरिक्षात् समुद्रात् 'अधरं' समुद्रं पार्थिवं प्रति। एष विभागः समुद्रयोः। 'अपो दिव्याः' प्रशस्ताः शस्यसम्पत्करीः 'असृजत्' अक्षारयत्। किंलक्षणाः? 'वर्ष्याः' वर्षभूताः 'अभि' सर्वभूतानामुपरि। स देवाप्यधिकारे वर्त्तमान एतदकरोत्। अन्यस्मिन् कल्पेऽपि देवापिर्ममाप्येतद्देवास्त्विवल्येव वर्त्तमानेनाभिसम्बध्यत इति समस्तार्थः॥

अथैकपदनिरुक्तम्।—ऋष्टिरायुधविशेषः, तद्वहुला सेना यस्य, सोऽयमृष्टिषेणः। इषितसेनो वा नित्यमेव प्रेषितसेनः शत्रून् प्रति। "सेना, सेश्वरा"। इनेतीश्वरनाम, तेन हि सा नित्यमेव संयुक्ता भवति। "समानगतिर्वा" समानमेकमर्थमुद्दिश्य जयाख्यमेतीति सेना। "पुत्रः, पुरु त्रायते" वह्वपि यत् पित्रा पापं कृतं भवति, ततोऽयं त्रायति पुत्रः। "निपरणाद्वा" निपृणाति निददाति ह्यसौ पिण्डान् पितृभ्यः इति पुत्रः। अथवा "पुम्" इति "नरकं" नरकस्थानमुच्यते, "ततस्त्रायत इति वा" पुत्रः। "ऋषिर्दर्शनात्" पश्यति ह्यसौ सूक्ष्मानर्थान्। "स्तोमान्

ददर्श त्यौपमन्यवः"। मन्त्राः स्तोमाः, तानसौ तारकेण ज्ञानेन पश्यतीति "औपमन्यवः" आचार्यो मन्यते। ब्राह्मणमपि चैतस्मिन्नर्थे दर्शयति,—"तद्यदेनांस्तपस्यमानान् ब्रह्म०" इत्यादि। 'तत्' एतत्। उच्यते,—यत्कृतमृषीणामृषित्वम्। 'यत्' यस्मात् 'एनान्' तपस्यमानान् तप्यमानान् 'ब्रह्म' ऋग्यजुःसामाख्यं 'स्वयम्भु' अकृतकम् अभ्यागच्छत्, अनधीतमेव तत्त्वतो ददृशुः तपोविशेषेण। 'तदृषीणामृषित्वम्'—इत्येवं ब्राह्मणेऽपि "वि" विचार्य्यमाणं "ज्ञायते"। "देवापि, देवानामाप्त्या" स हि स्तुतिभिर्देवानाप्नोति, हविःसम्प्रदानेन च। "उत्तरः, उद्धततरः उद्गततरो भवति" उपरिष्टाद्वस्थानात्। "अधरः" अधोरः"। किमुक्तं भवति ? अध एवासौ चरति। "अधः" पुनः "न धावति"। तस्य ह्यधोगतित्वादेव "ऊर्ध्वगतिः प्रतिषिद्धा"

"तस्योत्तरा भूयसे निर्वचनाय"। किमुक्तं भवति ? 'तस्य' एवार्थस्य प्रकृतस्य यथोत्तरस्मात् समुद्राद् वृष्टिमयाचत देवेभ्यो देवापिः, यथा च पौरोहित्यमकरोत्, यथा वा अयाजयच्छन्तनुः वर्षार्थी, येन कर्मणा। 'भूयसे' बहुतराय 'निर्वचनाय' 'उत्तरा' एषा—॥ २॥

यद्देवापिः शन्तनवे पुरोहितो होत्राय वृतः कृपयन्नदीधेत्। देवश्रुतं वृष्टिवनिं रराणो बृहस्पतिर्वाचमस्मा अयच्छत्॥ शन्तनुः शं तनोऽस्त्विति वा शमस्मै तन्वा अस्त्विति वा पुरोहितः पुर एनं दधति होत्राय वृतः

कृपायमाणोऽन्वध्यायद् देवश्रुतं देवा .एनं शृण्वन्ति वृष्टियाचिनं रराणो रातिरभ्यस्तो बृहस्पतिर्ब्रह्मासीत् सोऽस्मै वाचमयच्छद् बृहदुपन्याख्यातम् ॥ ३ ॥

इति द्वितीयाध्यायस्य तृतीयः पादः ॥२, ३॥

यद्देवापिरिति। 'यत्' यस्मात् 'देवापिः' 'शन्तनवे' राज्ञे "पुरोहितः" पुरोहितो ह्येवाग्निकर्मणि व्याप्रियते, स पुरोहितः सन् देवापिः "होत्राय" होतृकर्मणे वर्षार्थीये कर्मणि "वृतः" सन् 'कृपयन्' "कृपायमाणः" राज्ञः 'अदीधेत्' "अन्वध्यायत्" वृष्टिर्भवेदिति। तं "देवश्रुतं" देवापिमेनं 'वृष्टिवनिं' "वृष्टियाचिनं" "रराणः" अददन्। "बृहस्पतिः" तस्मिन्नेव कर्मणि "ब्रह्मा आसीत्" ब्रह्मत्वेऽवस्थितः। "सः" "अस्मै" वर्षसाधिकां "वाचम्" "अयच्छत्" अददादित्यर्थः। तया वाचा तदनुगृहीतया देवान् स्तुत्वा तेभ्यो वर्षमलभतेति समस्तार्थः॥

अथैकपदनिरुक्तम्।—"शन्तनुः" कस्मात्? इति। उच्यते —स हि कञ्चिद्रोगार्त्तं दृष्ट्वा ब्रवीति हि "तनोः शं" तव "अस्तु इति" तनोऽसावगदो भवति। अथ"वा" "शमस्मै तन्वा अस्त्विति" एवममन्यावाशास्ते। शमिति सुखनाम। तनुः शरीरं तदसौ नित्यं शरीरायाशास्ते। "पुरोहितः" शान्तिकपौष्टिकाभिचारिकेषु कर्मसु "पुर एनं दधति" राजानः पुरस्कुर्वन्तीत्यर्थः। "देवश्रुतं" "देवा" हि "एनं" स्तुतीरुच्चारयन्तं "शृण्वन्ति" इति देवश्रुत्, तं देवश्रुतम्। "रराणः" इति "रातिः" दानार्थः "अभ्यस्तः"॥

"बृहदुपव्याख्यातम्"। "बृहदिति महतो नामधेयम्, परिवृढं भवति" इति। मन्त्रनिदानद्वारेण धर्मोऽयमत्र दर्शितः। ज्येष्ठे तिष्ठति कनीयसो राज्यप्राप्तिर्धर्मातिक्रमः। धर्मातिक्रमे च देवो न वर्षतीति। निरुक्तपक्षे,—ऋष्टिषेणो मध्यमः, तदपत्यमयमग्निः पार्थिव आर्ष्टिषेणो देवापिः, स शन्तनवे सर्वस्मै यजमानायेति योज्यम्। बृहस्पतिरिति मध्यमः। स्तनयित्नुलक्षणां वाचमित्यर्थः॥ ३॥

इति निरुक्तवृत्तौ सप्तमाध्यायस्य तृतीयः पादः॥ ३॥

—०—

॥ चतुर्थः पादः ॥

साधारणान्युत्तराणि षड् दिवश्चादित्यस्य च यानि त्वस्य प्राधान्येनोपरिष्टात्तानि व्याख्यास्याम आदित्यः कस्मादादत्ते रसानादत्ते भासं ज्योतिषामादीप्तो भासेति वादितेः पुत्रः इति वाल्पप्रयोगं त्वस्यैतदार्चाभ्याम्नाये सूक्तभाक् सूर्य्यमादितेयमन्यासामपि देवतानामादित्यप्रवादाः स्तुतयो भवन्ति तद्यथैतन्मित्रस्य वरुणस्यार्यम्णोदक्षस्य भगस्यांशस्येत्यथापि मित्रावरुणयोः। आदित्या दानुनस्पती

दानपती। अथापि मित्रस्यैकस्य। प्र स मित्र मर्त्तो अस्तु प्रयस्वान्यस्त आदित्य शिक्षति व्रतेनेत्यपि निगमो भवत्यथापि वरुणस्यैकस्य। अथा वयमादित्य व्रते तव। व्रतमिति कर्मनाम वृणोतीति सत इदमपीतरद्व्रतमेत-स्मादेव निवृत्तिकर्म वारयतीति सतोऽन्नमपि व्रतमुच्यते यदावृणोति शरीरम् ॥ १ ॥

लोकाभिधानाधिकारेणेदमुच्यते,—"साधारणान्युत्तराणि षट्, दिवश्चादित्यस्य च" इति। समानं ध्रियन्ते इति 'साधारणानि' नामानीत्यकारो वर्त्तते। अतएव 'उत्तराणि' प्रकृतमपेक्ष्य। किञ्चात्र प्रकृतम्? अन्तरिक्षनामानि (४४ पृ०)। तेभ्य इमान्यु-त्तराणि (५० पृ०)। कियन्ति पुनस्तानि? 'षट्' (६)। कयोः पुनः साधारणानि? 'दिवश्चादित्यस्य च'। कतमानि पुनस्तानि? "स्वः, पृश्निः, नाकः"—इत्येवमादीनि। "यानि त्वस्य" आदित्यस्य "प्राधान्येन" वर्त्तन्ते प्रधानस्तुतिभाञ्जि नामानि,—"सविता" भगः, सूर्य्यः, पूषा"—इत्येवमादीनि (४८३ पृ०), "तानि उपरि-ष्टात् (दै० का० ६, २, १—३, ६) व्याख्यास्यामः" सतद्दशेऽध्याये। इमानि तु नैघण्टुकानि संसृष्टरूपाणि च द्य नामभिः साकमित्यत इह नैघण्टुकप्रकरणे निरुच्यन्ते ॥

आह,—"आदित्य" एव तावत् "कस्मात्?" इति। उच्यते, —शृणु। "आदत्ते" ह्यसौ "रसान्" रश्मिभिरित्यादित्यः।

"आदत्ते भास ज्योतिषाम्' तदुदये हि चन्द्रादीना प्रभानाशो भवत्येव, प्रहापेक्षमेतत्। "आदीतो भासेति वा' सर्वतो ह्येष भासा आदीप्त आवृतो भवति। "अदितेः पुत्र इति वा" अदितिर्देव माता, तस्या पुत्र, सोऽयमादितेय सन्नादित्य इत्युच्यते।

"अल्पप्रयोग त्वस्यैतदार्चाभ्याम्नाये सूक्तभाक् सूर्य्यमादितेयम्" इति। 'अल्पप्रयोगम्' अल्पविषयम्। 'तु' शब्दो विशेषणार्थ, एतद्देवाल्पप्रयोगविषयम्, इतराणि सवितृभगपूषादीनि बहुप्रयोगविषयाणि 'अस्य' आदित्यस्य। क्वाल्पप्रयोगविषयम्? 'आर्चाभ्याम्नाये' ऋचो यस्मिन्नभ्युपर्युपर्य्याम्नाता, सोऽयमार्चाभ्याम्नायो दाशतय, तस्मिन्नल्पप्रयोगविषयम्। एतदृदिते पुत्रत्वाभिप्रायमभिधानम्। आदितेय इति सूक्तभाक्' एव चैतदभिधानम्, न हविर्भाक, न ह्यादितेय इत्यनेन नाम्ना हविरा ध्वर्य्यवे चोदितपूर्वमस्ति। यथा त्वेतत् सूक्तमेव नैघण्टुकवृत्त्या भजते, तथेदमुदाहरणम,—'सूर्यमादितेयम्' इति "यद्देदेन मद धुर्यक्षियास (ऋ० स० ८, ४, १२, १)"—इत्यस्यामृचि। अन्ये तु मन्यन्ते,—आदित्य इत्येतद्देवाल्पप्रयोगमिति। तत्र त्वेतद् विरुद्ध्यते,—सूक्तभागिति। हविरपि ह्यनेनाभिधानेन चोद्यते,— "आदित्य बहुरूपमालभत"—इति। "तस्य च पशोरेतत् पत्यं मादित्यो देव उदगात् पुरस्तात्' —इति। अथ चैवमन्यथा वाक्यद्वयविभागेन स्यात्,—अल्पप्रयोग त्वस्यैतदार्चाभ्याम्नाये आदित्य इति हविर्भाक्, न सूक्तभाक्, अल्प हवि, सूक्तभाग्विषयमित्यर्थ। इदन्त्वन्यत्,—सूक्तमेव नैघण्टुकवृत्त्या भजते, कदाचिदपि हवि।

तद्यथा—"सूर्य्यमादितेयम् (ऋ० सं० ८, ४, १२, १)"—इति ॥

आदित्यशब्दप्रसक्तमाह,—एवम् "अन्यासामपि देवतानाम्" इति। देवता यज्ञमपेक्ष्येदमुच्यते,—"आदित्याभिधानप्रवादाः स्तुतयो भवन्ति"। "तद्यथा एतत्" उदाहरणजातम्,—"मित्रस्य वरुणस्यार्य्यम्णो दक्षस्य भगस्यांशस्य इति"। "इमा गिर आदित्येभ्यो घृतस्नूः सनाद्राजभ्यो जुह्वा जुहोमि। शृणोतु मित्रो अर्य्यमा भगो नस्तुविजातो वरुणो दक्षो अंशः" ॥ (ऋ० सं० २, ७, ६, १)।—इत्यस्यामृचि सर्व एवादित्यप्रवादाः स्तुत्या स्तूयन्ते ॥

"अथापि मित्रावरुणयोः" आदित्यप्रवादाः स्तुतयो भवन्ति। तद्यथा,—"आदित्या दानुनस्पती। दानपती"। "ता सम्राजा घृतासुती आदित्या दानुनस्पती। सचेते अनवह्वरम् ॥" (ऋ० सं० २, ८, ८, १)। गायत्रीयं गृत्समदेन दृष्टा। अभिप्लवस्य षडहस्य द्वितीयेऽहनि प्रउगं नाम शस्त्रम्, तत्र "अयं वां मित्रा-वरुणा सुतः सोमः (ऋ० सं० २, ८, ७, ४)"—इत्येष तृचः शस्यते, तस्योत्तमा एषा। 'ता सम्राजा' तौ सन्दीप्तौ "घृतासुती" तौ हि घृतमुदकमासुवाते, वर्षकर्मणा जनयतः। 'आदित्या' अदितेः पुत्रौ 'दानुनस्पती' दानानामीशाते तौ यजमानैः सम्यक् स्तुतिभिर्हविभिश्च संसेवितौ सन्तौ 'सचेते' प्रतिसंसेवेते यजमान-मभिमतैर्दानैः। 'अनवह्वरम्' अनवरुध्यमानावित्यर्थः। यजमान-विशेषणं वा युक्तम्। न कृतघ्नौ, शक्तौ च दातुमित्येवं मित्रावरुणावत्र स्तूयेते ॥

"अथापि मित्रस्यैकस्य" आदित्यप्रवादा स्तुतिर्भवति। तद्यथा,—"प्र स मित्र मर्त्तो अस्तु प्रयस्वान् यस्त आदित्य शिक्षति व्रतेन। न हन्यते न जीयते त्वोतो नैनमंहो अश्नोत्यन्तितो न दूरात्॥" (ऋ० सं० ३, ४, ५, २)। अयमप्यन्ये बहवो निगमा इत्यपिशब्द। प्र स मित्रेति विश्वामित्रेण दृष्टा, त्रिष्टुप्। मैत्रस्य चरो पुरोऽनुवाक्या। 'प्र अस्तु' प्रकर्षेणास्तु भवतु। हे 'मित्र' 'आदित्य' अदिते पुत्र। 'स मर्त्त' स मनुष्य 'प्रयस्वान्' अन्नवान्। य किं करोति? 'य' 'ते' तुभ्य 'शिक्षति' ददाति 'व्रतेन' कर्मणा, निर्वपणप्रोक्षणादिना सस्कृत्येद हविश्चरुलक्षणम्। किञ्च, एवमतिप्रभावस्त्व येन स मर्त्तो यस्तव यष्टा 'त्वोत' त्वत्परिग्रहे वर्त्तमान, त्वया रक्षित 'न' केनचित् प्रत्यनीकभूतेनातिबलेनापि शत्रुणा 'हन्यते' हिंस्यते। 'न' नाहतोऽपि स च 'जीयते' वशीक्रियते केनचित्। न च केवल शत्रूणामनाधृष्य? 'न' 'एन' त्वोत सन्तम् 'अह' अपि पापमपि 'अश्नोति' व्याप्नोति यत् 'अन्तित' 'अन्तिकात् समीपात्, यत् स्वशरीरादेव वाङ्मनश्चक्षुर्निमित्तमुत्पद्यते पापम्, तदुत्पत्तिसमकालमेव त्वदनुग्रहादपध्वस्यते, ततस्त्वेन न व्याप्नोति। न च केवलं यदन्तिके उत्पद्यते, तदेवैन न व्याप्नोति, किन्तर्हि? यदपि 'दूरात्' पुत्रभ्रातृजायादिद्वारेणैवमास्कन्दति, तदपि 'न' एनम् अभिव्याप्तु शक्नोति त्वोत सन्तम्। एव महानुभावस्त्वम्, ततस्त्वा स्तुम इत्यभिप्राय॥

"अथापि वरुणस्यैकस्य" आदित्यप्रवादा स्तुतिर्भवति।

तद्यथा,—"अथा वयमादित्य व्रते तव" इति। "उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमं श्रथाय। अथावयमादित्य व्रते तवानागसो, अदितये स्याम॥" (ऋ० सं० १, २, १५, ५)। अनया त्रिष्टुभोपाकृतः शुनःशेपो वरुणं स्तुतवान्, आत्मानं मोचयिष्यन्। वरुणप्रघासेष्ववभृथेष्टौ वारुण्यामिष्ट्यां हविषः पुरोऽनुवाक्येयम्। हे 'वरुण!' त्रिषु स्थानेषु—अधो मध्ये उपरिष्टाच्च, 'वयम् आवद्धाः स्वैः पाशैर्यतोऽतो ब्रूमः।—स्तुत्या हविषा चोपसृतस्त्वमस्माभिरतस्तावत् 'उत्तमं' 'पाशम्' उपरिष्टादवस्थितम् 'अस्मत्' अस्मत्तः 'उत् श्रथाय' ऊर्ध्वं श्लथय। उच्छृत्य च विमुञ्चास्मानपीडयन्। योऽपि चायं 'अधमः' ते पाशः अस्मासु वर्त्तते, एनम् अर्वाञ्चम् 'अव' श्रथय अवमुञ्च। तथाच योऽप्ययं 'मध्यमः' ते पाशोऽस्मन्मध्ये वर्त्तते, एनमपि तथैवावस्थितम्तमभिसर्जयन ऊर्ध्वमधो वा अदुःखयन्नस्मान् 'वि' श्रथय विमुञ्च। अथैवं त्वया 'वयं' सर्वविमुक्तपाशाः सन्तो हे 'आदित्य'! अदितेः पुत्र! वरुण! 'अनागसः' अपापाः संशुद्धसर्वकिल्बिषाः। एतदेव हि यौष्माकीणं पाशत्रयमागः, तेनावमुक्ताः सन्तः 'तव' एव 'व्रते' तवैव परिचरणकर्मणि 'अदितये' चात्मनोऽदीनत्वाय अनुपक्षयाय आदरवन्तः स्थिताः 'स्याम' इत्याशीः॥

निगमप्रसक्तमुच्यते।—"व्रतमिति कर्मनाम (१८९ पृ०), "वृणोतीति"। एवं कर्त्तरि कारके "सतः" वृणोतेः, तद्धि कर्म शुभञ्च कृतं सदावृणोति कर्त्तारम्। "इदमपीतरद् व्रतमेतस्मादेव"

"निवृत्तिकर्म" यमनियमाख्यं बहिर्वेदिकमान्तर्वेदिकं वा, यदग्निसन्निधावुपेयते, तत् पुनः "वारयतीति" एवं 'सतः" तद्विषयेषु प्रवर्त्तमानं पुरुषं स्त्र्यादिषु वारयति, तदनुसृत्य स पुरुषो निवर्त्ततेऽवकीर्णो, भविष्यामीत्येतस्माद् भयात्। "अन्नमपि व्रतमुच्यते, यदावृणोति शरीरम्"। रसशोणितमांसमेदोमज्जास्थिभावेन विपरिणममानम् ॥ आदित्यशब्दप्रसक्तानुप्रसक्तमिदमुक्तम् ॥ १ ॥

स्वरादित्यो भवति सु अरणः सु ईरणः स्वृतो रसान् स्वृतो भासं ज्योतिषां स्वृतो भासेति वैतेन द्यौर्व्याख्याता। पृश्निरादित्यो भवति प्राश्नुत एनं वर्ण इति नैरुक्ताः संस्प्रष्टा रसान् संस्प्रष्टा भासं ज्योतिषां संस्पृष्टो भासेति वाथ द्यौः संस्पृष्टा ज्योतिर्भिः पुण्यकृद्भिश्च। नाक आदित्यो भवति नेता भासां ज्योतिषां प्रणयोऽथ द्यौः कमिति सुखनाम तत् प्रतिषिद्धं प्रतिषिध्येत। न वा अमुं लोकं जग्मुषे किञ्च नाकम्। नवा अमुं लोकं जग्मुषे किञ्च नासुखं पुण्यकृतो ह्येव तत्र गच्छन्ति गौरादित्यो भवति गमयति रसान् गच्छत्यन्तरिक्षेऽथ द्यौर्यत् पृथिव्या अधि दूरङ्गता भवति यच्चास्यां ज्योतींषि गच्छन्ति। विष्टवादित्यो भवत्याविष्टो रसानाविष्टो भासं ज्योतिषामाविष्टो भासेति

वाथ द्यौराविष्टा ज्योतिर्भिः पुण्यकृद्भिश्च । नभ आदित्यो भवति नेता भासां ज्योतिषां प्रणयोऽपि वा भन एव स्याद्विपरीतो न न भातीति वैतेन द्यौर्व्याख्याता ॥ २ ॥

इति द्वितीयाध्यायस्य चतुर्थः पादः ॥२, ४॥

अधुना प्रकृतमेवोच्यते,—"स्वरादित्यो भवति"। "सु अरणः" सुगमन इत्यर्थः। अथवा सुष्ठु तमांसि ईरयतीत्यर्थः। अथवा विशेषणविशेष्यभावेन एते वाक्ये स्याताम्। किमुक्तं भवति—सु अरणः? इति। उच्यते, "सु ईरणः" इत्येव। "स्वृतो रसान्" सुष्ठु रसानादातुमृतो भौमान् आन्तरिक्षांश्च। "स्वृतो भासं ज्योतिषाम्" सुष्ठु ग्रहनक्षत्रादीनां ज्योतिषां भासमादातुमृतो गतः। "स्वृतो भासेति वा" सुष्ठु परिगतो भासेति वा, सर्वतो ह्येष परिगतो दीप्त्या भवति ॥

"एतेन द्यौर्व्याख्याता"। उक्तं हि 'तानि चेत् समानकर्माणि समाननिर्वचनानि'—इति। सापि हि सु अरणा शोभनगमना भवति, शोभनं वा अस्यामर्य्यत इत्येवमादि यथासम्भवं योज्यम् ॥

"पृश्निरादित्यो भवति"। आह,—कस्मात्? उच्यते,—"प्राश्नुत एनं वर्ण इति नैरुक्ताः"। 'प्राश्नुते' प्रकर्षेण व्याप्नोति 'एनम्' आदित्यं 'वर्णः' प्रोज्ज्वलः 'इति' 'नैरुक्ताः' मन्यन्ते। "संस्प्रष्टा रसान्" स हि नित्यकालमेव रसानां संस्प्रष्टा भवति। तस्य तदेव कर्म, वक्ष्यति,—"अथास्य कर्म रसादानम् (दै० का० ७, ३, ४)"—इति। "संस्प्रष्टा भासं ज्योतिषाम्"। आदित्य-

संस्पर्शादेव ग्रहनक्षत्रचन्द्रमसां भासो नश्यन्ति। "संस्पृष्टो भासेति वा" दीप्त्या ह्येष सर्वतः संस्पृष्टो भवति॥

आह,—"द्यौः" कस्मात् पृश्निः? उच्यते,—सापि हि "संस्पृष्टा ज्योतिर्भिः पुण्यकृद्भिश्च"॥

"नाक आदित्यो भवति"। आह,—कस्मात्? उच्यते,—"नेता भासां" सर्वासु दिक्षु। "ज्योतिषां" च "प्रणयः" अस्यैव हि भगवतो रश्मिजालप्रान्तोपलग्न ज्योतिश्चक्रं चक्रमीति॥

"अथ द्यौः" कस्मान्नाकः? इति। उच्यते,—"कमिति सुखनाम (३२४ पृ०)"। आह, ततः किम्? इति। शृणु,—"तत्प्रतिषिद्धं सत् पुनरपि "प्रतिषिध्येत"। किम्? इति। उच्यते,—तत्प्रतिषिध्यमानम् 'अकम्' भवति, असुखमित्यर्थः, पुनरपि च प्रतिषिध्यमानं 'नाकम्' भवति। ततो हि प्रतिषेधः प्रकृतमापादयति, नाकमित्युक्ते सुखमिति प्रतीयते। ब्राह्मणमपि चैतस्मिन्नर्थे भवति;—"न वा अमुं लोकं जग्मुषे किञ्च नाकम्" —इति। आह,—किमुक्तं भवति? "अमुम्" एव "लोकं" द्युलोकं "जग्मुषे" गतवते "न" "किञ्च" किञ्चित्" नाकं "नासुखम्" इत्यर्थः। किङ्कारणम्? य एव हि "पुण्यकृतः" भवन्ति, ते "एव हि" "तत्र गच्छन्ति" न च पुण्यकृतां दुःखं भवितुं न्याय्यम्॥

"गौरादित्यो भवति"। आह,—कस्मात्? उच्यते,—"गमयति" ह्यसौ "रसान्" आत्मानं प्रति, उपक्षयं वा गमयति। किञ्च "गच्छत्यन्तरिक्षे" स एवात्मना॥

"अथ द्यौः, कस्माद् गौः? इति। उच्यते,—"यत्" यस्मादियं गौः "पृथिव्याः" "अधि" उपरि "दूरम्" अध्वानं "गता भवति"। किञ्च, "यत्" यस्मात् "च" "अस्यां" "ज्योतींषि" ग्रहनक्षत्रतारकादीनि "गच्छन्ति" तस्माद् गौः॥

"विष्टबादित्यो भवति"। आह,—कस्मात्? उच्यते,—आभिमुख्येन हि एषः "रसान्" भौमानान्तरिक्षांश्च "आविष्टः" प्रविष्टो रश्मिभिरादातुम्। किञ्च, आभिमुख्येन "आविष्टो भासं" "ज्योतिषां" ग्रहादीनाम्। अथवा अयमेवाभिमुख्येन "आविष्टो भासेति वा" सर्वतो ह्येष सन्दीप्तो भवति॥

"अथ द्यौः" कस्माद् विष्टप्? इति। उच्यते,—इयमपि हि "आविष्टा" "ज्योतिर्भिः" ग्रहनक्षत्रादिभिः ये चान्ये पुण्यकृतस्तैश्च तस्माद् विष्टपिति॥

"नभ आदित्यो भवति"। आह,—कस्मात्? उच्यते,—"नेता" ह्येष "भासां" सर्वासु दिक्षु, "ज्योतिषां" च "प्रणयः" व्याख्यातमेतत्। "अपि वा भन एव स्याद्विपरीतः" भासनः सन् नभ इत्युक्तो विपर्य्ययेण। "न भातीति वा" न न भाति भात्येवेति नभः॥

"एतेन द्यौर्व्याख्याता" सापि ह्यादित्यवन्नेत्री भासामित्यादि-योज्यम्॥ २॥

इति निरुक्तवृत्तौ सप्तमाध्यायस्य [द्वितीयाध्यायस्य]
चतुर्थः पादः॥ २, ४॥

पञ्चमः पादः ॥

रश्मिनामान्युत्तराणि पञ्चदश रश्मिर्यमनात्तेषामादितः साधारणानि पञ्चाश्वरश्मिभिर्दिङ्नामान्युत्तराण्यष्टौ दिशः कस्माद्दिशतेरासदनादपि वाभ्यशनात् तत्र काष्ठा इत्येतद-नेकस्यापि सत्त्वस्य भवति काष्ठा दिशो भवन्ति क्रान्त्वा स्थिता भवन्ति काष्ठा उपदिशो भवन्तीतरेतरं क्रान्त्वा स्थिता भवन्त्यादित्योऽपि काष्ठोच्यन्ते क्रान्त्वा स्थितो भवत्याज्य-न्तोऽपि काष्ठोच्यन्ते क्रान्त्वा स्थितो भवत्यापोऽपि काष्ठा उच्यन्ते क्रान्त्वा स्थिता भवन्तीति स्थावराणाम् ॥ १ ॥

आदित्यसम्बन्धेनैव "रश्मिनामान्युत्तराणि पञ्चदश"। "रश्मिर्यमनात्" उदकस्य अश्वानां वा। "तेषां" "पञ्च" यानि "आदित." तानि "साधारणानि" "अश्वरश्मिभि."। कतमानि पुनस्तानि? "खेदयः, किरणाः"—इत्येवमादीनि। खे दयन्ते खे गच्छन्ति इति खेदयः, किरणा विक्षिप्ता भवन्ति।

"दिङ्नामान्युत्तराण्यष्टौ"। आदित्योपलक्षणा एते हि दिश इत्यादित्यनामभ्यः उत्तराणि दिङ्नामानि। कियन्ति पुनस्तानि? अष्टौ। कानि पुनस्तानि? "आताः, आशाः, उपराः"—इत्येव-मादीनि। आताः, आगता ह्येतास्त तमर्थं प्रति भवन्ति। आशाः,

अभ्यश्नुवते ह्येताः सर्वमेव यदस्ति किञ्चित्। उपराः, सर्वमेव ह्येता उपरम्य रता भवन्तीत्युपराः ॥

आह,—"दिशः कस्मात्"? "दिशतेः" अतिसर्जनार्थस्य (तु० उ०), अतिसृज्यन्ते ह्यासु हविरादीनि देवतानाम्। अथवा "आसदनात्" तं तमर्थं प्रत्येता आसन्ना भवन्ति। "अपि वाभ्यशनात्" अभ्यश्नुवते ह्येतास्तं तमर्थम् ॥

"तत्र काष्ठा इत्येतदनेकस्यापि सत्त्वस्य भवति"। तद्यथा,—"काष्ठा दिशो भवन्ति"। आह,—किङ्कारणम्? इति। उच्यते, "क्रान्त्वा स्थिता भवन्ति"। क्रान्त्वा ह्येतास्तं तमर्थं प्रति गत्वा स्थिता भवन्ति, न हि तदस्ति, यत्रेमा न सन्ति। "काष्ठा उपदिशो भवन्ति"। "इतरेतरं क्रान्त्वा स्थिता भवन्ति" ता अपि ह्येतरेतरं क्रान्त्वा दिग्भिः सार्कं स्थिता भवन्ति। "आदित्योऽपि काष्ठोच्यते"। "क्रान्त्वा स्थितो भवति" असावपि स्वस्थानं क्रान्त्वा गत्वा स्थितो भवति। "आज्यन्तोऽपि काष्ठोच्यते, क्रान्त्वा स्थितो भवति"। आज्यन्तोऽपि शरपथान्तः काष्ठोच्यते, असावपि स्वप्रदेशं क्रान्त्वा गत्वा स्थितो भवति। "आपोऽपि काष्ठा उच्यन्ते"। ता पुनर्द्वय्यः, स्थावराश्चास्थावराश्च। तत्र, "क्रान्त्वा" गत्वा जलाशयमेताः "स्थिता भवन्तीति स्थावराणाम्" काष्ठात्वम्। अस्थावराणां पुन क्रामन्ते चैता, न कचित् तिष्ठन्तीति काष्ठा मेध्या आप ॥ १ ॥

मन्त्रोऽपि चैतस्मिन्नेवार्थे भवति,—

अतिष्ठन्तीनामनिवेशनानां काष्ठानां मध्ये निहितं शरीरम्। वृत्रस्य निण्यं विचरन्त्यापो दीर्घं तम आशय-दिन्द्रशत्रुः। अतिष्ठन्तीनामनिविशमानानामित्यस्थावराणां काष्ठानां मध्ये निहितं शरीरं मेघः शरीरं शृणातेः शम्नातेर्वा वृत्रस्य निण्यं निर्णामं विचरन्ति विजानन्त्याप इति दीर्घं द्राघतेस्तमस्तनोतेराशयदा शेतेरिन्द्रशत्रुरिन्द्रोऽस्य शमयिता वा शातयिता वा तस्मादिन्द्रशत्रुस्तत्को वृत्रो मेघ इति नैरुक्तास्त्वाष्ट्रोऽसुर इत्यैतिहासिका अपाञ्च ज्योतिषश्च मिश्रीभावकर्मणो वर्षकर्म जायते तत्रोपमार्थेन युद्धवर्णा भवन्त्यहिवत् तु खलु मन्त्रवर्णा ब्राह्मणवादाश्च विवृद्ध्या स्रोतांसि निवारयाञ्चकार तस्मिन् हते प्रसस्यन्दिर आपस्तदभिवादिन्येषर्ग् भवति ॥ २ ॥

अतिष्ठन्तीनामिति। हिरण्यस्तूपस्येयमार्षम्, दासपत्नीरिति च। त्रिष्टुभावेते। अग्निष्टोमे निष्केवल्यं नाम शस्त्रम्, तत्र निविद्धानीयमेतत् सूक्तम्, तत्र द्वे अपि शस्येते। न तिष्ठन्तीत्यतिष्ठन्त्य', तासाम् "अतिष्ठन्तीनाम्" मेघोदरान्तर्गतानामपाम्, ता हि मेघे गच्छन्त्येव तदाधारत्वात्। 'अनिवेशनानाम्' "अनिविशमानानाम्" न हि ताः क्वचिन्निविशन्ते, यावज्जलाशयं नाप्नुवन्ति। तासामेवंविधानां "काष्ठानां मध्ये" अवस्थि-

तानां याहातो मेघाख्यं "निहितम्" अवस्थापितं धात्रा "शरीरम्" आवृत्य अपः, तासामेव गुप्तये। ताः पुनः 'आपः' तस्य "वृत्रस्य" मेघस्य "निण्यं निर्णामं" येनासौ नीचैर्नमति तं प्रदेशं "विजानन्ति" इव। यतस्तेन प्रदेशेन "विचरन्ति" प्रचरन्ति निम्नानुसारिण्यो हि ताः। असावपि वृत्रस्तासु प्रचरन्तीषु तत्प्रचरणनिरोधं चिकीर्षुः स्वशरीरविवृद्ध्या दीर्घं तमः' स हि तमः स्वत एव, धूमादिप्रभवत्वात्। यावन्तं प्रदेशं निम्नमनुसरन्त्यो मेघस्य ताः स्तुता भवन्ति, निपिपत्स्यन्त्यस्ततो यद्युतरमसौ वर्द्धते। तदवरुन्दत्सया एवं दीर्घं तम आवृत्य 'आशयत्' आशेत इत्यर्थः। कः पुनरेवमाशयत्? 'इन्द्रशत्रुः' इति समस्तार्थः॥

अथैकपदनिरुक्तम्।—"शरीरं शृणातेः (२८३ पृ०)" हिंसार्थस्य, हिंस्यते हि तत्। "शम्नातेर्वा (२८३ पृ०)" हिंसार्थस्य "दीर्घं द्राघतेः (भू० अ०)" वृद्ध्यर्थस्य, वृद्धं तद् भवति। "तमः तनोतेः (तना० उ०)" तेन हि सर्वमेव ततं भवति। "आ शयत्" "आङ्" पूर्वस्य "शेतेः"। 'इन्द्रशत्रुः, इन्द्रोऽस्य शमयिता वा" इन्तेत्यर्थः "शातयिता वा" हन्ता वा, धात्वन्यत्वमर्थैकत्वम्॥

इह मन्त्रे वृत्र इत्येतच्छ्रुतं तदेतत् नैगमानुप्रसक्तं विचार्यते इत्युपयुक्तस्तच्छन्दः। आह,—"को वृत्रः?" उच्यते,—"मेघ इति नैरुक्ताः, त्वाष्ट्रोऽसुर इत्यैतिहासिकाः"। निरुक्तमर्थायते नैरुक्ताः। आह,—यदि मेघो वृत्रो य एव मन्त्रेषु यत्र सङ्ग्रामे भवते तत्र कः समाधिः? इति। उच्यते,—"अपाञ्च ज्योतिषश्च

मिश्रीभावकर्मणो वर्षकर्म जायते, तत्रोपमार्थेन युद्धवर्णा भवन्ति"।
'अपाम्' मेघोदरान्तर्गताना 'ज्योतिषश्च' वैद्युतस्य उद्भूतवृत्ते
'मिश्रीभावकर्मणो वर्षकर्म जायते' तेन हि वैद्युतेन ज्योतिषा
वाय्वा वेष्टितेन इन्द्राख्येनोपताड्यमाना आप प्रस्यन्दते—वर्ष
भावाय कल्प्यन्ते। 'तत्र' एव सत्युद्धततेजसोर्गितरेतरप्रति
द्वन्द्वभूतयो 'उपमार्थेन' रूपककल्पनया 'युद्धवर्णा भवन्ति'—इति
युद्धे रूपकाणीत्यर्थ। न ह्यत्र यथाभूत युद्धमस्ति, न हीन्द्रस्य
शत्रव केचन सन्ति। मन्त्रोऽपि चैतस्मिन्नर्थे अस्ति नेन्द्रस्य
शत्रव,—"यदचरस्तन्वा वावृधानो वलानीन्द्र प्रब्रुवाणो जनेषु।
मायेत्सा ते यानि युद्धान्याहुर्नाद्य शत्रुं न नु पुरा विवित्से॥"
(ऋ० सं० ८, १, १५, २)। वामदेवपुत्रस्य बृहदुक्थस्यार्षम्।
त्रिष्टुप्। व्यूढस्याष्टमेऽहनि निष्केवल्ये शस्यते। 'यत्' 'अचर'
त्व नानाप्रकार 'तन्वा वावृधान' शरीरेण विग्रहवान् भूत्वा
वावृधान पुन पुन वर्धमान। कथ पुनरचर? "वलानीन्द्र
प्रब्रुवाणो जनेषु"। 'वलानि' आत्मीयानि वीर्याणि, हे 'इन्द्र'!
'प्रब्रुवाण' इव। क्व? 'जनेषु'। किं त्व तथैव? न। "मायेत्सा
ते यानि युद्धान्याहु"। 'यानि युद्धान्याहु' ऐतिहासिका,
नानारूपाण्युपप्रदर्शयन्त, 'सा' अपि च 'ते' तव 'माया इत्'
मायैव। किं कारणम्? 'नाद्य' शत्रु तवास्ति प्रत्यनीकभूत,
'न नु पुरा' नापि पुरा कश्चिदासीत्, यावद् वार्य किञ्चित् कवि
दस्ति सर्वं तत् त्वमेव। "वीर्यं वै प्रावीर्यमिन्द्र इति ह
विज्ञायते"। क ते शत्रु? येन साकं युयोधिथ। यतत् त्वमपि

'विवित्से' वेत्स्येव, न केवलमहमेवेत्यभिप्राय। एवमेतन्मन्त्रे मायात्वमेव युद्धमिति श्रूयते। विज्ञायते च "तदाहुर्नैतदस्ति यद्देवासुरमिति"। तस्मात् साधूक्तम्,—अपाञ्च ज्योतिषश्च मिश्रीभावकर्मणो जायते, तत्रोपमार्थेन युद्धवर्णा भवन्ति" ॥

आह,—किं वृत्रवदेव रूपाणि भवन्ति? नेत्युच्यते,—"अहिवत्तु खलु मन्त्रवर्णा ब्राह्मणवादाश्च"। च समुच्चयार्थो द्रष्टव्य। वृत्रवच्चाहिवच्चेति मन्त्रवर्णा भवन्ति, ब्राह्मणवादाश्च शास्त्रान्ते भवन्ति, तदप्युपेक्षितव्यम्। "तस्मिन् हते वृत्राख्ये मेघे हते "प्रसस्यन्दिर आप" ॥

"तदभिवादिनी एषा"—॥ २ ॥

दासपत्नीरहिगोपा अतिष्ठन्निरुद्धा आपः पणिनेव गावः। अपाम्बिलमपिहितं यदासीद्वृत्रं जघन्वाँ अपतद्ववार ॥ दासपत्नीर्दासाधिपत्न्यो दासो दस्यतेरुपदासयति कर्माण्यहिगोपा अतिष्ठन्नहिना गुप्ता अहिरयनादेत्यन्तरिक्षेऽयमपीतरोऽहिरेतस्मादेव निर्ह्रसितोपसर्ग आहन्तीति। निरुद्धा आपः पणिनेव गावः। पणिर्वणिग् भवति पणिः पणनाद्वणिक् पण्यं नेनेक्ति। अपां बिलमपिहितं यदासीत्। बिलं भरं भवति बिभर्तेर्वृत्रं जघ्निवानपववार तद् वृत्रो वृणोतेर्वा वर्ततेर्वा वर्द्धतेर्वा यदवृणोत्तद् वृत्रस्य वृत्रत्वमिति

विज्ञायते यदवर्त्तत तद् वृत्रस्य वृत्रत्वमिति विज्ञायते यद-वर्द्धत तद् वृत्रस्य वृत्रत्वमिति विज्ञायते ॥ ३ ॥

इति द्वितीयाध्यायस्य पञ्चमः पादः ॥ २, ५ ॥

दासपत्नीति। 'अपां' 'यत्' 'बिलं' निर्गमद्वारम् 'अपिहितम्' 'आसीत्' तेन मेघेन, 'तत्' यदा इन्द्रः हं 'वृत्रं' मेघं 'जघन्वान्' निजघ्निवान् अहत, हत्वा च 'अपववार' अपावृतवान्। अथ तदा तस्मिन् निहते अपावृते च द्वारे ताः आपः प्रस्यन्दिरे वर्ष-भावेनेति समस्तार्थः ॥

अथैकपदनिरुक्तम्।—"दासपत्नीः दासाधिपत्न्यः" दासः कर्मकरः, तं हि ता अधिष्ठाय पान्ति रक्षन्ति। स हि कर्मणा श्रान्तः, तासु पीतासु विश्रान्त आप्यायितो भवति। विग्रह-प्रसक्तं निरुच्यते,—"दासो दस्यतेः (दि० प०)" स हि "उप-दासयति" उपक्षयति कृष्यादीनि "कर्माणि"। "अहिगोपाः" "अहिना गुप्ताः"। "अहिः" कस्मात्? उच्यते,—"अयनात्", "एति" हि असौ "अन्तरिक्षे"। शब्दसामान्यान्निरुच्यते,—"अयमपीतरोऽहिः" सर्पः "एतस्मादेव" असावपि हि एति। अथवा "निर्ह्रसितोपसर्गः" स्यात्। कथम्? "आहन्ति" असौ भोगेनेत्यादिः। आङ्पूर्वस्य हन्तेः (अदा० प०), स पुनरयमुप-सर्गं निर्ह्रस्य ह्रस्वं कृत्वा अहिरुच्यते। "पणिर्वणिग् भवति"— इति पर्य्यायेण तरववचनम्। "पणिः पणनात्" पणिति ह्यसौ व्यवहारं करोति। पर्य्यायप्रसक्तं निरुच्यते,—"वणिक् पण्य"

वणिजो यत् द्रव्यं तत् पण्यम्, तदसौ "नेनेक्ति" नित्यकालं शुचीकरोति मूल्यार्हं स्यादिति। "विलं भरं भवति" "बिभर्त्तेः (जु० प०)" धातोः, भृतं हि तदुदकादिभिः। "वृत्रो वृणोतेर्वा (स्वा० उ०) वर्त्ततेर्वा (भू० आ०) वर्द्धतेर्वा (भू० आ०)"—इत्येषां धातूनामन्यतमस्य। ब्राह्मणमपि चैतस्मिन्नर्थे भवति,—"यदवृणोत्" अन्तरिक्षमुदकं वा, महत्त्वात् "तद् वृत्रस्य वृत्रत्वम्"—"इति" एवं ब्राह्मणोऽपि "विज्ञायते" विचार्य्यमाणो ज्ञायते। अथवा "यदवर्त्तत" इन्द्रेण हतो वृत्रो मेघः अपां विले अपावृते अपः वृष्टिभावेन अवर्त्तयत् प्रावर्त्तयत्, "तद् वृत्रस्य वृत्रत्वम्"। अथवा "यत् अवर्द्धत" असावतिमात्रप्रमाणम्, "तद् वृत्रस्य वृत्रत्वं" स्यादिति ॥ ३ ॥

इति निरुक्तवृत्तौ सप्तमाध्यायस्य [द्वितीयाध्यायस्य] पञ्चमः पादः ॥ २, ५ ॥

षष्ठः पादः ॥

रात्रिनामान्युत्तराणि त्रयोविंशती रात्रिः कस्मात् प्ररमयति भूतानि नक्तञ्चारीण्युपरमयतीतराणि ध्रुवीकरोति रातेर्वा स्याद्दानकर्मणः प्रदीयन्तेऽस्यामवश्यायाः उषोनामान्युत्तराणि षोडशोषाः कस्मादुच्छतीति सत्या रात्रेरपरः कालस्तस्या एषा भवति ॥ १ ॥

"काष्ठा इत्येतदनेकस्यापि सत्त्वस्य भवति"—इत्यत आरभ्य दिङ्नामप्रसक्तानुप्रसक्तमुक्तम्, प्रकृतमिदानीमुच्यते,—"रात्रिनामान्युत्तराणि त्रयोविंशतिः"। रात्रेर्नामानि 'रात्रिनामानि'। 'उत्तराणि' इति प्रकृतेभ्यो दिङ्नामभ्यः तमःस्वतन्त्रा हि रात्रिः, तस्य च तमसो दिक्ष्वेवालमलाभो भवति, अतो दिङ्नामभ्य उत्तराणि रात्रिनामानि। कियन्ति पुनस्तानि? 'त्रयोविंशतिः' त्रीणि च विंशतिश्च त्रयोविंशतिः (२३)। कतमानि पुनस्तानि? "श्यावी, क्षपा, शर्वरी"—इत्येवमादीनि। श्याववर्णा हि रात्रिरिति श्यावी। स्वैः स्वैः कर्मभिः अहनि क्षीणान् प्राणिनः इयं स्वापेन पातीति क्षपा, अस्यां हि सुप्ताः पुनर्नवा इव प्राणिनः प्रातरुत्तिष्ठन्ति। शरणमस्यां स्वापार्थं व्रियत इति शर्वरी। इत्येवमादि सर्वत्र योज्यम्॥

आह,—"रात्रिः कस्मात्?" इति। उच्यते,—इयं ह्यागच्छन्ती प्रकर्षेण रमयति। कानि? "भूतानि नक्तञ्चारीणि" पिशाचादीनि, तानि हि विगतेऽहनि रात्र्यामुपस्थितायां प्राप्तोऽयं विहारसमयः इति प्रकर्षेण रमन्ते। "उपरमयतीतराणि ध्रुवीकरोति" इतराण्यपि दिवाचारीणि सैवोपरमयति, तस्यां ह्युपस्थितायां दिवाचराणि भूतानि मनुष्यादीनि इतिकर्त्तव्यताभ्यः उपरमन्ति, उपरम्य च स्थिरीभवन्ति निवासाय। "रातेर्वा स्यात् दानकर्मणः" दानार्थस्य। आह,—किमस्यां प्रदीयते? उच्यते,—"प्रदीयन्तेऽस्यामवश्यायाः" अवश्यमायन्तीत्यवश्यायाः, तुषारा इत्यर्थः, ते हि रात्रौ निपतन्ति॥

"उषोनामान्युत्तराणि षोडश" उषसो नामानि। रात्रेरेव ह्यपरः कालः उष आख्यो भवतीति रात्रिनामभ्य 'उत्तराणि उषोनामानि'। कियन्ति पुनस्तानि? 'षोडश' (१६) षट् च दश च षोडश। कतमानि पुनस्तानि? "विभावरी, सूनरी"—इत्येवमादीनि। विविधां भियं भासं वृणोतीति विभावरी। शोभनं नराणामस्यामुत्थानं भवतीति सूनरी। इत्येवमादि निर्वचनं योज्यम्॥

आह,—"उषाः कस्मात्?" इति। उच्यते,—"उच्छतीति सत्या."। 'उछी विवासे (भ्वा० प०)' विवासयति हीयं तमांसि तस्मादुच्छतीत्येवमस्या एतस्मिन् कर्मणि सत्याः कर्त्तरि कारके भास उषा इत्येतदभिधानं भवति। आह,—का पुनरियमुषाः? इति। उच्यते,—"रात्रेरपरः काल." स उषा इत्युच्यते। आह,—कथमेतदुच्यते रात्रेरपरः कालः उषाः? इति। उच्यते, "तस्याः" उषसः रात्र्यपरकालत्वम्। "एषा" निर्वाचिका ऋग् "भवति"—॥ १॥

इदं श्रेष्ठं ज्योतिषां ज्योतिरागाच्चित्रः प्रकेतो अजनिष्ट विभ्वा। यथा प्रसूता सवितुः सवाय एवा रात्र्युषसे योनिमारैक्॥ इदं श्रेष्ठं ज्योतिषां ज्योतिरागमच्चित्रं प्रकेतनं प्रज्ञाततममजनिष्ट विभूततमं यथा प्रसूता सवितुः प्रसवाय रात्रिरादित्यस्यैवं रात्र्युषसे योनिमरिचत् स्थानं स्त्रीयोनिरभियुत एनां गर्भमस्या एषापरा भवति॥ २॥

इदं श्रेष्ठमिति। आङ्गिरसस्य कुत्सस्येयमार्षम्, उत्तरा च। उभे अपि त्रिष्टुभावेते, प्रातरनुवाकाश्विनयोः शस्येते। "इदम्" उपोलक्षणं "ज्योतिः" "श्रेष्ठम्" आदित्यादीनां "ज्योतिषाम्" इति निर्द्धारणे षष्ठी। आदित्यो हि तापकः प्रकाशकः, चन्द्रमा अथ निशीतः प्रकाशकश्च, इदं पुनर्नात्युष्णं नातिशीतं प्रकाशकञ्च। इत्येवमादित्यादीनामिदमेव श्रेष्ठम्। 'आगात्' "आगमत्" आगच्छतीत्यर्थः। "चित्र" चायनीयं पूजनीयं वा श्रेष्ठत्वादेव, 'प्रकेतः' "प्रकेतनं प्रज्ञाततमम्" "अजनिष्ट" जातमित्यर्थः। जातं सदागच्छति सर्वासु दिक्षु। 'विभ्वा' "विभूततमम्" इदमतिमहत्त्वाद् विभूततमं विस्तीर्णतमम्, इतराणि परिच्छिन्नतराणि ज्योतींपि अपेक्ष्य। किञ्च, "यथा प्रसूता" प्रकर्षेण सूता प्रसवमनुप्राप्ता। सूतिशब्दः प्रसवार्थः। "रात्रिः" "सवितुः" "आदित्यस्य" 'सवाय' "प्रसवाय" आदित्योत्सृष्टे देशे जायते। "एवम्" 'एव' "रात्री" रात्रिः उपसो जन्मार्थं "योनिं" "स्थानम्" अवकाशम् "उपसे" आत्मलाभाय 'आरैक्' "अरिचत्" आरेचयति, ददातीत्यर्थः। यथोषा आदित्यस्य जन्मनो हेतुस्तदनन्तरजन्मत्वात्, एवं रात्रिरुषसो जन्मनो हेतुः, इत्येवमस्यामृचि रात्रेरेव घापरः कालः उपःसञ्ज्ञित इति गम्यते। स्थानं योनिशब्देनोच्यते। यद्धि यस्मिन् विधीयते, तत् तेन साकं युतं भवति मिश्रीभूतमित्यर्थः। इयमपीतरा—"स्त्रीयोनिः" एतस्मादेव। किङ्कारणम्? "अभियुतः" हि "गर्भः" "एनाम्" भवति, आमिश्रीभूत इत्यर्थः। पूर्वत्र,—"अयमपीतरो योनिः, एतस्मादेव।

(किम् ?) परियुतो भवति" इति परियवनक्रियासामान्येन निरुक्तो योनिशब्दः, इह पुनः 'अभियुत एनां गर्भः' इति मिश्रीभावसामान्येन उभयलिङ्गत्वं चास्योपदर्शितम्,—इह स्त्रीलिङ्गम्, तत्र पुंलिङ्गम् इति। "तस्याः" उषसः "एषा" "अपरा" अग्र् "भवति"—(अस्यैवार्थस्य दृढतायै रात्रेरपरः काल उषा उच्यत इति) ॥ २ ॥

रुशद्वत्सा रुशती श्वेत्यागादारैगु कृष्णा सदनान्यस्याः। समानबन्धू अमृते अनूची द्यावा वर्णं चरत आमिनाने ॥ रुशद्वत्सा सूर्य्यवत्सा रुशदिति वर्णनाम रोचतेर्ज्वलतिकर्मणः सूर्य्यमस्या वत्समाह साहचर्य्याद्रसहरणाद्वा। रुशती श्वेत्यागात्। श्वेत्या श्वेततेररिचत् कृष्णा सदनान्यस्याः कृष्णवर्णा रात्रिः कृष्णं कृष्यतेर्निकृष्टो वर्णोऽथैनं संस्तौति समानबन्धू समानबन्धने अमृते अमरणधर्माणावनूची इतीतरेतरमभिप्रेत्य द्यावा वर्णं चरतस्ते एव द्यावौ द्योतनादपि वा द्यावा चरतस्तया चरत इति स्यादामिनाने अन्योन्यस्याध्यात्मं कुर्वाणे अहर्नामान्युत्तराणि द्वादशाहः कस्मादुपाहरन्त्यस्मिन् कर्माणि तस्यैष निपातो भवति वैश्वानरीयायामृचि ॥ ३ ॥

रुशद्वत्सेति। "रुशद्वत्सा" रोचिष्णुवत्सा, सूर्यो हि रोचिष्णु, तं "सूर्यम् अस्या वत्समाह" मन्त्रदृक्। "साह चर्य्यात्"। मातृसहचरो हि वत्सो भवति, अयमपि चानयोषसा सह चरतीत्येतस्मात् सामान्याद् वत्स उच्यते। "रसहरणाद्वा"। यथा हि मातुरूधस क्षीराख्यस्य रसस्याहर्त्ता भवति वत्स, एव मेषोऽप्यौपसिकानामवश्यायाख्याना रसानामाहर्त्ता भवति रश्मिभि,—इत्येतस्मात् सामान्याद् वत्सत्वम्। "रुशती" रोचनशीला आत्मनापि। "श्वेत्या" "श्वितते" धातो (भू॰ आ॰)। श्वेतो वर्ण एत्यस्याम्, श्वेतवर्णत्यर्थ। या चैव लक्षणा उषा, सा "आगात्" आगच्छति। आगतायाश्च तस्या 'आरैक्' 'अरिचन' आरेचयति। "कृष्णा" 'कृष्णवर्णा रात्रि"। किमारेचयति? "सदनानि" स्थानानि। "अस्या" उषस। येष्वियमुषा स्थानेषु आगता सती आसीदति, तान्यारेचयति रात्रि। एव तावदयमर्द्धर्चो रात्र्युषसोर्विभक्तस्तुति, "अथ" अनेनोत्तरार्द्धर्चेन "एने" रात्र्युषसी "सस्तौति"।—"समान बन्धू" एने रात्र्युषसी, "समानबन्धने" समानमनयोर्बन्धनम्। आदित्यस्यैव हास्तमयं प्रति रात्रिर्बद्धा सश्लिष्टा, उदय प्रत्युषा, एव समानबन्धू। "अमृते, अमरणधर्माणौ" न हि रात्र्युषसौ म्रियेते। "अनूची इतीतरेतरमभिप्रेत्य" इतरेतर सश्लिष्टे इत्ते। "द्यावा वर्ण चरत"। "ते एव" रात्र्युषसौ। "द्यावौ द्योत नात्" उषा हि स्वेन प्रकाशेन द्योतते, रात्रिरपि स्वेन तमोवीर्य्येण नक्षत्रगणेन वा स्वमधिकारं प्रति द्योतते। एव हि द्यावेति

द्विवचनम् "अपि वा" तृतीयान्तमेकवचनमेतत् स्यात्,—द्यौ, तया "वाचा" 'सहयुक्ते (पा० २, ३, १९)'। "तया" सह स्पर्द्धमाने "चरत." गच्छतः। कथमुनश्चरतः? "आमिनाने"। आङ् अध्यर्थे 'तोदस्येव शरण आ महस्य। तुदस्येव शरणेऽधि महत."—इति (नैग० का० ५, २, ५)। उषा अपि रात्रेरधि आत्मानं निर्मिमीते, रा.त्रिरप्युषस·, इतरेतरसंश्लिष्टे होमे रात्र्युषसी। तस्मादेवमुच्यते,—"अन्योऽन्यस्याध्यात्मं कुर्वाणे" इति॥

उप शब्दतत्त्वावधारणार्थं प्रसक्तावेतौ मन्त्रौ उपवर्णितौ, प्रकृतमिदानीमुच्यते,—"अहर्नामान्युत्तराणि द्वादश"। अहो नामानि, 'अहर्नामानि', 'उत्तराणि' प्रकृतेभ्य उषोनामभ्य', उषस एवानन्तरमहर्भवति, तस्मादुषोनामभ्य उत्तराणि अहर्नामानि। कियन्ति पुनस्तानि? 'द्वादश'। द्वे च दश च द्वादश (१२)। कानि पुनस्तानि? "वस्तोः, द्युः, भानुः"—इत्येवमादीनि। वस्ते ज्योतिरितदिति वस्तोरित्युच्यते। यथैव हि श्रुतं मन्त्रे तथैवेह समाम्नातम्। द्युः, द्योतते ह्येतत् ज्योतिषा। भानुः, भासते ह्येतत् ज्योतिषेत्येवमादि योज्यम्॥

आह,—"अहः कस्मात्"? उच्यते,—"उपाहरन्त्यस्मिन् कर्माणि" न हि तथा रात्रावनुतिष्ठन्ति कर्माणि कर्मकराः, यथाह.नि॥

"तस्य" अह्नः "एष निपातो भवति"। नैघण्टुकवृत्त्या। "वैश्वानरीयायाम्" वैश्वानरदेवतायाम् "ऋचि"—॥ ३॥

अहश्च कृष्णमहरर्जुनञ्च विवर्त्तेते रजसी वेद्याभिः।
वैश्वानरो जायमानो न राजावातिरज्ज्योतिषाग्निस्तमांसि॥
अहश्च कृष्णं रात्रिः शुक्लञ्चाहरर्जुनं विवर्त्तेते रजसी वेद्या भिर्वेदितव्याभिः प्रवृत्तिभिर्वैश्वानरो जायमान इवोद्यन्ना दित्यः सर्वेषां ज्योतिषां राजावाहन्नग्निर्ज्योतिषा तमांसि मेघनामान्युत्तराणि त्रिंशन्मेघः कस्मान्मेहतीति सत आ उपर उपल इत्येताभ्या साधारणानि पर्वतनामभिरुपर उपलो मेघो भवत्युपरमन्तेऽस्मिन्नभ्राण्युपरता आप इति वा तेषामेषा भवति ॥ ४ ॥

अह शब्दो हि रात्रिमहश्चोभयमभिधत्ते, अत सन्देहपदम्, तस्यैव विभागोऽस्यामृचि उपपदविशेषात् प्रदर्श्यन्ते,—अहश्च कृष्णमिति। भरद्वाजस्येयमार्षम्। त्रिष्टुप्। पृष्ठस्य षष्ठेऽह न्याग्निमारुते शस्त्रे शस्यते। "अहश्च कृष्ण रात्रि शुक्ल चाहर-र्जुनम्"। अर्जुनशब्दो हि शुक्लपर्याय। "विवर्त्तेते" विपर्य्ययेण वर्त्तेते। रात्रिरतीता, अह आयातम्, अहरतीत, रात्रिरायाता, इत्येवम्। "रजसी" रञ्जके। ज्योतिषा हि भूतान्यहो रञ्जयति, तमसा रात्रि। "वेद्याभि" 'वेदितव्याभि प्रवृत्तिभि" न हि तासा प्रवृत्तीनामन्तोऽस्ति, अहनि च रात्रौ च प्राणिनाम नन्तत्ता वेदितव्या एव भवन्ति, यदुच्यात्, न हि विदितानामन्ता

कदाचित्। किञ्च, "वैश्वानरः" अग्निः 'अवातिरत्' "अवाहन्" अपहन्ति, स्वेन "ज्योतिषा तमांसि"। कथम्पुनरपहन्ति? 'जायमानो न न राजा' "जायमान इव", "उद्यन्" "सर्वेषां" सर्वभूतानां "राजा" "आदित्यः"। यथा ह्ययमादित्यस्तमांसि अपहन्ति दिवा, एवम् "अग्निः" अपि रात्रावपहन्तीत्यग्निरादित्येन तम उपघातं प्रत्युपमीयते॥

"मेघनामान्युत्तराणि त्रिंशत्"। मेघानां नामानि तानि उत्तराणि, प्रकृतेभ्योऽहर्नामभ्यः, मेघा ह्यहनि रात्रौ चाशेषेण भवन्त्यतो रात्र्यहर्नामभ्य उत्तराणि मेघनामानि। कतमानि पुनस्तानि? "अद्रिः, ग्रावा, गोत्रः"—इत्येवमादीनि। अद्रिः, आदरयितव्यो भवति ह्यसावुदकार्थमित्यद्रिः। ग्रावा, गृणातेर्वा गृह्णातेर्वा, गृणात्यसौ शब्दं करोति, गृहीतञ्चोदकमनेनेति। गोत्रः, गोर्वा गत्र। इत्येवमाद्यभ्युहितव्यम्, पर्वतनामत्वेऽपि यथासम्भवं योज्यम्॥

आह,—"मेघः कस्मात्"? उच्यते,—"मेहतीति" सिञ्चत्यसौ। एवं कर्त्तरि कारके "सतः" अस्यैतदभिधानं भवति। तेषां मेघनाम्नाम् "आ उपर उपल इत्येताभ्यां" प्राक् उपर उपल इत्येताभ्यां यानि नामानि, तानि "साधारणानि पर्वतनामभिः" तद्वेषां प्रकरणोपपदाभ्यां विशेषोऽवधार्यः। 'आ उपर इत्येतस्मात्'—इति वक्तव्ये "आ उपर उपल इत्येताभ्यां" युक्तम्, उभावपि ह्येतौ समाननिर्वचनौ शब्दावेकस्मिन् निरुक्ते निरुक्तौ भविष्यत इति, एतोश्चाविशेषख्यापनार्थम्। "उपर उपलौ मेघ

भवति" उपर इति च उपल इति च मेघ उक्तो भवति। उपर-शब्दादारभ्य मेघनामान्येव, पर्वतनामानि ॥

आह,—उपरः कस्मात्? उच्यते,—"उप" गम्य "रमन्ते" "अस्मिन् अभ्राणि"। अथ "वा"। "उप" गम्य "रताः" "आपः" भवन्ति "इति"। उपलोऽप्येतस्मादेव रलोरविशेषेण ॥

आह,—कथं पुनर्गम्यते उपरशब्देन मेघ एवोच्यते, न पर्वतः? इति। उच्यते,—"तेषां" मेघानाम् उपरशब्दवाच्यत्वे विशेषलिङ्गवाचिका "एषा" ऋक् "भवति"—॥ ४ ॥

देवानां माने प्रथमा अतिष्ठन् कृन्तत्रादेषामुपरा उदायन्। त्रयस्तपन्ति पृथिवीमनूपा द्वा बृबूकं वहतः पुरीषम् ॥ देवानां निर्माणे प्रथमा अतिष्ठन्माध्यमिका देवगणाः प्रथम इति मुख्यनाम प्रतमो भवति विकर्त्तनेन मेघानामुदकं जायते त्रयस्तपन्ति पृथिवीमनूपाः। पर्जन्यो वायुरादित्यः शीतोष्णवर्षैरोषधीः पाचयन्त्यनूपा अनुवपन्ति लोकान् स्वेन स्वेन कर्मणायमपीतरोऽनूप एतस्मादेवानूप्यत उदकेनापि वान्वाविति स्याद्यथा प्रागिति। तस्यानूप इति स्याद्यथा प्राचीनमिति। द्वा बृबूकं वहतः पुरीषम्। वाय्वादित्या उदकं बृबूकमित्युदकनाम ब्रवीतेर्वा शब्द-कर्मणो भ्रंशतेर्वा पुरीषं पृणातेः पूरयतेर्वा ॥ ५ ॥

इति द्वितीयाध्यायस्य षष्ठः पादः ॥ २, ६ ॥

देवानां मान इति। वसुक्रस्येन्द्रपुत्रस्येयमार्षम्। त्रिष्टुप्। महाव्रते मरुत्वतीये शस्यते। 'देवानां' दानादिगुणयुक्तानां 'माने' विमाने निर्माणे। यदा देवाः सृष्टाः प्रजापतिना, तदैत एव माध्यमिका देवगणाः 'प्रथमाः अतिष्ठन्' एतेऽपि हि दानादियोगाद् देवा उच्यन्ते। प्रथमाः प्रकृष्टतमा मुख्या इत्यर्थः। मेघाभावे हि सर्वमेवेदं जगद् वर्षाभावान्न स्यात्। तस्मादेत एव प्रकृष्टतमाः अतिष्ठन् स्थितवन्तः। सृष्टौ हि सर्वदेवानामेत एवाग्रे सृष्टा इत्यभिप्रायः। किञ्च, 'कृन्तत्रात्' उत्कृन्तात् प्रदेशात् 'एषां' मेघानामिन्द्रेण 'उपराः' आपः 'उदायन्' आगतवत्यः, आगच्छन्ति च। किङ्कारणम्? विकर्त्तनेनैव हि मेघानामुदकं जायते। उपरशब्देनात्रोदकमुक्तम्, तात्स्थ्यात्तच्छब्दो मञ्चाः क्रोशन्त इतिवत्, उपरेषु मेघेषु या आपः, ता उपचारादुपरा इत्युच्यन्ते। किञ्च, यदा 'ताभिः' उपराभिरद्भिरोषधयः प्रोहिता भवन्त्यस्य तदा 'त्रयः तपन्ति' त्रयः पर्जन्यादयः तपन्ति। 'पृथिवीं' पृथ्वीलोकम्। 'अनूपाः' ते ह्यनुवपन्ति लोकान् स्वेन स्वेन कर्मणा यथाकालमनुगृह्णन्ति। एतदनुवपनं लोकानां यद् वर्षादिभिः पर्जन्यादयो यथार्थमोषधीः पाचयन्ति। किञ्च, 'द्वा बृबूकं वहतः पुरीषम्' द्वौ वाय्वादित्यौ वहतः आक्षिपत इतः पृथिवीलोकात् बृबूकमुदकम्। किंलक्षणम्? पुरीषम्, प्रीणयितृ वा सतः॥

"अयमपीतरोऽनूपः" नद्यनूपः समुद्रानूपो वा। "एतस्मादेव" वपतेर्धातोः असावपि हि "अनूप्यते" अनुप्रकीर्यते नित्य-

कालम् "उदकेन"। "अपि वा" एवमन्यथा स्यात्,—आप्नोतेः, अन्वाप्यतेऽसावुदकेनेति "अन्वाप्"। पुरस्तादञ्चतीति "प्राक्", "तस्य" अन्वावित्येतस्य सतः "अनूप इति" एष शब्दः "स्यात्" "यथा प्राचीनमिति", प्रागित्येवं सतः प्राचीनम्। "वृवूकमिति उदकनाम" इति। पर्य्यायवचनेन तत्त्वाभिधानम्। "ब्रवीतेर्वा" शब्दार्थस्य (अदा० उ०) शब्दकारि हि तद् भवति। "भ्रंशतेर्वा" भ्रश्यति (दि० प०) हि तन्मेघादिति ॥ ५ ॥

निरुक्तव्याख्यायां सप्तमाध्यायस्य [द्वितीयाध्यायस्य] षष्ठः पादः ॥ ६ ॥

—

सप्तमः पादः।

वाङ्नामान्युत्तराणि सप्तपञ्चाशद् वाक् कस्माद्वचेस्तत्र सरस्वतीत्येतस्य नदीवद्देवतावच्च निगमा भवन्ति तद्यद् देवतावदुपरिष्टात्तद् व्याख्यास्यामोऽथैतन्नदीवत् ॥ १ ॥

वाङ्नामान्युत्तराणि सप्तपञ्चाशत्। मेघनामप्रसक्तौ "देवानां माने"—इत्येष मन्त्रो व्याख्यातः। प्रकृतमिदानीमुच्यते,— वाङ्नामानीति। वाचो नामानि 'वाङ्नामानि', 'उत्तराणि' प्रकृतेभ्यो मेघनामभ्यः। मेघेभ्येव हि भूयसी वाग् भवति इति

ततो वाङ्नामानि भवन्ति। कियन्ति पुनस्तानि "सप्तपञ्चाशत्" सप्त च पञ्चाशच्च सप्तपञ्चाशत् (५७)। कतमानि पुनस्तानि? "श्लोकः, धारा, इला"—इत्येवमादीनि। श्रूयते इति श्लोकः। ध्रियते तं तमर्थमवधारयितुमिति धारा। तं तमर्थं प्रति ईट्टे गच्छतीति इडा। इत्येवमाद्यम्यूहितव्यम्॥

आह,—"वाक् कस्मात्"? उच्यते,—"वचेः" धातोः (अदा० प०)। उच्यतेऽनयेति वाक्। "तत्र, सरस्वतीत्येतस्य" तत्र तस्मिन्, सप्तपञ्चाशत्के वाङ्नामगणे सरस्वतीत्येतस्य नाम "नदीवद् देवतावच्च निगमा भवन्ति" नद्यर्थयुक्ताश्च देवतार्थयुक्ताश्चेत्यर्थः। "तत्" तत्रैवं सति, "यत्" अभिधानं "देवतावत्", "तत्" अधिकृत्य "उपरिष्टाद् व्याख्यास्यामः" षोडशेऽध्याये "पावका नः सरस्वती (ऋ० सं० १, १, ६, ३)"—इत्येतस्मिन् मन्त्रे। "अथ" पुनः यत् "एतत्" "नदीवत्", तद् व्याख्यायते—॥ १॥

इयं शुष्मेभिर्बिसखा इवारुजत्सानु गिरीणान्तविषेभिरूर्मिभिः। पारावतघ्नीमवसे सुवृक्तिभिः सरस्वतीमाविवासेम धीतिभिः॥ इयं शुष्मैः शोषणैः शुष्ममिति बलनाम शोषयतीति सतो बिसं बिस्यतेर्भेदनकर्मणो वृद्धिकर्मणो वा सानु समुच्छ्रितं भवति समुन्नुन्नमिति वा महद्भिरूर्मिभिः पारावतघ्नीं पारावारघातिनीं पारं परं भवत्यवारमवरम-

वनाय सुप्रवृत्ताभिः स्तुतिभिः सरस्वतीं कर्मभिः परिचरे-
मोदकनामान्युत्तराण्येकशतमुदकं कस्मादुनन्तीति सतो
नदीनामान्युत्तराणि सप्तत्रिंशन्नद्यः कस्मान्नदना भवन्ति
शब्दवत्यो बहुलमासान्नैघण्टुकं वृत्तमाश्चर्य्यमिव प्राधान्येन
तत्रेतिहासमाचक्षते विश्वामित्र ऋषिः सुदासः पैजवनस्य
पुरोहितो बभूव विश्वामित्रः सर्वमित्रः सर्वं संसृतं सुदाः
कल्याणदानः पैजवनः पिजवनस्य पुत्रः पिजवनः पुनः
स्पर्द्धनीयजवो वा मिश्रीभावगतिर्वा स वित्तं गृहीत्वा विपा-
ट्छुतुद्र्योः सम्भेदमाययावनुययुरितरे ऽस विश्वामित्रो
नदीस्तुष्टाव गाधा भवतेत्यपि द्विवदपि बहुवत् तद्यद् द्विव-
दुपरिष्टात्तद् व्याख्यास्यामोऽथैतद् बहुवत् ॥ २ ॥

इयं शुष्मेभिरिति। भरद्वाजस्यार्षम्, जगती। 'इयं' सरस्वती नदी 'शुष्मेभिः' बलैः। किङ्करोति? "बिसखा इवारुजत्" यथा बिसखानको बिसखननादरेणैव मृदुत्वात् खनति, एवमियमनादरेणैव यदपि 'सानु' भवति समुच्छ्रितं वज्रसङ्घातकल्प 'गिरीणां' 'सानु' शिखरं तदपि 'तविषेभिः' बिसखानक इवानादरेणैव 'रुजति' भनक्तीत्यर्थः। येयमेवंगुणविशिष्टा तामेतां वयं 'पारावतघ्नीं' पारावारघातिनीं, सा हि 'ऊर्मिभिः' पारं चावारं च उभे अपि हन्ति। 'अवसे' अवनाय रक्षणाय। आत्मनः कथ-

नाम रक्षेदसावस्मानित्येवमर्थं पुरस्कृत्य 'सुवृक्तिभिः' सुप्रवृत्ताभिः' स्तुतिभिः सरस्त्रौष्ठवादियुक्ताभिः। किम्? 'सरस्वतीम् आविवासेम धीतिभिः' सरस्वतीमाभिमुख्येनावस्थिताः परिचरेम, 'धीतिभिः' "कर्मभि." स्तुतिभिश्चानेकप्रकाराभिश्चेत्यर्थः। एष समस्तार्थः॥

अथैकपदनिरुक्तम्।—"शुष्ममिति बलनाम" तद्धि "शोषयतीति सतः" सत इति कारकावधारणम्। विपर्ययेणापि ह्यभिधानानामर्थो भवत्येवं मन्यमानो भाष्यकारो बलनामसु पठितमपि सदेतदभिधानमेवमाह शुष्ममिति बलनामेति। "विस, बिस्यतेर्भेदनकर्मणः तद्धि भिद्यते "वृद्धिकर्मणो वा"। वर्द्धते हि तत्। "सानु" समस्तं हि तत् "उच्छ्रितं भवति, समुन्नुन्नमिति वा" अथवा अर्द्धं नुन्नं प्रेरितं भवति। "पारं परं भवति" अवरस्मात् कूलात्, "आवारम् अवरम्" भवति परस्मात् कूलात्॥

अस्यामृचि तविषेभिः, ऊर्मिभिः, पारावतघ्नीम्—इत्येतद् विशेष्यलिङ्गं नदीसत्त्वं पश्यता भाष्यकारेण "अथैतन्नदीवत्"— इत्युक्ता इयमृगुपात्ता। सरस्वतीशब्दस्य नद्यभिधायकत्वे इयं पुनर्मैत्रायणीयके "उतस्यानः सरस्वती"—इत्यस्य षडर्चस्योत्तमा। एतच्च पुनः षडर्चानुक्रमेण न "सारस्वतीं धेनुमुर्ग्रामालभेत यः क्षेत्रे पशुषु वा विवदेत"—इत्येतस्य पशोः सम्पद्यते। सेयमनेन प्रकारेण सारस्वतस्य पशुहविषो याज्या भवति। एवञ्च सति इयमपि देवतावदित्येव समुपपद्यते, न त्वदेवता इज्यते। तदेवं कृत्वा भाष्यकारेण यदुक्तं "तत्र यत्तावदुपरिष्टात् नदीवत्सम्बद्धानोऽथैतन्न-

दीवत्"—इति तद्विरुध्यते ? तत्रोक्त समाधि ,—विभवो ह्यनु पक्षीणशक्तयो मन्त्रशब्दा । प्रदर्शनमात्रमेतत् क्रियते। सर्वथैत न्मन्त्रशब्दाना योऽर्थ उपपद्यते स योज्यो यथासम्भवमिति। देवतापक्षे विनियोगानुविधानाभिप्रायेण सरस्वती माध्यमिका वाक्, सा गिरीणा मेघाना सानूनि भञ्जयत्यूर्मिभि पारावारे द्यावापृथिव्यौ हन्तीति योज्यम्। तविषेभिरूर्मिभि महद्भिरित्ये वमादि च योज्यम्। "सुप्रवृत्ताभि स्तुतिभि सरस्वती कर्मभि परिचरेम" गतार्थम्॥

"उदकनामान्युत्तराणि एकशतम्"। उदकस्य नामानि 'उदकनामानि', 'उत्तराणि प्रकृतेभ्यो वाङ्नामभ्य । मेघाश्रया हि वाक्, मेघोत्थं चोदकम् —स्तनयित्नुशब्दपूर्वकञ्चेति वाङ्ना मभ्य उत्तराण्युदकनामानि। कियन्ति पुनस्तानि ? 'एकशतम्' एकञ्च शतञ्च एकशतम् (१०१)। कतमानि पुनस्तानि ? "अर्ण, क्षोद, क्षद्म"—इत्येवमादीनि। अरणशीलमर्ण। क्षिप्रमु नत्तीति क्षोद। क्षीणिमत्र करोतीति क्षद्म। इत्येवमाद्य भ्यूहितव्यम्॥

आह,—"उदकं कस्मात्" ? उच्यते,—"उनत्तीति सत" तद्धि यत्र गच्छति तत्र उनत्ति क्लेदयति। 'उन्दी क्लेदने (रुधा० प०)'। सत इति कारकावधारण पूर्ववत्॥

"नदीनामान्युत्तराणि सप्तत्रिंशत्"। नदीना नामानि 'नदी नामानि', 'उत्तराणि' इति प्रकृतेभ्य उदकनामभ्य उत्तराणि, नदीनामानि। कियन्ति पुनस्तानि ? 'सप्तत्रिंशत् (३७)। यानि

पुनस्तानि? "अवनयः, यह्वयः, खाः, सीराः"—इत्येवमादीनि। अवनतेन निम्नेन प्रदेशेन यान्तीत्यवनयः। ह्वयन्त्यो यान्तीति यह्वयः। ख्यातव्या भवन्तीति खाः। सरन्तीति सीराः। एवमादि योज्यम्॥

आह,—"नद्यः कस्मात्"? उच्यते,—"नदनाः" ह्येताः "भवन्ति" "शब्दवत्यः" शब्दसंयुक्ताः। किञ्च, "बहुलम्" "आसां" नदीनाम्, अन्यदेवतेषु मन्त्रेषु "नैघण्टुकं वृत्तम्" अप्रधानम्। "आश्चर्यमिव प्राधान्येन" कश्चिदेव नदीदेवतो मन्त्रः स्यात्। "तत्रेतिहासमाचक्षते"। यस्मिन् सूक्ते प्रधाना नद्य एव, तत्रेमं निदानभूतमितिहासमाचक्षते इति आचार्य्याः॥

"विश्वामित्रः" नाम "ऋषिः"। "सुदासः पैजवनस्य" राज्ञः "पुरोहितो बभूव"। "विश्वामित्रः सर्वमित्रः" सर्वस्यैव हि स मित्रं, सर्वमेव वा तस्य मित्रमिति विश्वामित्रः। "सर्वम्" —इति किमुक्तं भवति? उच्यते,—तद्धि "संसृतं" भवति,—सङ्गतं भवत्येकस्मिन्। "सुदाः कल्याणदानः" तस्य हि नित्यमेव प्रशस्तं दानं भवति। "पैजवनः पिजवनस्य पुत्रः"। "पिजवनः पुनः स्पर्द्धनीयजवः" तस्य हि स्पर्द्धार्हो जवो वेगः। अथ "वा" "अमिश्रीभावगतिर्वा" न तस्य मिश्रीभूतपूर्वा गतिरन्यैर्वेगवद्भिः, अतिशैघ्र्यात्। तस्य पैजवनस्य विश्वामित्रः पुरोहितो बभूव। "सः" पौरोहित्योपार्जितं "वित्तं" धनं "गृहीत्वा" "विपाट्छुतुद्र्योः" नद्योः "सम्भेदं" सङ्गमम् "आययौ" आगतवान्, यत्र विपाट्छुतुद्र्यौ इतराभिः सिन्ध्वादिभिर्नदीभिः सम्भिद्ये

एकीभूते इत्यर्थ । "अनुययु" 'इतरे" तदनुयायिनस्तस्करा वा । "स विश्वामित्र" तास्तितीर्षु 'नदी तुष्टाव"—"गाधा" स्वल्पोदका यूय "भवतेति'। एतमर्थं पुरस्कृत्य कथ पुन स्तुष्टाव ? "अपि द्विवत्" द्विवचनसयुक्तैर्मन्त्रै, "अपि बहुवत्" बहुवचनसयुक्तैर्मन्त्रै । "तत्" तत्र, एव सति "यद् द्विवत्" द्विवचनवत्, "तत्" "उपरिष्टात्" चतुर्दशाध्याये "प्रपर्वतानाम् (ऋ० स० ३, २, १२, १) —इत्येतस्यामृचि "व्याख्यास्याम"। "अथ" पुन "एतद् बहुवत्" व्याख्यायते—॥२॥

रमध्वं मे वचसे सोम्याय ऋतावरीरुप मुहूर्तमेवैः ।
प्रसिन्धुमच्छा बृहती मनीषावस्युरह्वे कुशिकस्य सूनुः ॥

उपरमध्वं मे वचसे सोम्याय सोमसम्पादिन ऋतावरीऋ त-वत्य ऋतमित्युदकनाम प्रत्यृत भवति मुहूर्तमेवैरयनैरवनैर्वा मुहूर्तो मुहुऋ तुऋ तुरर्त्तेर्गतिकर्मणो मुहुर्मूलह इह कालो यावदभीक्ष्णञ्चेत्यभीक्ष्णमभिक्षणं भवति क्षण' क्षणोतेः प्रक्ष्णुतः कालः कालः कालयतेर्गतिकर्मणः प्राभिह्वयामि सिन्धु बृहत्या महत्या मनीषया मनस ईषया स्तुत्या प्रज्ञया वावनाय कुशिकस्य सूनुः कुशिको राजा बभूव क्रोशतेः शब्दकर्मणः क्रशतेर्वा स्यात् प्रकाशयतिकर्मणः साधुविक्रो-शयितार्थानामिति वा नद्य' प्रत्यूचुः ॥ ३ ॥

रमध्वं मे वचस इति। त्रिष्टुम पताः। "उपरमध्वं मे" उपेत्ययमुपसर्गो मन्त्रस्य मध्यादाकृष्य भाष्यकारेण रमध्वमित्यनेन क्रियापदेन योजितः। उपरमध्वं मम "वचसे" "सोम्याय सोमसम्पादिने" सोमा हि अनेनास्मद्वचसा देवतानामन्नभूता यहवः सम्पादिताः, ता यूयमस्मै प्रतिविशिष्टाय वचसे सत्यतार्थम्,—कथन्नाम सत्यमिदं स्यादित्येवमर्थमुपरमध्वम्, मन्दवेगा गाधाश्च भवतेत्यभिप्रायः। हे "ऋतावरीः" उदकवत्यः। कियन्तं पुनः कालमुपरमध्वम्? "मुहूर्त्तम्" न च नित्यमेव मन्दवेगतां गाधोदकतां वा प्रार्थये, किन्तर्हि? यावदुत्तरेयमहं तावदेवेत्यभिप्रायः। "एवैः" एमिरुदकैरतिप्रवृद्धैरुपरमध्वम्। "अवनैर्वा" कामैरेतैरस्मत्प्रार्थनाविशेषैः—उत्तरेम, गृहान् गच्छेम, वित्तं प्रापयेम, इत्येवमादिभिर्निमित्तैः प्रार्थ्यमाना अस्माभिरुपरमध्वम्। अथ वा "अयनैः" चित्रैर्गमनैर्वेगवद्भिर्यैर्यूयमभिप्रवृत्तास्तैरुपरमध्वम् मुहूर्त्तम्। यदैवमविशेषेणोच्यमाना न शुश्रुवुः, तदैकामुद्दिश्य प्रवदृते वक्तुम्,—'सिन्धुमच्छ अच्छ'। अभेः स्थाने। 'अह्वे'—इत्येतत् पदमाकृष्य "प्र अभि ह्वयामि" इत्येवं योजितं भाष्यकारेण। किं प्राभिह्वयामि? "सिन्धुम्"। कया? "बृहती मनीषा' बृहत्या मनीषया" "मनस ईषया" मनःपूर्विकया "स्तुत्या" इत्यर्थः। अथ "वा" "प्रज्ञया"। कमर्थमिच्छन् अभिह्वयामि? 'अवस्य' अवनमिच्छन्, गमनमित्यर्थः। 'कुशिकस्य सूनुः" अहमिति। पितुरपि गौरवान्मम गौरवमेताः कुर्युः इति समस्तार्थः॥

अथैकपदनिरुक्तम् ।—"ऋतमित्युदकनाम" । तद्धि देश देश "प्रत्यृत भवति" गतमित्यर्थ । "मुहूर्त्तौ मुहुर्ऋतु" एव विगृह्य ऋतुशब्द तावन्निर्ब्रवीति,—ऋतुरर्त्ते", "गतिकर्मण" गत्यर्थे वर्त्तमानस्य । स हि गच्छत्येव । अधुना मुहु शब्द निर्ब्रवीति,—"मुहुमूल्ह इव काल" अल्पत्वात् । मूढ इव य काल ऋतु , स मुहूर्त्त इत्युच्यते । किञ्च "यावत्" एव "च अभीक्ष्ण" तावन्मुहूर्त्त , यावाश्च मुहूर्त्तास्तावदभीक्ष्णमित्यर्थ । 'सारूप्यप्रसक्त निरुच्यते,—"अभीक्ष्णमभिक्षण भवति" तद्धि क्षणमाभिमुख्येन स्थित भवति । "क्षण क्षणोते" हिंसार्थस्य (तना० उ०) । स हि 'प्रक्ष्णुत" प्रकर्षेण हिंसित "काल" अल्पत्वात् । "काल कालयतेर्गतिकर्मण' । स हि सर्वाण्येव भूतानि कालयति क्षय नयतीत्यर्थ । "कुशिको राजा"—इति तत्त्ववचनम् । "क्रोशते वा शब्दार्थस्य (भू० प०)' स हि साध्वेव क्रियतामिति नित्यकालमेव क्रोशति । "क्रशतेर्वा स्यात्" प्रकाशयत्यर्थस्य, स हि प्रकाशयिता साधूना धर्माणामात्मनैव प्रकाशक । अथ "वा" "साधुविक्रोशयितार्थानामिति' साधुषु ब्राह्मणेषु विक्रोशयिता अर्थाना दातेत्यर्थ ॥

एवमुक्तवन्त "नद्य प्रत्यूचु"—॥ ३ ॥

इन्द्रो अस्माँ अरदद्वज्रबाहुरपाहन् वृत्रं परिधिं नदीनाम् । देवोऽनयत्सविता सुपाणिस्तस्य वय प्रसवे याम

उर्वीः ॥ इन्द्रो अस्मानरदद्वज्रबाहू रदतिः खनति कर्मापाहन् वृत्रं परिधिन्नदीनामिति व्याख्यातम् । देवोऽनयत्सविता सुपाणिः । कल्याणपाणिः पाणिः पणायतेः पूजाकर्मणः प्रगृह्य पाणी देवान् पूजयन्ति । तस्य वयं प्रसवे याम उर्वीः । उर्व्य ऊर्णोतेर्वृणोतेरित्यौर्णवाभः प्रत्याख्यायान्तत आशुश्रुवुः ॥ ४ ॥

इन्द्रो अस्माँ अरददिति । "अरदत्" अखनदित्यर्थः । "रदतिः खनतिकर्मा" । कथम्पुनरखनत् ? "अपाहन् वृत्रम्" अपावधीत् मेघम् । "परिधिं नदीनाम्" नद्नानामपाम् । स हि नियतं तीरयोर्निरुणद्धि, तमिन्द्रो वज्रेण हन्ति, तस्मिन् हते पृथिवीं प्राप्यापो यथा निम्नानुसारिण्यः खातानि कुर्वन्त्यो वहन्ति, तैः खातैर्वयं गच्छामः । एवं कृत्वा 'अस्मान् इन्द्रः अरदत्' । एवञ्च कृत्वा स एव इन्द्रः 'देवः' 'सविता' सर्वार्थप्रसविता वर्षद्वारेणास्मान् 'अनयत्' समुद्रम् । 'सुपाणिः' प्रशस्तपाणिरित्यर्थः । यत एव सोऽस्माकं खनिता नेता च, अतः 'तस्य' इन्द्रस्य 'प्रसवे' अनुज्ञायामादेशे वर्त्तमाना वयं 'यामः' गच्छामः 'उर्वी' ऊर्णुवत्यः सम्भजमाना वा । तानि तानि देशान्तराणि अम्भोभिः । सोऽस्माकमीश्वरः । स एवास्मानाज्ञापयितुमर्हति, न त्वमित्यभिप्रायः॥

"पाणिः पणायतेः" पूजार्थस्य । "प्रगृह्यपाणी" संयतौ कृत्वा ततः "देवान् पूजयन्ति" इति ॥

"प्रत्याख्याय" एवं तमृषिं तत्सूक्तस्य "अन्ततः" अन्ते अनयर्चा "आशुश्रुवुः" ता नद्यः श्रुतवत्य इत्यर्थः—॥ ४ ॥

आ ते॑ कारो शृणवामा॒ वचां॑सि य॒याथ॑ दू॒रादन॑सा॒ रथे॑न । नि ते॑ नंसै पीप्या॒नेव॒ योषा॒ मर्या॑येव क॒न्या॑ शश्व॒चै ते॑ ॥ आशृणवाम ते कारो वचनानि याहि दूरादनसा च रथेन च निनमाम ते पाययमानेव योषापुत्रं मर्यायेव कन्या परिष्वजनाय निनमा इति वाधनामान्युत्तराणि षड्विंशतिस्तेषामष्टा उत्तराणि बहुवदश्वः कस्मादश्नुतेऽध्वानं महाशनो भवतीति वा तत्र दधिक्रा इत्येतद् दधत् क्रामतीति वा दधत् क्रन्दतीति वा दधदाकारी भवतीति वा तस्याश्ववद् देवतावच्च निगमा भवन्ति तद्यद्देवतावदुपरिष्टात्तद्व्याख्यास्यामोऽथैतदश्ववत् ॥ ५ ॥

आ ते कारो इति। तदा श्रुतं भवति, यदा तद्वचः क्रियते, श्रूयमाणमपि हि तन्नैव श्रुतं भवति, यन्न क्रियते। 'आ ते कारो शृणवाम' आभिमुख्येनावस्थिताः सत्यः शृणवाम हे 'कारो' स्तोमानां कर्त्तः! किमाशृणवाम? 'वचांसि'। अतो ब्रूमः,—"ययाथ" याहि त्वम्। 'अनसा' शकटेन सह 'रथेन' च। कस्मात् पुनरेवमादरवत्यो ब्रूमः याहीति? इतः,—यस्मात् 'दूरात्' आयातस्त्वं परिश्रान्तः, तस्मात्कारुण्यं नस्त्वयि। तेन

पयमेता 'नि ते नसै' "निनमाम ते"। नीचैर्नमाम गाधोदका भवामेत्यर्थः। कथम्पुनर्निनमाम? 'पीप्यानेव योषा' "पायय मानेव योषा पुत्र" यथा निनमेदेव यच तत्र निनमाम। एवमुक्त्वा पुत्रोपमया कदाचिदयं क्रोधमियादिति मन्वाना सत्य पति कन्यासंरुद्धामन्यामुपमामुपाददिरे,—"मर्य्यायेव कन्या शश्वचै ते 'मर्य्याय' मनुष्याय 'कन्या' नवोढा 'शश्वचै ते' "परिष्व जनाय" कथ नाम परिष्वजेत मामयमित्यभिप्रायेण यथा सा निनमेदेव यत्र तत्र निनमाम। "निनमा इति वा" "यदि वा" निनमा इत्येव परिणाम निनसै इति एतस्य पदस्य अथ वा निनमै इति॥

अश्वनामान्युत्तराणि षड्विंशतिः। अश्वस्य नामानि 'अश्वनामानि' 'उत्तराणि' अश्वेभ्यो नदीनामभ्य, अप्सु एव ह्यश्वा। एव ह्याह,—"अप्सु जाता अश्वा स्वादेवैतान् योनेर्जनयन्ति" इति। तस्मान्नदीनामभ्य उत्तराण्यश्वनामानि। कियन्ति पुन स्तानि? 'षड्विंशति' षडधिका विंशति (२६)। कतमानि पुन स्तानि? "अत्य, हय अर्वा"—इत्येवमादीनि। अतति गच्छ तीत्यत्य। हयति गच्छतीति, हन्ति वाऽध्वानमिति हय। ईरणवानर्वा, गमनवानित्यर्थ। एवमादि॥

"तेषाम्" अश्वनाम्नाम् "अग्रे" यानि "उत्तराणि" अश्वाय इत्येवमादीनि, तानि "बहुवत्" बहुवचनसंयुक्तानीत्यर्थ॥

आह,—"अश्व कस्मात्"? उच्यते,—"अश्नुतेऽध्वान" व्याप्नोतीत्यर्थ। "महाशनो वा भवति इति" स हि बहु भुङ्क्ते।

"तत्र" तस्मिन् पड्विंशके अश्वाभिधानगणे "दधिक्रा इत्येतत्" पदं सन्दिग्धम्। तत् पुनरेतत्—"दधत् क्रामतीति" धारयन्नयमश्वारोहं क्रामतीति दधिक्राः ? अथ "वा" "दधत्" धारयन्नयमश्वारोहं "क्रन्दति" शब्दं करोति "इति" दधिक्राः ? अथ "वा" "दधत्" धारयन् अयमश्वारोहम् "आकारी" आकारवान् "भवतीति" दधिक्राः ?—स हि अधिरूढेऽश्वारोहे आकुञ्चितग्रीवो विपुष्पितसर्वगात्र आकृतिमान् भवति ॥

"तस्य" दधिक्राशब्दस्य "अश्ववत्" अश्वसंयुक्ताः, "देवतावत्" देवतासंयुक्ताः "च" "निगमा भवन्ति"। "तत्" एतदुच्यते,—"यद् देवतावत्" अस्य दधिक्राशब्दस्य, "तत्" "उपरिष्टात्" पञ्चदशेऽध्याये "आ दधिक्राः शवसा (ऋ० सं० १०, ६, १६, १)"—इत्यस्यामृचि "व्याख्यास्यामः"। "अथ" पुनर्यत् "अश्ववत्" अस्य, तत् "एतत्" व्याख्यायते—॥ ५ ॥

उत स्य वाजी क्षिपणिं तुरण्यति ग्रीवायां बद्धो अपि कक्ष आसनि। क्रतुं दधिक्रा अनु सन्तवीत्वत् पथामङ्कांस्यन्वापनीफणत् ॥ अपि स वाजी वेजनवान् क्षेपणमनु तूर्णमश्नुतेऽध्वानं ग्रीवायां बद्धो ग्रीवा गिरतेर्वा गृणातेर्वा गृह्णातेर्वापि कक्ष आसनीति व्याख्यातम्। क्रतुं दधिक्राः कर्म वा प्रज्ञां वा। अनुसन्तवीत्वत्। तनोतेः पूर्वया प्रकृत्या निगमः। पथामङ्कांसि पथां कुटिलानि पन्थाः पततेर्वा

पद्यतेर्वा पन्थतेर्वाङ्क्षोऽञ्चतेरापनीफणदिति फणतेश्चर्करीतवृत्तं दशोत्तराण्यादिष्टोपयोजनानीत्याचक्षते साहचर्य्यज्ञानाय ज्वलतिकर्माण उत्तरे धातव एकादश तावन्त्येवोत्तराणि ज्वलतो नामधेयानि नामधेयानि ॥ ६ ॥

उत स्य वाजीति। गोतमपुत्रस्य वामदेवस्येयमार्षम्। जगती। वाजपेये वाजियुक्तं रथमधिरुह्य यजमानोऽनुवाकं जपति, तत्रैषा। "उत स्यः" "अपि सः" इत्यर्थः। "वाजी वेजनवान्"। 'ओ विजी भयचलनयोः (रु० प०)'। भयवान्, परेभ्यो भयदाता, परेषां हि तं दृष्ट्वा भयमुत्पद्यते। चलनवान् वा, स हि नित्यं चलनशीलः। क्षिपणि' "क्षेपणम् अनु" कशाघातमनु "तूर्णमश्नुतेऽध्वानम्" व्याप्नोतीत्यर्थः। अपि कशाप्रहारमनु 'तुरण्यति' अप्यनाहत एवेत्यऽपिशब्दः। किञ्च "ग्रीवायाम्" उरसि वध्रेण "बद्धः"। "अपि कक्षे" कक्ष्यया। अथ "आसनि" मुखे खलीनेन बद्धः। एवमनेकेषु स्थानेषु बद्धः। तथापि तुरण्यत्येव। अन्यो हि एकस्मिन्नपि प्रदेशे बद्धः चलितुमपि न शक्नोति, किमुत त्वरितुम्। किञ्च, "क्रतुम्" आत्मीयं गमनं "कर्म वा प्रज्ञां वा" अश्वारोहस्य सन्तनोति काममभिप्रेतार्थेन शीघ्रगामित्वात् "दधिक्राः" अश्वः अनुसन्तनोतीत्यर्थः। किञ्च यान्यपि च कानिचित् "पथां" मार्गाणाम् "अङ्कांसि" अञ्चितानि कुटिलानि सन्ति, तान्यपि अनुलोमानीव कुर्वन् आशुगामित्वात्। आभिमुख्येन पुनः पुनर्भृशं वा फणति गच्छतीत्यर्थः॥ एष समस्तार्थः॥

अथैकपदनिरुक्तम् ।—"ग्रीवा, 'गिरतेर्वा गिलनार्थस्य (तु० प०), तया हि गिलत्यन्नम् । "गृणातेर्वा" शब्दार्थस्य (क्र्या० प०), तया हि शब्दो गीर्य्यते । "गृह्णातेर्वा" (क्र्या० उ०) तया ह्युदकादि गृह्यते, यः शृङ्खलीक्रियते । "अनुसन्तवीत्यत्" इति, "तनोतेः धातोः (त० प०) "पूर्वया प्रकृत्या निगमः । षड्विधो हि धातुः । "प्रकृत्यन्तः, सनन्तश्च, यङन्तो, यङ्लुगेव च । ण्यन्तो, ण्यन्तसनन्तश्च, षड्विधो धातुरुच्यते ॥" आसां षण्णां धातुप्रकृतीनां या पूर्वा प्रकृतिस्तयैव निगमः, न सन् प्रकृतीत्यादीनामन्यतमया । "पन्थाः, पततेर्वा पद्यतेर्वा पन्थतेर्वा" त्रयोऽपि ह्येते गत्यर्थाः, एषामन्यतमस्य । "अङ्कः सञ्चतेः" गत्यर्थस्य । "आपनीफणदिति" "फणतेः" गत्यर्थस्य चर्करीतान्तत्वेन वृत्तम् ॥

"दश" यानि "उत्तराणि" नामानि, तान्यश्वनामसम्बन्धेनैवोच्यन्ते तान्यपि ह्यश्वानामेवेति । तानि पुनः "आदिष्टोपयोजनानि"—"इति" एवम् "आचक्षते" आचार्य्याः । इदमिन्द्रस्याश्वानां नाम, इदमग्नेः, इदमादित्यस्य,—इत्येवमादिष्टोपयोजनानि । कतमानि पुनस्तानि ? "हरी इन्द्रस्य"—इत्येवमादीनि । हरी हरितवर्णौ इन्द्रस्याश्वौ । "रोहितोऽग्ने." रोहितवर्णौ । इत्येवमादि ॥

"ज्वलतिकर्माण उत्तरे धातव एकादश" । य एव ह्यश्ववन्तो भवन्ति, त एव ज्वलन्तीव तेजसा, ततोऽश्वनामस्य उत्तरे ज्वलत्यर्था धातवः । कतमे पुनस्ते ? इति । "भ्राजते, भ्राशते, भ्राश्यति"—इत्येवमादयः ॥

"तावन्त्येवोत्तराणि" "जमत्, कल्मलीकिनम्, जञ्जणाभवन्"—इत्येवमादीनि "ज्वलतो नामधेयानि"। जमति गच्छतीति "जमत्"। कमहं मलिनं शोधयामीति "कल्मलीकिनम्"। जनं भावयतीति "जञ्जणाभवन्"। इत्येवमादि॥ ।

अध्यायपरिसमाप्त्यर्थो द्विरभ्यासः॥ ६॥

इति निरुक्तवृत्तौ सप्तमाध्यायस्य सप्तमः पादः॥ ७॥

इति जम्बुमार्गनिवासिनः आचार्य्यभगवद्दुर्गस्य
कृतौ ऋज्वर्थायां निरुक्तवृत्तौ सप्तमोऽध्यायः
(द्वितीयोऽध्यायः) समाप्तः॥ २॥

१ २ ३ ४ ५
(अथनिर्वचनमोघोराज्ञोविद्याहवा अथातोऽनुक्रमिष्या-
६ ७ ८ ९ १० ११
मोवृक्षेवृक्षेतावांवास्तुनियईचकारायंसशिङ्क्ते हिरण्यनामान्या-
१२ १३ १४ १५ १६
र्पिपेणोयद्देवापिःसाधारणानिस्वरादित्यो रश्मिनामान्यतिष्ठ-
१७ १८ १९ २० २१ २२
न्तीनांदामपत्नीरात्रिनामांनीदंश्रेष्ठरुशद्वत्साहश्चक्रुष्णदेवानां-
२३ २४ २५ २६ २७ २८
मानेवाङ्नामानीयंशुष्मेभीरमध्वंम इन्द्रो असमानातेकारो
उत्तस्योऽष्टाविंशतिः॥)

इति निरुक्ते पूर्वषट्के द्वितीयोऽध्यायः॥२॥

—०—

अथ तृतीयाध्यायस्य

प्रथमः पादः ।

ॐ३म् । कर्मनामान्युत्तराणि षड्विंशतिः कर्म कस्मात् क्रियत इति सतोऽपत्यनामान्युत्तराणि पञ्चदशापत्यं कस्मादपततं भवति नानेन पततीति वा तद्यथा जनयितुः प्रजैवमर्थीये ऋचा उदाहरिष्यामः ॥ १ ॥

"कर्मनामान्युत्तराणि षड्विंशतिः"। कर्मणो नामानि 'कर्मनामानि' 'उत्तराणि'—इति प्रकृतेभ्यः। उच्यन्त्येवास्मीं कर्माणि क्रियन्त इति उक्तनामभ्यः उत्तराणि कर्मनामानि। कियन्ति पुनस्तानि? 'षड्विंशतिः' षडधिका विंशतिः (२६)। कतमानि पुनस्तानि? "अपः", "अप्नः", "दंसः"—इत्येवमादीनि। आप्यते पुरुषेणैतत्, आप्नोति वा पुरुषमेतदिति "अपः"। "अप्नः"—इत्येतदप्याप्नोतेरेव। एवमादि योज्यम्॥

आह,—"कर्म कस्मात्"? उच्यते—"क्रियत इति सतः"। सत इति वाक्यावधारणार्थमिति॥

"अपत्यनामान्युत्तराणि पञ्चदश"। अपत्यस्य नामानि 'अपत्यनामानि' 'उत्तराणि'—इति प्रकृतेभ्यः कर्मनामभ्यः। सर्व-

कर्मणो ह्यपत्योत्पादनकर्मैव प्रधानमृणापाकरणद्वारेणेति कर्मनामभ्य उत्तराणि अपत्यनामानि। कियन्ति पुनस्तानि? 'पञ्चदश'। कतमानि पुनस्तानि "तुक्, तोकम्, तनयम्"—इत्येवमादीनि। "तुक्" तकतेर्धातोस्तुज्यतेर्वा। "तोकं" तुद्यतेः। "तनयं" तनोतेरिति वक्ष्यति॥

आह,—"अपत्यं कस्मात्"? उच्यते—"अपततं भवति" पितुः सकाशादेत्य पृथगिव ततं भवति। अथ "वा" "अनेन" जातेन सता पितरो नरके "न पतन्तीति"—इत्यपत्यम्॥

अत्र पुनर्विवदन्ते,—द्वयोः सन्निपाते किं क्षेत्रिणोऽपत्यमुत बीजिनः? इति। "तत्" एतदुच्यते,—"यथा जनयितुः" एव "प्रजा" भवति, "एवमर्थीये ऋचावुदाहरिष्याम"—॥ १॥

परिषद्यं ह्यरणस्य रेक्णो नित्यस्य रायः पतयः स्याम। न शेषो अग्ने अन्यजातमस्त्यचेतानस्य मा पथो वि दुक्षः॥ परिहर्त्तव्यं हि नोपसर्त्तव्यमरणस्य रेक्णोऽरणोऽपार्णो भवति रेक्ण इति धननाम रिच्यते प्रयतो नित्यस्य रायः पतयः स्याम। पित्र्यस्येव धनस्य न शेषो अग्ने अन्यजातमस्ति। शेष इत्यपत्यनाम शिष्यते प्रयतोऽचेतयमानस्य तत्प्रमत्तस्य भवति मा नः पथो विदूदुष इति तस्योत्तरा भूयसे निर्वचनाय॥ २॥

"परिषद्यं हि" "न प्र भाय"—इति च (२, ३ख०)। एते त्रिष्टुभौ। वसिष्ठाग्निसंवादे वसिष्ठेन हतपुत्रेण अग्निरभ्यर्थितः —पुत्रं मे देहीति। तेन किलासौ प्रत्युक्तः,—क्रीतकृत्रिमदत्तकादीनां पुत्राणामन्यतमं कुरुष्व पुत्रमिति। स एवमुक्तः, एताभ्यामृग्भ्यामन्यजान् पुत्रान् निन्दन्नौरसं पुत्रं ययाचे। "परिषद्यं०—०वि दुक्षः"। (ऋ० मं० ५, २, ६, ७) 'परिषद्य' "परिहर्त्तव्य" परिहरणीयं परित्याज्यमित्यर्थः। किम्पुनस्तत्? "अरणस्य रेक्णः" 'अरणस्य' अपगतार्णस्य अपगतोदकसम्बन्धस्य परकुलजातस्य 'रेक्णः' यदपत्याख्यं धनं, तत्र परिहर्त्तव्यम्, न पुत्रत्वेन परिकल्पयितव्यमित्यर्थः, न हि तत् पुत्रत्वेन कल्प्यमानमपि पुत्रकार्य्येष्ववतिष्ठति, परकीयत्वात्। यत एवमतो ब्रूमः, —"नित्यस्य रायः पतयः स्याम" "पित्र्यस्येव धनस्य"। यथा हि यदेव पित्र्यं धनं पुत्रस्य भवति, तस्यैव ह्यपरि स्वामित्वं भवति। एवं यदेव स्वयमुत्पादितमपत्यं भवति, तदेव मुख्यं भवति, नेतरत्—क्षेत्रजं वा क्रीतकं वा। यत एवमतो ब्रूमः,—यदेव नित्यमात्मीयमगोणं स्वयमुत्पादितं पुत्राख्यं नः धनम्, तस्यैव वयं पतयः पालयितारः स्याम, मा परकीयस्येत्यभिप्रायः। कस्मात् पुनरेवं ब्रूमहे? इत,—यस्मात् "न शेषो अग्ने अन्यजातमस्ति"। 'न अस्ति शेषः' नापत्यमन्यजातं, हे 'अग्ने!' य एव जनयति तस्यैव हि तद् भवति, नेतरस्येत्यभिप्रायः। 'अचेतनस्य' य एष हि अचेतयमानो भवति, अविद्वान्, प्रमादी, तस्यैव "अचेतयमानस्य" "प्रमत्तस्य" अध्रुवयतो धर्मान्

परितोषमात्रं "भवति"—ममेदमपत्यमिति, न अपत्यकार्य्येऽवति-घ्नते। यत एवमतो ब्रूमः,—'मा पथो विदुक्षः' मास्मानेतत् पितृपितामहप्रपितामहानुसन्ततात् 'पथः' मार्गात्, येन केनचित् प्रत्याख्यानद्वारेण "विदूदुषः"। त्वं देहि नः पुत्रमौरसमित्यभि-प्रायः॥ इति समस्तार्थः॥

अथैकपदनिरुक्तम्। "अरणोऽपार्णः" अपगतोदकसम्बन्ध इत्यर्थः। "रेक्ण इति धननाम" तद्धि "रिच्यते" अतिरिच्यते इतो लोकादमुं लोकं "प्रयत." म्रियमाणस्येत्यर्थः। "शेप इत्यपत्यनाम" तद्धि "शिष्यते" इहैव लोकेऽवतिघ्नते पितुरमुं लोकं 'प्रयतः' गच्छत इत्यर्थः॥

एवमस्यामृचि 'न शेषो अग्ने अन्यजातमस्ति'—इत्यनेन विशेषलिङ्गेन उपपन्नमेतद् भवति,—जनयितुरेव प्रजा भवति न क्षेत्रिणो नापि क्रेतुरन्यस्य वा कस्यचिदिति। एवञ्चैष शब्दार्थ उपपद्यते,—यस्मादेवापेत्य ततं भवति, तस्यैवापत्यमिति॥

अनेनैव चापत्यशब्दनिर्वचनप्रसङ्गेनैष मन्त्रो व्याख्यातः, उत्तरञ्च सावशेषमपत्यशब्दे प्रसक्तानुप्रसक्तमेवोच्यते,—"तस्य उत्तरा भूयसे निर्वचनाय"—॥ २॥

न हि ग्रभायारणः सुशेवोऽन्योदर्यो मनसा मन्तवा उ। अधा चिदोकः पुनरित्स एत्या नो वाज्यभीषालेतु नव्यः॥ न हि ग्रहीतव्यो अरणः सुसुखतमोऽप्यन्यादर्य्यो मनसापि न मन्तव्यो ममायमित्यथ स ओकः पुनरेव

तदेति यत आगतो भवत्योक इति निवासनामोच्यत । ऐतु नो वाजी वेजनवानभिपद्यमानः सपत्नान्नवजातः स एव पुत्र इत्यथैतां दुहितृदायाद्य उदाहरन्ति पुत्रदायाद्य इत्येके ॥ ३ ॥

न हि ग्रभायेति। "न हि ग्रहीतव्य' नाङ्गीकर्त्तव्य पुत्रो ममायमित्यनेनाभिप्रायेण। क पुनरसौ नात्मीयीकर्त्तव्य ? "अरण' अपार्ण, अपगतोदकसम्बन्ध, अन्यकुलज। यद्यपि "सुशेव" एव स्यात "सुखतम' परिचरितो हितैषी, तथा "अपि" "अन्योदर्य' अन्येनोदारिताद्रेतसो जात, अन्यजायोदरसम्भूतो वा, यो हि स्वस्या जायाया सम्भवति, स स्व एवोदरे सम्भूतो भवति। "अर्द्धो ह वा एष आत्मनो यज्जायेति विज्ञायते"। तस्माद् योऽन्यजायोदरसम्भृत, स "मनसापि न मन्तव्यो ममायमिति" किम्पुन पुत्रत्वेन परिकल्पयितव्य इति। किङ्कारण मनसापि न मन्तव्य इति। "अधा चिदोक पुनरित्स एति"। अध शब्दोऽथशब्दस्यार्थे वर्त्तते, स च हेत्वर्थ। यस्मात् "ओक" स्व निवासस्थान स्व वश बहुनापि कालेन स एति— तद्वश्य एव भवति, तस्माद्पुत्र एवासौ। यत एवमतो ब्रवीमि, —'आ नो वाज्यभीषाळेतु नव्य'। "एतु" आगच्छतु, "न वाजी वेजनवान्' परेभ्यो भयदाता 'अभीषाट्' "अभिषहमाण" अभिभवन् "सपत्नान्" 'नव्य' "नवजात." शिशुरित्यर्थ। "स एव पुत्र" आगच्छतु, न परकीये पुत्रे सङ्कल्पितरित्यभिप्राय ॥

"अथैता दुहितृदायाय उदाहरन्ति"। इदमुक्तम्,—अपेत्य यस्मात् पितु सकाशात् तत भवति, तस्मादपत्यमिति तदिदमुभयोरपत्य प्राप्नोति दुहितु पुत्रस्य च, दुहितापि ह्यपेत्यैव तता भवति पितु सकाशात्। तत्रैव सति उभयोर्दुहितृपुत्रयोरपत्यकार्य्याणि दायाद्यादीनि अविशेषेण प्राप्नुवन्ति, तदिदं विचार्य्यते। तदधिकारार्थोऽयमथशब्द। एतामृच शासद्वह्निरित्यादि या वक्ष्यमाणा (४ ख०) ताम्, दुहितुर्दायाद्ये अर्थे उदाहरन्ति धर्मविद। अस्यामृचि वक्ष्यमाणाया (४ख०) दुहितुरपि दायाद्यत्वमस्तीति दृश्यते॥

"पुत्रदायाद इत्येके" एके पुनर्धर्मविदो मन्यन्ते यत् पैतृक वित्त तत् पुत्रस्यैव दायाद्य न दुहितुरिति॥

यथा दुहितापि दायाद्यमर्हति, तथेयमृग् निरुच्यते,—॥३॥

शासद्वह्निर्दुहितुर्नप्त्यङ्गाद्विद्वाँ ऋतस्य दीधितिं सपर्य्यन्। पिता यत्र दुहितुः सेकमृञ्जन् संशग्म्येन मनसा दधन्वे॥ प्रशास्ति वोलहा सन्तानकर्मणे दुहितुः पुत्रभावं दुहिता दुर्हिता दूरे हिता दोग्धेर्वा नप्तारमुपागमद् दौहित्रं पौत्रमिति विद्वान् प्रजननयज्ञस्य रेतसो वा अङ्गादङ्गात् सम्भृतस्य हृदयादधिजातस्य मातरि प्रत्यृतस्य विधानं पूजयन्नविशेषेण मिथुनाः पुत्रा दायादा इति तदेतदृक्-श्लोकाभ्यामभ्युक्तम्। अङ्गादङ्गात् सम्भवसि हृदयादधिजायसे।

आत्मा वै पुत्रनामासि स जीव शरदः शतमित्यविशेषेण पुत्राणांदायो भवति धर्मतः। मिथुनानां विसर्गादौ मनुः स्वायम्भुवोऽब्रवीत् ॥ न दुहितर इत्येके तस्मात् पुमान् दायादोऽदायादा स्त्रीति विज्ञायते तस्मात् स्त्रियं जातां परास्यन्ति न पुमांसमिति च स्त्रीणां दानविक्रयातिसर्गा विद्यन्ते न पुंसः पुंसोऽपीत्येके शौनःशेपे दर्शनात्। अभ्रातृमतीवाद इत्यपरम्। (अमूर्या यन्ति जामयः सर्वा लोहितवाससः।) अभ्रातर इव योषास्तिष्ठन्ति हतवर्त्मनः। अभ्रातृका इव योषास्तिष्ठन्ति सन्तानकर्मणे पिण्डदानाय हतवर्त्मान इत्यभ्रातृकाया अनिर्वाह औपमिकस्तस्योत्तरा भूयसे निर्वचनाय ॥ ४ ॥

शासद्वह्निरिति। एषा त्रिष्टुप्। ऐन्द्रे सूक्ते विश्वामित्री। माध्यन्दिने सवने उक्थपर्य्याये अच्छावाकस्य यच्छस्त्रमभिजिद्विश्वजिदादिष्वहीनेष्वहः स्तु अहीनसूक्तं नाम, तत्रेयं शस्यते। "न जामये तान्व (५ म०)"—इतीयमपि अनयैव समानार्षविनियोगदैवतच्छन्दस्का। 'शासद् वह्नि' "प्रशास्ति" प्रख्यापयति प्रज्ञापयतीत्यर्थः। क पुनरसौ प्रशास्ति? किं वा प्रशास्ति? इति। "वोढा" य उद्वोढा स्त्रिया भवति स, तस्यां या जायते दुहिता, तस्याः पुत्रभावं प्रशास्ति,—"सन्तानकर्मणे" अर्थाय।

"दुहिता, दुर्हिता" सा हि यत्रैव दीयते, तत्रैव दुर्हिता भवति, "दूरे" सती सा पितु "हिता" पथ्या भवतीति दुहितेत्युच्यते। "दोग्धेर्वा" सा हि नित्यमेव पितु सकाशात् द्रव्य दोग्धि प्रार्थनापरत्वात्। आह,—कथ पुनर्गम्यते प्रशास्ति वोढा सन्तानकर्मणे दुहितु पुत्रभावम्? इति। उच्यते,—इत। यस्मात् 'नप्त्यङ्गात्' "नमारमुपागमत्" उपागच्छति चेतसा। "दौहित्रम्' दुहितृपुत्रम्। "पौत्रमिति" पुत्रो ममायमिति एव मुपागच्छति? न चापुत्रस्य पौत्र स्यात्, उपागच्छति च दुहितु पिता ममायमिति दौहित्रम्। तस्माद् दुहितापि पुत्र एव, यस्या पुत्र पौत्रो ममायमित्येव चेतसा उपगम्यते। 'विद्वाँ ऋतस्य दीधितिं सपर्यन्' । 'विद्वान्' कस्य? 'ऋतस्य "प्रज ननयज्ञस्य"। ऋत इत्येदपठित यज्ञनाम। 'दीधितिं' विधान मित्यर्थ। प्रजननयज्ञविधानमभिशेषेण 'सपर्यन्' पूजयन्नित्यर्थ। यथैव हि पुत्रजनने प्रजननयज्ञस्तन्यते तथैव हि दुहितृजननेऽपि,—यैरेव मन्त्रैर्येनैव च विधानेन पुत्रगर्भ आधीयते, तैरेव मन्त्रैस्ते नैव च विधानेन दुहितृगर्भोऽपि। अथ "वा" ऋतशब्देन रेत उच्यते। तत् "अङ्गादङ्गात्" यत् सम्भृत तत् सर्वगात्रेभ्य हृदयानुस्मरणनिमित्तेन गर्भजनने "मातरि" प्रच्युत प्रवृत्त भवति रेत, तस्य "रेतस" "विधान न विशेषेण पूजयन्" स वोढा दौहित्र पौत्रो ममायमित्येवमुपगच्छति चेतसा। येनैव हि विधानेन पुत्रजनने रेत उत्सृज्यते, तेनैव हि दुहितृजननेऽपि, तत्रैव सति रेत उत्सर्गविध्यविशेषात् प्रजननयज्ञाविशेषाद्वा अवि

शेषेण मिथुनाः पुरुषाः स्त्रियश्च उभयेऽपि दायादा इत्येवमेके धर्मविदो मन्यन्ते। तदेतत् "ऋक्श्लोकाभ्याम्" "अभि" आभिमुख्येन "उक्तम्"—"मिथुनाः पुत्रा दायादा इति" "अङ्गादङ्गात् सम्भवसि (गो० गृ० सू० २, ८, २१)" "अविशेषेण पुत्राणाम्" —इत्येताभ्याम्॥

'शासद्वह्निः'—इत्येतस्या ऋचः प्रथमोऽर्द्धर्चो व्याख्यातः, 'पिता यत्र दुहितुः'—इत्ययं द्वितीय उपरिष्टादस्य पादस्य व्याख्यास्यते। अनयोरर्द्धर्चयोरन्तरा तदेतदृक्श्लोकाभ्यामभ्युक्तमित्यत आरभ्य प्रसक्तानुप्रसक्तं दायाद्यधर्माश्रितमेव पूर्वोत्तरपक्षसम्बन्धादाचारगतं बहु व्याख्यायते मन्त्रविषयख्यापनाय, ईदृशोऽपि मन्त्राणां विषयो भवतीति धर्मसंविज्ञानाय च। सर्व एवायमेवप्रकारो धर्मो मन्त्रेभ्य एव निर्वभावित्येतदनेन ख्यापितं भवति॥

"अङ्गादङ्गात् सम्भवसि"—इत्येतामृचं प्रवासादेत्य पुत्रस्य मूर्द्धनि जपन् जिघ्रति। अनुष्टुबेषा। स पुत्र उच्यते,— हे 'पुत्र!' 'अङ्गात् अङ्गात् सम्भवसि' एवं 'हृदयात्' च 'अधिजायसे' यत्तदुक्तम्—"अङ्गादङ्गात्सम्भृतस्य हृदयादधिजातस्य" —इति। तदनेनापि स्पष्टार्थतरेण मन्त्रेणोच्यत इति पूर्वस्यास्पष्टार्थतायां स्पष्टार्थीकरणार्थं मन्त्रः। तत्र हि 'ऋतस्य दीधितिं सपर्य्यन्'—इत्यत्र 'ऋतस्य'" प्रजननयज्ञस्य रेतसो वा" "विधानं" "अविशेषेणपूजयन्"—इत्युक्तम्, तत् पुनरेतदस्पष्टम्, इह पुनरङ्गादङ्गात् सम्भवसि हृदयादधिजायसे

इत्येवमुच्यते। तत्रैवं सति यथैव पुमान् अङ्गादङ्गात् सम्भवति हृदयाद्यधिजायते, तथैव दुहितापीत्यविशेष उपपद्यते। तस्मात् साधूक्तम्—"अविशेषेण मिथुनाः पुत्रा दायादा इति"। 'आत्मा वै पुत्रनामासि' यस्मादङ्गादङ्गात् सम्भूतस्त्वं हृदयादधिजातस्तस्मादात्मैव त्वं ममैवावयवभूत इत्यभिप्रायः। केवलं तु पुत्रनामा त्वम्, अहं पितृनामा, एतावानावयोर्विशेषो नाममात्रं भिन्नमित्यभिप्रायः। 'सः' त्वं 'जीव शरदः शतम्'—इत्याशीः। सर्वस्मिन्नपि संवत्सरे शरदि बहुजीवाः प्रचुररोगा भवन्ति, तस्माच्छरदः, तस्माच्छरदेवोपलक्ष्य सयत्सरशतमेतदायुराशास्यते॥

'अविशेषेण पुत्राणां दायो भवति धर्मतः मिथुनानाम्'। क एवमाह? 'मनुः' 'स्वायम्भुवः' स्वयम्भुवोऽपत्यं स्वायम्भुवः। कस्मिन् काले स एवमाह? 'विसर्गादौ' सृष्ट्यादावित्यर्थः। पूर्वमर्द्धं श्लोकस्य ऋच्चैव। एवमेताभ्यामृक्श्लोकाभ्यामुक्तमविशेषेण पुत्रस्य दुहितुश्च दायादत्वम्॥

"न दुहितर इत्येके" न दुहितरो दायमर्हन्तीत्येवमेके धर्मविदो मन्यन्ते। ब्राह्मणमपि चैतस्मिन्नर्थे दर्शयति,—"तस्मात् पुमान् दायादः, स्त्री अदायादा,—इति" "विज्ञायते" एतस्मिन् ब्राह्मणे विचार्यमाणे ज्ञायते, न दुहितरो दायमर्हन्ति, पुमानेवार्हतीति। "तस्मात् स्त्रियं जातां परास्यन्ति, न पुमांसमिति च"। एतदपरं दर्शनं दुहितुरदायादत्वं लिङ्गतो दर्शयति,—"अथ यत् स्थालीं परास्यन्ति हवनकर्मणो न तया जुह्वति, न

दारमय परास्यन्ति हवनकर्मण दारुमयेनैव जुह्वति, तस्मात् स्त्रिय जाता परास्यन्ति परस्मै प्रयच्छन्ति, न पुमासम्"। तस्मात् पुमानेव पैतृकस्य वित्तस्येष्टे, न दुहिता। किञ्च स्त्रीणा दान विक्रयातिसर्गा विद्यन्ते, न पुस। प्रदीयते हि परस्मै स्त्री, विक्रीयते च वैवाहिकेन शुल्केन। "विक्रयश्चायमपत्यस्य मतिमान् को न मस्यते। स-पो वाथ वहुर्वापि विक्रयस्तावदेव स॥' इति भगवता वासुदेवेनोक्त सुभद्राहरणे। तथा च ब्राह्मणमपि दर्शयति—"चातुर्मास्येष्वनृत वा एषा करोति, या पत्यु क्रीता सती अन्यथान्यैश्चरति" इति, तस्माच्छुल्केन प्रदान विक्रय कन्याया इत्युपपद्यते। अतिसर्ग परित्याग, परित्यज्यते हि कन्या स्वयम्भुवि, स्वयवरे योऽवलिम स गृह्णातु, यो वा तुभ्य रोचते त वृणीष्वेति। स एष क्षत्रियाणामेव स्वयवरधर्मो नेतरेषा वर्णानामिति, स पुनरयमितरेषामपि वर्णानामदायाद्यार्हत्वे कन्याया लिङ्ग भवति। तस्मात दायाद्यमर्हति कन्येति॥

"पुसोऽपीत्येके, शौन शेपे दर्शनात्। यदुक्त दानविक्रयातिसर्गैर्हेतुभिरदायादत्व स्त्रिया इति, अनेकान्त एव, पुसोऽपि दानविक्रयातिसर्गा विद्यन्त एव। पुत्रोऽपि हि परस्मै दीयते। एव ह्युक्तम्—"स्वतकीनकृत्रिमपौत्रऔरसा पुत्रा इति। तथा च "शौन शेपे दर्शनात् शौन शेपे आख्याने उपाख्यानाम्, भारते च शुन शेपस्य विक्रयो दृष्ट,—'विक्रीत मध्यम मन्ये' इत्येवमादि। तथा च परित्यागोऽपि दृष्ट,—यथा विश्वामित्रेण

मधुच्छन्द आदीनाम्। तस्मादनैकान्तिकत्वादेवैषा हेतूनामुभयो रपि दायाद्यत्वमित्येके मन्यन्ते॥

"अभ्रातृमतीवाद इत्यपरम्" आचार्य्यमतमिति वाक्यशेष। यैवाभ्रातृका भवति कन्या, सैव पित्र्य धनमर्हति, नेतरा सभ्रातृका पुत्रेषु हि पितु पिण्डदातृषु तिष्ठत्सु न स्त्री धनमर्हति, सा हि परकीय वश वर्द्धयति, न स्वम्, तस्मादसौ नार्थभागिनी। अभ्रातृकाया पुनरय विशेष,—अभ्रातृकाया पितुरन्य पुत्रो नास्तीति दौहित्र पिण्डदानादिषु कार्य्येष्ववतिष्ठते इति भवत्यर्थभागिनी अभ्रातृका दुहिता। तदुक्तम्,—'पितोत्सृजेत् पुत्रिकामनपत्योऽग्नि प्रजापति चेष्ट्वाऽस्मदर्थमपत्यमिति सवादाभिसन्धानमात्र पुत्रिका' इत्येकेषामिति॥

निगममप्येतस्मिन्नर्थे उदाहरन्ति—"अभ्रातर इव योषास्तिष्ठन्ति हतवर्त्मन"—इति। निगमस्य समासतोऽर्थमाह,—"अभ्रातृका इव योषास्तिष्ठन्ति सन्तानकर्मणे पिण्डदानाय हतव र्त्मान इति"। अस्यामृचि "अभ्रातृकाया" कन्याया "अनिर्वाह:" अनिर्वहण विवाहनिषेध इत्यर्थ। "औपमिक" उपमया दर्शित, अभ्रातर इवेति। "अमूर्या यन्ति जामय सर्वा लोहितवाससः। अभ्रातर इव योषास्तिष्ठन्ति हतवर्त्मन (अ० स० १, १७, १)॥" इयमथर्वणा प्रसवमार्गवहनरोगिणी या स्त्री भवति, तस्या तत्प्रति कारकर्मणि विनियुज्यते। 'अमूर्या' 'यन्ति' स्रवन्ति नाड्यो रक्त मज्जप्रमविरता स्त्रिय इवातिलोहितवस्त्रा 'सर्वा' एता तिष्ठन्तु उपरमन्तु हतलोहितवहनमार्गा, अस्य मन्त्रस्य वीर्य्येण। कथमु-

नस्तिष्ठन्तु ? 'अभ्रातर इव योषा' यथा काश्चिदभ्रातृका योषा हतभर्तृ वशमार्गास्तिष्ठन्ति सन्तानकर्मणि पिण्डदानाय, एवमेता नाड्य तिष्ठन्त्विति। एवमस्यामृचि अभ्रातृकाया अनिर्वाह उपमया लिङ्गतो दर्शित ॥

"तस्य" अनिर्वाहस्य "उत्तरा" ऋक् "भूयसे" बहुतराय "नि" निर्विचिस्य "वचनाय" ॥ ४ ॥

अभ्रातेव पुंस एति प्रतीची गर्त्तारुगिव सनये धनानाम्। जायेव पत्य उशती सुवासा उषा हस्रेव निरिणीते अप्सः ॥ अभ्रातृकेव पुंसः पितृनेत्यभिमुखी सन्तानकर्मणे पिण्डदानाय नयति गर्त्तारोहिणीव धनलाभाय दाक्षिणाजी गर्त्तः सभास्थाणुर्गृणातेः सत्यसङ्गरो भवति तं तत्र यापुत्रा यापतिका सारोहति तां तत्राक्षैराघ्नन्ति सा रिक्थं लभते श्मशानसञ्चयोऽपि गर्त्त उच्यते गुरतेरपगूर्णो भवति श्मशानं श्मशयनं श्मशरीरं शरीरं शृणातेः शम्नातेर्वा श्मश्रु लोम श्मनि श्रितं भवति लोम लुनातेर्वा लीयतेर्वा नोपरस्यानिष्कुर्याद्द्य यदुपरस्याविष्कुर्याद्गर्त्तेष्ठाः स्यात् प्रमायुको यजमान इत्यपि निगमो भवति। रथोऽपि गर्त्त उच्यते गृणातेः स्तुतिकर्मणः। स्तुततमं यानम्। आरोहथो वरुण

मित्र गर्त्तमित्यपि निगमो भवति। जायेव पत्ये कामयमाना सुवासा ऋतुकालेषूषा हसनेव दन्तान् विवृणुते रूपाणीति चतस्र उपमा नाभ्रात्रीमुपयच्छेत तोकं ह्यस्य तद्भवतीत्यभ्रातृकाया उपयमनप्रतिषेधः प्रत्यक्षः पितुश्च पुत्रभावः पिता यत्र दुहितुरप्रत्ताया रेतःसेकं प्रार्जयति सन्दधात्यात्मानं सङ्गमेन मनसेत्यर्थता जाम्या रिक्थप्रतिषेध उदाहरन्ति ज्येष्ठं पुत्रिकाया इत्येके ॥ ५ ॥

अभ्रातेव पुंस इति। दीर्घतम पुत्रस्य कक्षीवत आर्षम्। त्रिष्टुप्। औषसी। प्रातरनुवाकाश्विनयो शस्त्रे। 'अभ्रातेव पुंस' यथा अभ्रातृका कन्या दत्तापि सती पित्रा, स्त्रीकृतापि भर्त्रा, पुन 'प्रतीची' "पितॄन्" एव पितृवशमेव "अभिमुखी एति" "सन्तानकर्मणे पिण्डदानाय न पतिं" पतिवशमित्यर्थ। सा हि पितृवशं पुनः पौत्रैश्च वर्द्धयति, न भर्तृवंशमिति, तस्मादभ्रातृका पैतृकं दायाद्यमर्हतीत्युपपद्यते। "गर्त्तारुगिव सनये धनानाम्"। "गर्त्तारोहिणी इव" काचित् "दाक्षिणात्या स्त्री" सा यथा "गर्त्तं सभास्थाणु" तमारोहति 'सनये' लम्भये 'धनानाम्'। एवम् 'उषा' अपरकाले राज्या नभ आरोहति। किञ्च 'जायेव पत्य उशती सुवासा'। यथा जाया पत्ये भर्त्रे सुवासा भूत्वा ऋतुकाले आत्मानं दर्शयति एवमुषा आत्मानं दर्शयति जनानाम्। किञ्च 'उषा हस्रेवनिरिणीते अप्स'। यथा हसना हसनस्वभाव-

दन्तान् आत्मनो दर्शयति, एवमुषा अपि आत्मनोऽन्तर्भूतानि सर्वद्रव्याणां रूपाणि विवृणुते, शार्वरेण तमसा तिरोधानि सर्व द्रव्याणि प्रकाशोदकेन धौतानीव करोति ॥

"चतस्र" एता "उपमा" अस्यामृचि।—अभ्रातेव पुंस इत्येका। गर्त्तारोहिणीवेति द्वितीया। जायेव पत्य इति तृतीया। हस्रेवेति चतुर्थी। अत्र प्रथमोपमा अभ्रातेव पुंस इत्यनया अभ्रातृकाया अनिर्वाहो लिङ्ग्यते, यथा अभ्रातृका पितॄनेव प्रत्येति न पतिम्, एवमुषा आदित्यमेव प्रत्येति। एवमभ्रातृका कन्या यस्मिन्नेव वशे उत्पन्ना भवति, तमेव प्रकाशयति वर्द्धयति, न भर्त्तृवशम्। इत्येवमुपमया नासौ वोढव्येतदुपदर्शितं भवति, पुत्रार्थत्वाद् विवाहस्य। तस्मादवर्द्धयितृत्वाद् भर्त्तृवशस्य, वर्द्धयितृत्वाच्च पितृवशस्य, अभ्रातृका पितृदायाद्यमर्हतीत्युपपद्यते ॥

निगमप्रसक्तस्य तत्त्वमाचष्टे,—"गर्त्तः सभास्थाणुः" इति, अक्षनिर्वपणपीठमित्यर्थः। "गृणातेः (क्र्या० प०)" स हि "सत्यसङ्गरो भवति" सङ्गीर्यते हि तत्र सत्यमिदमत्र पतितं मिदमत्र न पतितमित्येव प्रायेण कितवास्तत्रानृतं ब्रुवते। "तम्" एवंलक्षणं गर्त्तमारोहति या स्त्री, सा गर्त्तारुगित्युच्यते। तदेतद्गर्त्तस्य सभास्थाणोरारोहणं रिक्थलाभहेतुर्दाक्षिणात्येषु अपुत्राया अपतिकायाः स्त्रियाः प्रसिद्धम्। तयैव प्रसिद्धया निरुच्यते। देशसमाचारव्यवस्थयापि कश्चिन्मन्त्रार्थो निर्वक्तव्य इत्येतदनेन प्रदर्शितं भवति। "तत्र या अपुत्रा अपतिका सा आरोहति" तं सभास्थाणुम्, तत्र कितवमध्ये अवस्थितं या

अपुत्रा स्त्री, या अपतिका, सा आरोहति तस्मिन् प्रविशतीत्यर्थः। ततः "सा" भर्त्तृबन्धुभ्यः सकाशात् "रिक्थं लभते" यस्तस्या भर्त्तृसक्तो धनांशस्तम्। एवमसौ सनये लब्धये धनानां गर्त्तमारोहति।

गर्त्तप्रसक्तमुच्यते,—"श्मशानसञ्चयोऽपि गर्त्त उच्यते"। "गुरतेः (तु० आ०)" उद्यमनार्थस्य। स हि लोकविनाशायाभ्युद्यत इव भवति। यानि हि तत्र पिशाचादीनि सत्त्वान्याश्रितानि भवन्ति। तानि जनमरणमाशासते, म्रियमाणेषु जनेषु तानि प्रमुदितानि भवन्ति। "श्मशानं, श्मशयनम्" इत्याख्यानप्रसक्तमुच्यते। तत्र हि श्म शेतेऽत्रेति श्मशयनं सत् तत् श्मशानमित्युच्यते। श्मशब्दार्थमाह,—"श्म शरीरम्" इति। तद्धि तत्र शेते, तत्र हि तन्निक्षिप्यते मृतस्य सतः। "शृणातेर्वा" कृतव्याख्यानमपि पुनराह मुख्यत्वादस्य। तत्र औपमिकं वृत्रसम्बन्धात्, न हि वृत्रस्य मुख्यं शरीरम्। श्मशब्दप्रसक्तं निराह, —श्मश्रु लोम" इति, तद्धि "श्मनि" शरीरे "श्रितं भवति"। पर्य्यायप्रसक्तं निराह,—"लोम लुनातेः (क्र्या० उ०)" तद्धि लूयते।—"लीयतेर्वा (दि० आ०)" तद्धि शरीरे लीयते॥

तत्र निगममपि चोदाहरन्ति,—श्मशानसञ्चयोऽपि गर्त्त इति "नोपरस्याविष्कुर्य्याद् यदुपरस्याविष्कुर्य्याद् गर्त्तेष्ठाः स्यात् प्रमायुको यजमानः" इति। उपर इति यूपस्यात्यप्रदेश उच्यते, "पश्चिममागोऽपरा यूपाः"—इति ह्युक्तम्। तदत्र यूपस्य नाविष्कुर्य्यादित्यर्थः। पांशुभिस्तदवच्छादनीयं बर्हिषा च। यदि

पुनरुपरस्य कञ्चिदप्यवयवमाविष्कुर्य्यात् 'गर्त्तेष्ठाः, गर्त्तप्रतिष्ठः श्मशानप्रतिष्ठः, 'प्रमायुकः' प्रमरणधर्मायुरेव यथाविहितादायुषो यजमानः स्यात्। "इत्यपि निगमो भवति" अप्ययमप्यन्ये वहव इत्यपिशब्दः॥

"रथोऽपि गर्त्त उच्यते"। "गृणाते." स्तुत्यर्थस्य। तद्धि "स्तुततमं यानम्" अश्वादिभ्यो यानेभ्यः सुखतरं हि तेन गम्यते। रथोऽपि गर्त्त इत्यस्मिन्नर्थे "आरोहथो वरुण मित्र गर्त्तमित्यपि निगमो भवति"। "हिरण्यरूपमुषसो व्युष्टावयःस्थूणमुदिता सूर्यस्य। आ रोहथो वरुण मित्र गर्त्त मतश्चक्षाथे अदितिं दितिं च॥"—इति (ऋ० सं० ४, ३, ३१, ३)। श्रुतविदात्रेय एतया त्रिष्टुभा मित्रावरुणावस्तौत्। राजसूयेऽभिषेचनीयो नाम क्रतुः, स तत्र यजमानस्य रथमारुरुक्षतः गृहीतेषुधनुष्कौ बाहू अनया अभिमन्त्र्येते। तावेवात्र मित्रवरुणावधिदैवताभिप्रायेण। एवं ह्याह,—मित्रोऽसीतीयमभिमन्त्रयति मित्रस्य ह्येतद्रूपम्, वरुणोऽसीतीमं वरुणस्यै तद्रूपमिति, तावुच्येते। हे 'मित्र! वरुण!' 'हिरण्यवर्णम्' 'उषसो व्युष्टौ' उषसो व्युच्छेदनकाले 'उदिता' च उदयकाले 'सूर्यस्य' यौ युवामेतस्मिन् काले एवंरूपम् 'अयःस्थूणम्, अयोमयं गर्त्तं स्थूणं स्वं 'गर्त्तं' रथम् 'आरोहथः' तौ युवां ब्रवीमि ममाप्येवं रथं गर्त्तमेतस्मिन् विधावङ्गभूतं तत्स्वरूपमेव साम्प्रतमारोहतम्, 'अतः' एनमारुह्य 'चक्षाथे' कुरुतमित्यर्थः। 'अदितिं दितिञ्च' अदीनमनुपक्षीणमात्मपक्षं दीनञ्चोपक्षीणमभिन्नपक्षमित्यर्थः॥

"गर्त्तः सभास्थाणुः"—इत्यत आरम्य प्रसकानुप्रसक्तमुक्तम् ॥

"जायेव पत्य उशती सुवासा उषा हस्रेव निरिणीते अप्सः" —इति। अयमप्यर्द्धर्चः पूर्वमेव व्याख्यातो भाष्यकारव्याख्यानुक्रमं भित्त्वा अस्माभिः, तथाह्यृग्वाक्यस्याप्यैकवाक्यता न विच्छिन्ना भवेदिति ॥

"चतस्र उपमाः"—इति यदुक्तं भाष्यकारेण, तदपि परिसंख्याय ताः उपपादिताः अस्माभिः। एवम् "अभ्रातेव पुंस एति प्रतीची"—इत्यनेन पादेनास्यामृचि अनिर्वाहो दर्शितः ॥

अन्यत्रापि चोक्तम्,—"नाभ्रातृकामुपयच्छेत तोकं ह्यस्य तद् भवति—इति"। अयमस्मिन् वाक्ये 'नाभ्रातृकामुपयच्छेत'—इति प्रत्यक्ष एवोपयमनप्रतिषेधो विवाहार्थे पाणिग्रहणप्रतिषेध इत्यर्थः। पूर्वयोर्हि मन्त्रयोरुपमया लिङ्गतो विवाहप्रतिषेधो दर्शित', एतस्मिंस्तु वाक्ये साक्षादेव प्रतिषेधः आहत्य विधानेनैव नाभ्रातृकामुपयच्छेतेति। अत इदमुक्तम्,—"उपयमनप्रतिषेधः प्रत्यक्षः"—इति ॥

आह,—किमुपयमनप्रतिषेध एव? नेत्युच्यते,—"पितुश्च पुत्रभाव" प्रत्यक्षः श्रूयते। कथम्? "तोकं ह्यस्य तद् भवति" —इति। तोकमित्यपत्यनाम। यदपत्यमभ्रातृकायाः पितु र्भवति, नेतरस्य वोढुः, इत्येवमितरस्य विवाहप्रतिषेध एव नेत्युच्यते पुत्रभावादितरस्य च पुत्रिकापितुरपत्यप्राप्तिरिति। तस्मादुपपन्नं भवति,—यैवाभ्रातृमती, सैव पैतृकं धनमर्हति नेतरेति ॥

अधुना योऽसौ शासद्वह्निरित्यस्या ऋच उत्तरोऽर्द्धर्च उत्सृष्ट, स एवाभ्रातृकावादपक्षेणैव निरुच्यते। पूर्वोऽपि च शासद्वह्निरित्ययमभ्रातृमतीवादपक्षेणैव योजयितव्य। एष एव हि स्थित पक्ष। तस्या एव ह्यभ्रातृमत्या य पुत्रो भवति, तमेव पुत्रिकाविधानेन कृताभिसन्धित्वात् पौत्रो ममायमिति अपुत्र सन् मातामह उपगच्छति नेतरान् भ्रातृमतीपुत्रान्, अन्यथा सर्व एव हि वोढारो अपुत्रा स्यु, ततो विवाहपरिश्रमो व्यर्थ एव स्यात्। अथवा सर्व एव लोको द्व्यामुष्यायण एव स्यात्। किञ्च पुत्रिकापितुरपि या भार्या सान्यस्य दुहितेति तस्यामपि या जायते सा मातामहस्यैव नेतरस्य पुत्रिकापितु स्यात्। अनिष्टं चैतत् सर्वेषाम्। तस्माद् येयाभिसन्धिपूर्वं धर्मेण पुत्रिका क्रियते तस्या एव पुत्रो मातामहस्य भवति न सर्वस्या इति सैव च दायादादा, भ्रातृमती। अत इदमुच्यते,—"पिता यत्र दुहितु" इति। 'पिता' 'यत्र' यस्मिन् काले 'दुहितु' "अप्रत्तायाः" प्राक् प्रदानादित्यर्थ। "रेत सेक" रेतस सेकार यो दुहितरि रेत सिञ्चति स जामाता "प्राञ्जयति" प्रसाधयति, प्रकल्पयति, उपपर्णयतीत्यर्थ। तदा किं स दुहितु दत्त कि करोति? "सशग्म्येन मनसा दधन्वे" "सन्दधाति" अभि सन्दधाति "आत्मानम्" सदृशापत्यमुत्पादयन् तत्समेति। कथमनुमतिसन्धारयामासमिति 'सशग्म्येन' "मनसा सङ्गमेन" मनसा विगतपुत्रपरितापेन मनसा—मदपुत्र इयमेव पुत्रिका मम पुत्र यो ह्यस्यामुत्पत्स्यते, स पौत्रो मम भविष्यति

इत्येवं सुखेन मनसा सन्दधात्यात्मानं तस्यां पुत्रिकायाम्। तत्रैवं सति यस्तस्यामेव कृतपुत्रिकाधर्मिण्यामुत्पद्यते दौहित्रः, तमेव नता ममायमित्येवमुपगच्छति मातामहः, न सर्वानेव दौहित्रान्, भ्रातृमत्या अपि स तस्या एव पुत्री मातामहस्य भवति, न सर्वस्याः, इति सैव च दायाद्यार्हा, नेतरा। स एव च मुख्यया वृत्त्या मातामहस्यैव पौत्रो भवति, नेतरे भ्रातृमतीपुत्राः। ते हि गौण्या वृत्त्या जनयितुः पितुः पुत्राः सन्तो मातामहस्य पौत्रा इत्युच्यन्ते कदाचिल्लोके शास्त्रे वा॥

तत्रैवं सति "अङ्गादङ्गात् सम्भवति" "आत्मा वै पुत्रनामासि" इत्येवमादिषु गौणं दुहितुः पुत्रत्वमुच्यते। किञ्च, यदि दुहिता पुत्रेण अविशिष्टा एव स्यात्, ततो दुहितेति विशेषसमाख्या नैव स्यात्, अस्ति चेयम्। यस्माद् विशिष्टतरः पुत्रो दुहितुः सकाशादित्युपपद्यते॥

यदपि चोक्तम्,—"अविशेषेण पुत्राणां दायो भवति"—इति, तदप्यभ्रातृमतीपक्षे द्रष्टव्यम्। अथवा वेदस्मृत्योर्विरोधे वेददृष्ट एव धर्मो ज्यायान्, न स्मृतिदृष्टः।

तस्मिंश्च वेदे "अथैतां जाम्या रिक्थप्रतिषेध उदाहरन्ति" धर्मविदः,—येयमृग् वक्ष्यमाणा (६ ख०) "न जामये तान्वः"—इति। अथशब्दो विशेषाधिकारार्थः। "ज्येष्ठं पुत्रिकाया इत्येके"—इति। यदा उत्सृष्टायां पुत्रिकापितुरन्ये पुत्रा जायेरन्, तदा विभागकाले ज्येष्ठं भागं पुत्रिकायै च दद्यात्, यथाभागमितरान् पुत्रान् विभजेत्, अभागा एव त्वितरा दुहितर

इति। तदेतदनयर्चा निरुच्यते यथा दुहितॄणां भागो नास्तीति—॥ ५॥

न जामये तान्वो रिक्थमारैक् चकार गर्भं सनितुर्निधानम्। यदी मातरो जनयन्त वह्निमन्यः कर्त्ता सुकृतोरन्य ऋन्धन्॥ न जामये भगिन्यै जामिरन्येऽस्यां जनयन्ति जामपत्यं जमतेर्वा स्याद्गतिकर्मणो निर्गमनप्राया भवति। तान्व आत्मजः पुत्रो रिक्थं प्रारिचत् प्रादाच्चकारैनां गर्भनिधानीं सनितुर्हस्तग्राहस्य। यदी मातरोऽजनयन्त वह्निम्। पुत्रमवह्निं च स्त्रियमन्यतरः सन्तानकर्त्ता भवति पुमान् दायादोऽन्यतरोऽर्द्धयित्वा जामिः प्रदीयते परस्मै॥ ६॥

इति तृतीयाध्यायस्य प्रथमः पादः॥ ३, १॥

न जामये इति। "न 'जामये' भगिन्यै" "तान्व आत्मज" आत्मनो धियो जात। स आत्मज किं करोति? इति, 'रिक्थम् आरैक्'। 'रिक्थं' पैतृकं धन 'न' "प्रादात्" न प्रददौ। किन्तर्हि तस्या करोति? इति। उच्यते,—'चकार गर्भं सनितुर्निधानम्। "सनितु हस्तग्राहस्य" भगिनीभर्तुं प्रसव समर्था करोति, पुत्रार्तान्यर्थं। किञ्च, 'यदी मातर.' यत् पुत्रद्वयं मातरो जनयन्ति, "वह्नि" न वोढारं "पुत्रम्" "अवह्नि च"

"अवोढ्रीं स्त्रियम्, द्वयोर्द्वयोरपि वोढ्वोढ्र्योः पुत्रयोः "अन्यतरः" एकतरः 'कर्त्ता' "सन्तानकर्त्ता भवति"। कतमः ? यः "पुमान्" स एव "दायादः" दायाद्यार्हः, नेतरः कन्याख्यः। किञ्च, तयोरुभयोरपि 'सुकृतोः' सुकृतयः' सुतरामेकेनापि प्रयत्नेन कृतयोरुत्पादितयोः 'अन्य अन्धन्, "अन्यतरोऽर्द्धयित्वा" सुकृतोऽपि सन् "जामिः" जाम्याख्यो भगिन्याख्यः "प्रदीयते परस्मै" न कस्याञ्चिदप्यवस्थायामसावात्मीयो भवतीत्यभिप्रायः॥ एवमस्यामृचि 'न जामये तान्वो रिक्थमारैक्' इति न दुहितरो रिक्थभागिन्यो भवन्ति, नैताः सन्तानकर्मणि पितुरुपतिष्ठन्ते, वर्द्धयित्वा ह्येताः परस्मै दीयन्ते, तस्मादभागा एता इति॥

यत् पुनरुक्तं पुंसोऽपि दानातिसर्गविक्रया विद्यन्त इति, तत् कदाचित् केनचिन्निमित्तेन भवति, स्त्री तु निसर्गेणैव दीयते विक्रीयते विसृज्यते वा, सा हि परार्थमेवोत्पद्यते, तस्मादभागा इति॥६॥

इति निरुक्तवृत्तौ अष्टमाध्यायस्य (तृतीयाध्यायस्य)

प्रथमः पादः॥३, १॥

—०—

द्वितीयः पादः ।

मनुष्यनामान्युत्तराणि पञ्चविंशतिर्मनुष्याः कस्मात्वा-कर्माणि सीव्यन्ति मनस्यमानेन सृष्टा मनस्यतिः पुनर्मन-स्वीभावे मनोरपत्यं मनुषो वा । तत्र पञ्चजना इत्येतस्य निगमा भवन्ति ॥ १ ॥

प्रसक्तानुप्रसक्तमुक्तम्, तद्यथा—'जनयितुः प्रजा.' इत्येवमादि, प्रकृतमिदानीमुच्यते,—

"मनुष्यनामान्युत्तराणि पञ्चविंशति" । मनुष्याणां नामानि 'मनुष्यनामानि' 'उत्तराणि' प्रकृतेभ्योऽपत्यनामभ्यः, अपत्यान्येव हि विवृद्धानि सन्ति मनुष्या इत्युच्यन्ते । कियन्ति पुनस्तानि ? 'पञ्चविंशतिः' पञ्च च विंशतिश्च पञ्चविंशतिः (२५) । कतमानि पुनस्तानि ? "मनुष्याः, नराः"—इत्येवमादीनि ॥

आह,—"मनुष्या. कस्मात्" ? उच्यते,—"मत्वा" ज्ञात्वा, तत एते "कर्माणि" "सीव्यन्ति" तक्षन्तीत्यर्थः । अथवा "मनस्य-मानेन" प्रजापतिना "सृष्टा." । "मनस्यतिः पुनः" अयं धातुः "मनस्वीभावे" । मनस्वीभावो नाम प्रहृष्टेन प्रहृष्यता प्रजापति-नैते सृष्टाः । अथवा "मनोरपत्यं" मनुष्याः "मनुषो वा" ॥

"तत्र पञ्चजना इत्येतस्य निगमा भवन्ति" सन्दिग्धाः, तत्रेयमृगुदाहरणम् । तद्यथा,—॥ १ ॥

तदद्य वाचः प्रथमं मंसीय येनासुराँ अभिदेवा असाम। ऊर्जाद उत यज्ञियासः पञ्चजना मम होत्रं जुपध्वम् ॥ तदद्य वाचः परमं मंसीय येनासुरानभिभवेम देवा असुरा असुरता स्थानेष्वस्ता स्थानेभ्य इति वापि वासुरिति प्राणनामास्तः शरीरे भवति तेन तद्वन्तः सोऽदेवानसृजत तत् सुराणां सुरत्वमसोरसुरानसृजत तदसुराणामसुरत्वमिति विज्ञायते। ऊर्जाद उत यज्ञियासः। अन्नादाश्च यज्ञियाश्चोर्गित्यन्नानामोर्जयतीति सतः पक्वं सुप्रवृक्णमिति वा। पञ्चजना मम होत्रं जुपध्वं गन्धर्वाः पितरो देवा असुरा रक्षांसीत्येके। चत्वारो वर्णा निषादः पञ्चम इत्यौपमन्यवो निषादः कस्मान्निषणमस्मिन् पापकमिति नैरुक्ताः यत् पाञ्चजन्यया विशा। पञ्चजनीनया विशा पञ्च पृक्ता सङ्ख्या स्त्रीपुन्नपुंसकेष्वविशिष्टा बाहुनामान्युत्तराणि द्वादश बाहू कस्मात् प्रबाधत आभ्यां कर्माण्यङ्गुलिनामान्युत्तराणि द्वाविंशतिरङ्गुलयः कस्मादग्रगामिन्यो भवन्तीति वाग्रगालिन्यो भवन्तीति वाग्रकारिण्यो भवन्तीति वाङ्कना भवन्तीति वाञ्चना भवन्तीति वापिवाभ्यञ्चाना देव स्युस्तासामेषा भवति ॥ २ ॥

"तदद्य वाच०—०जुषध्वम्" (ऋ० स० ८, १, १३, ४)। सौचीकस्याग्नेरार्षम्। तस्य विश्वैर्देवै सह सवाद । तत्रैव होतृजपे विनियुक्ता। "तत्" वीर्यं "वाच" "परमम्" उत्कृष्टम् अहम् "अद्य" "मसीय" मन्ये जाने इत्यर्थ । तेन वीर्येण किम् ? इति। "येन असुरान् अभिभवेम" वयम्। 'ऊर्जाद' अन्नभक्षयितार । अपिच हे 'यज्ञियास' यज्ञसम्पादिन 'देवा' यूयम्। अपिच हे 'पञ्चजना मनुष्या' निषादपञ्चमा वर्णा' 'मम' इद 'होत्र' 'जुषध्वम्' अनुगृह्य(ह्णी) ध्वम्॥ इति समस्तार्थ॥

अथैकपदनिरुक्तम्।—'असुरा असुरता स्थानेषु" ते हि न सुष्ठुरता स्थानेषु चपला इत्यर्थ । अथ "वा "अस्ता स्थानेभ्य इति' प्रच्याविता देवैरित्यर्थ । "अपि वा असुरिति प्राणनाम । स हि "अस्त क्षिप्त इव "शरीरे भवति' तस्य हि तत्र नित्यमवस्थानमित्यभिप्राय । 'तेन हि "तद्वन्त' भवन्ति। रो मत्वर्थे । अथवा इदमन्यद् ब्राह्मणोक्त निर्वचन स्यात् "सोर्देवानसृजत" सुरिति प्रशस्तनाम। प्रशस्तादात्मन प्रदेशात् प्रजापति सुरानसृजत्, ऊर्ध्वेभ्य प्राणेभ्य । तदुक्तम्,—'ऊर्ध्वमुदगणन् पूर्वपक्ष पञ्चदश, ते न "सोर्देवानसृजत तत् सुराणा सुरत्वम्' —इति विज्ञायते। एवमेव प्रातिलोम्येन "असोरसुरानसृजत"। असुरिति प्रशस्तप्रतिषेध । अप्रशस्तादात्मन प्रदेशात् प्रजापतिरसुरानसृजत। तदुक्तम्,—'अर्वाद् वा तिर्यक् परपक्ष, तेन असुरानसृजत'—इति। "ऊर्जाद उत यज्ञियास, अन्नादाश्च यज्ञियाश्च"। "ऊर्गित्यन्ननाम" तद्धि "ऊर्जयति"

वलिष्ठं करोतीत्यर्थः। अथ "वा" "पक्रम्" एतत् "सुप्रवृकणम्" भवति "इति" ककाररेफसामान्यात् पचेर्व्रश्चतेर्वा स्यात्। द्वयोरपि वा तद्धि पक्वं सन्मृदुत्वात् सुच्छेद्यं भवति॥

"पञ्चजना मम होत्रं जुषध्वम्"। एतदत्र सन्देहपदमेकमुद्धृत्य प्रदर्शितम्। "गन्धर्वाः पितरो देवा असुरा रक्षांसीत्येके" मन्यन्ते। "चत्वारो वर्णाः, निषादः पञ्चमः,—इत्यौपमन्यवः"। निषद्य हन्तीति निषादः प्राणिवधजीवनः। अथवा "निषण्णमस्मिन् पापकमिति" निषादः सौधन्वना इत्येके मन्यन्ते। स च रथकारः। "रथं ये चक्रुः सुवृतं सुचेतसोऽविह्वरन्तं मनसस्परि ध्यया। ताँ ऊन्वस्य सवनस्य पीतय आ वो वाजा ऋभवो वेदयामसि॥"—इति (ऋ० सं० ३, ७, ७, ३)। तस्य भिन्नकालमाधानं श्रूयते,—"वर्षासु रथकारः"। "ऋभूणां त्वा इति रथकारस्य" इति च मन्त्रभेदः,—""सौधन्वना ऋभवः (ऋ० सं० १, ७, ३०, ४)"—इति च मन्त्रलिङ्गात्॥

यथा तु पञ्चजनशब्देन मनुष्या एव निषादपञ्चमा वर्णा उच्यन्ते, तथैव निराह,—"यत्पाञ्चजन्यया विशेन्द्रे घोषा असृक्षत। अस्तृणाद्बर्हणा विपोऽर्यो मानस्य स क्षयः॥"—इति (ऋ० सं० ६, ४, ४३, १)। प्रगाथेन दृष्टा। इयमनुष्टुप्। ऐन्द्री। पृष्ठस्य पञ्चमेऽहनि मरुत्वतीयशस्त्रस्य प्रतिपद्देया। 'यत्' यदा "पञ्चजनीनया विशा" पञ्चजनसमुदायलक्षणया सहितैः स्तोतृभिः ऋत्विग्भिः अवर्यति 'इन्द्रे' वर्षार्थिभिः 'घोषाः' स्तुतीः 'असृक्षत' असृज्यन्त। निषादपञ्चमा वर्णा आर्त्ताः

सन्तो वर्षाभावे अस्तुवतैव इन्द्रम्—'वर्ष भगवन्!'—इत्येवमर्थयन्तः। अत इदमुक्तम्,—यदा पाञ्चजन्यया विशा सह घोषा ऋत्विग्भिः असृज्यन्तेति। तदा किम्? इति। तदा उपश्रुत्य स इन्द्रः ताभिः प्रह्लादितचेताः 'अस्तृणात्' अहन् वर्षार्थं मेघान्। 'बर्हणा' परिवृद्धेन वध्रेण, परिवृद्धानि वा मेघजालानि 'विपः' विपाट्, पिता मेघानां मेधावी वा 'अर्य्यः' ईश्वरः कृत्स्नस्य जगतः। कस्मात् पुनरस्तृणात्? यस्मात् 'मानस्य स क्षयः' मानस्य दर्पस्य बलस्य वीर्य्यस्य स क्षयः निवासः, तस्मात् अस्तृणात्। अर्वाच्यौ हि स्तूयमानः किं कुर्य्यात् परितुष्टोऽपि? अथवा मानस्य सत्कारस्य पूजायाः स इन्द्रः क्षयो निवासो भाजनमिति मत्वाऽतैः स्तोतृभिः वर्षार्थिभिः सत्कृतः, तान् वर्षप्रदानेन प्रतिसत्कारयिष्यन् अस्तृणात् मेघान्। अपि वा अस्य जगन्निर्माणस्य द्वैवादेः स्थावरान्तस्य स इन्द्रः क्षयो निवास आश्रयो यस्मात् ततो मेघानस्तृणात्। अनावृष्टिद्वारेणास्य जगतः विनाशो मा भूत् कथञ्चनेत्यभिप्रायः॥

"पञ्च पृक्ता सङ्ख्या"। सा हि "स्त्रीपुन्नपुंसकेष्वविशिष्टा" एव भवति। तद्यथा—पञ्च स्त्रियः, पञ्च पुरुषाः, पञ्च कुलानि इति। एव पञ्चशब्दे स्त्रीपुन्नपुंसकेषु विशेषो नास्ति॥

"बाहुनामान्युत्तराणि द्वादश"। बाह्वोर्नामानि 'बाहुनामानि' 'उत्तराणि' प्रकृतेभ्यो मनुष्यनामभ्यः। मनुष्याणामेव हि भवन्तीति मनुष्यनामभ्य उत्तराणि 'बाहुनामानि'। कियन्ति पुनस्तानि? 'द्वादश' द्वे च दश च द्वादश। कतमानि पुनस्तानि?

"आयती, च्यवाना अभीशू"—इत्येवमादीनि। आमिश्रीभवतः कर्मभिरेताविति आयती। च्यावयितारौ कर्मणां च्यवाना। अभीशू अभ्यश्नुवाते कर्माणि। इत्येवमादि योज्यम्॥

आह,—"बाहू कस्मात्"? उच्यते,—"प्रबाधत आभ्यां कर्माणि" प्रकर्षेण बाधते प्रक्षिपयत्याभ्यां कर्माणि॥

"अङ्गुलिनामान्युत्तराणि द्वाविंशतिः"। अङ्गुलीनां नामानि 'अङ्गुलिनामानि' 'उत्तराणि' प्रकृतेभ्यो बाहुनामभ्यः, बाह्वोरेव ह्यङ्गुलयो भवन्तीति बाहुनामभ्य उत्तराणि अङ्गुलिनामानि। कियन्ति पुनस्तानि? 'द्वाविंशतिः' द्वे च विंशतिश्च द्वाविंशतिः। कतमानि पुनस्तानि? "अग्रुवः, अण्व्यः क्षिपः"—इत्येवमादीनि। बाह्वग्रे अवस्थिता अवन्त्येताः कर्माणीति अग्रुवः। अण्व्यः परिमाणात् एताः। क्षिप्यते आभिः क्षेतव्यं द्रव्यमिति क्षिप। इत्येवमादि।

आह,—"अङ्गुलयः कस्मात्"? उच्यते,—"अग्रगामिन्यो भवन्ति" अग्रे ह्येताः कर्मसु गच्छन्ति। अथ"वा" "अग्रगामिन्यो भवन्ति" अग्रे ह्येता गलन्ति उदकानि। "अग्रकारिण्यो वा भवन्ति" अग्रे ह्येताः कर्माणि कुर्वन्ति। "अङ्कना भवन्ति वा" तथाहि,—यो ह्येताभिरभिहन्यतेऽसावङ्कित इव भवति। "अपि वा अभ्यञ्चनादेव स्युः" एता हि त तमर्थमाभिमुख्येनाञ्चन्ति गच्छन्ति। ये तु "अभ्यञ्जनाः"—इत्यभिधीयन्ते, तेषामभ्यज्यत आभिरिति॥

"तासाम्" अङ्गुलीनाम् "एषा" निर्वाचिका ऋक् "भवति" —॥२॥

दशावनिभ्यो दशकक्ष्येभ्यो दशयोक्त्रेभ्यो दशयोजनेभ्यः। दशाभीशुभ्यो अर्चताजरेभ्यो दश धुरो दश युक्ता वहद्भ्यः॥ अवनयोऽङ्गुलयो भवन्त्यवन्ति कर्माणि कक्ष्याः प्रकाशयन्ति कर्माणि योक्त्राणि योजनानीति व्याख्यातमभीशवोऽभ्यश्नुवते कर्माणि। दश धुरो दश युक्ता वहद्भ्यः। धूर्धूर्वतेर्वधकर्मण इयमपीतरा धूरेतस्मादेव विहन्ति वहं धारयतेर्वा कान्तिकर्माण उत्तरे धातवोऽष्टादशान्ननामान्युत्तराण्यष्टाविंशतिरन्नं कस्मादानतम्भूतेभ्योऽत्तेर्वात्तिकर्माण उत्तरे धातवो दश। बलनामान्युत्तराण्यष्टाविंशतिर्बलं कस्माद्बलं भरं भवति बिभर्तेर्धननामान्युत्तराण्यष्टाविंशतिरेव धनं कस्माद्धिनोतीति मतो गोनामान्युत्तराणि नव क्रुध्यतिकर्माण उत्तरे धातवो दश क्रोधनामान्युत्तराण्येकादश गतिकर्माण उत्तरे धातवो द्वाविंशशतं क्षिप्रनामान्युत्तराणि षड्विंशतिः क्षिप्रं कस्मात् सङ्क्षिप्तो विकर्षोऽन्तिकनामान्युत्तराण्येकादशान्तिकं कस्मादानीतं भवति सङ्ग्रामनामान्युत्तराणि षट्चत्वारिंशत् सङ्ग्रामः कस्मात् सङ्गमनाद्वा संगतौ ग्रामाविति वा तत्र खल इत्येतस्य निगमा भवन्ति॥ ३॥

दशावनिभ्य इति। अवनय इत्येवदादीनि नद्यादिनामभिः सन्दिह्यन्ते, तदर्थमिदमुदाह्रियते। त्रिष्टुप्छन्दः। अर्बुदस्य काद्रवेयस्य सर्पस्यार्षम्। ग्रावस्तुतौ विनियुक्ता। दशभिरवनिभिः ये उपचर्य्यन्त ग्रावाणः, सोमाभिषवकर्मणि प्रवृत्ते, ते दश अवनयः, तेभ्यः 'दशावनिभ्यः' हे ऋत्विजः! यूयमपि 'अर्चत' स्तुतीः प्रोच्चारयतेत्यर्थः। एवमेव दशभिः कक्ष्याभिर्ये उपचर्य्यन्ते, ते दशकक्ष्याः, तेभ्यः 'दशकक्ष्येभ्यः' अर्चत। दशभिर्योक्त्रैः ये उपचर्य्यन्ते, ते दशयोक्त्राः, तेभ्यः 'दशयोक्त्रेभ्यः' अर्चत। दशभिर्योजनैः ये उपचर्य्यन्ते, ते दशयोजनाः, तेभ्यः 'दशयोजनेभ्यः' अर्चत। दशभिरभीशुभिर्ये उपचर्य्यन्ते, ते दशाभीशवः, तेभ्यः 'दशाभीशुभ्यः' अर्चत। 'अजरेभ्यः' अजरणधर्मभ्यः 'दश धुरः' य एते ग्रावाणः तेभ्यः अर्चत। दशभिर्दशभिरङ्गुलीभिर्य एते युक्ता वहन्ति ग्रावाणः, तेभ्य एभ्यः 'दश युक्ता वहद्भ्यः' अर्चत॥ इति समस्तार्थः॥

अथैकपदनिरुक्तम्।—"अवनयोऽङ्गुलयो भवन्ति" ता हि "अवन्ति कर्माणि" रक्षन्ति भक्षयन्ति वा क्षिपयन्तीत्यर्थः। "कक्ष्याः" अङ्गुलय एव, ता हि "प्रकाशयन्ति कर्माणि" प्रकटीकुर्वन्तीत्यर्थः। "योक्त्राणि"—इत्येतत् पदं "योजनानि इति" अनेन पदेन व्याख्यातम्। योजनानीत्येतत् निगदसिद्धमेव। "अभीशवः" अपि अङ्गुलय एव, ता हि "अभ्यश्नुवते कर्माणि" व्याप्नुवन्तीत्यर्थः। अनेकैर्नामभिरङ्गुलय एवोक्ता, अनेकक्रियायोगिनीभिरङ्गुलीभिर्गृहीतास्तदर्थमर्चतेति। "धूः धूर्वतेः वध-

कर्मण" ध्वरति धूर्वतीति वधकर्मसु पठितम्। "इयमपीतरा धूः" अनडुहादिसम्बन्धिनी। "एतस्मादेव" धातो वधकर्मण। सापि "विहन्ति वहम्" अनडुहोऽश्वस्य वा। "धारयतेर्वा" सा हि धारयत्यश्वमनड्वाहञ्च ॥

"कान्तिकर्माण उत्तरे धातवोऽष्टादश"। खल्वय पुरुषो व्याख्यात सर्वाङ्ग साङ्गुल', त खलु काम एव प्रथममाविरेशेति उत्तरे कान्त्यर्था इत्यर्थ। यद्यपि ह्याकान्त भवति, तदप्यङ्गुली भिरेव कान्तं नियत इत्यतोऽङ्गुलिनामभ्य 'उत्तरे कान्ति कर्माण' समाम्नाता। कियन्त पुनस्ते ? इति। 'अष्टादश' अष्टौ च दश च अष्टादश (१८)। कतमे पुनस्ते ? इति। "वश्मि, उश्मसि, अववेति"—इत्येवमादय ॥

"अन्ननामान्युत्तराणि अष्टाविंशति"। अन्नस्य नामानि 'अन्ननामानि' 'उत्तराणि' प्रकृतेभ्य कान्तिकर्मभ्य, अन्नमेव हि कान्त सर्वभावेभ्यो भवतीति कान्तिकर्मभ्य उत्तराणि अन्नना मानि। कियन्ति पुनस्तानि ? 'अष्टाविंशति' अष्टौ च विंशतिश्च अष्टाविंशति (२८)। कतमानि पुनस्तानि ? "अन्ध, वाज, पाज, प्रय, पृक्ष"—इत्येवमादीनि। अन्ध इत्यय निर्वक्ष्यति। वाजयितव्य पूजयितव्यम् एतद् भोजनार्थोपस्थित भवति वाज। पीयत इति पाज। प्रय पानादेव ॥

आह,—"अन्न कस्मात्" ? उच्यते,—"आ" आभिमुख्येन ह्येतत् "नत" प्रह्वीभूत भवति भोजनाय भूतानाम्। "अत्तेर्वा" अद्यते अत्ति च भूतानि, तस्मादन्नं तदुच्यत इत्युक्तम् ॥

"अत्तिकर्माण उत्तरे धातवो दश"। अन्नमेव ह्यायत इत्यन्ननामभ्यः 'उत्तरेऽत्तिकर्माणः' समाम्नाताः। कियन्तस्ते इति? 'दश' (१०)। कतमे पुनस्ते? "आवयति, भर्वति, बभस्ति"—इत्येवमादयः॥

"बलनामान्युत्तराण्यष्टाविंशतिः"। बलस्य नामानि 'बलनामानि' 'उत्तराणि' प्रकृतेभ्योऽत्तिकर्मभ्यः, य एव ह्यदन्ति त एव बलवन्तो भवन्तीत्यत्तिकर्मभ्य उत्तराणि बलनामानि समाम्नातानि। कियन्ति पुनस्तानि? 'अष्टाविंशतिः' अष्टौ च विंशतिश्च अष्टाविंशतिः (२८)। कतमानि पुनस्तानि? "ओजः, पाजः, शवः"—इत्येवमादीनि। ओजः ओजतेर्वोब्जतेर्वा। इत्येवमादि।

आह,—"बलं कस्मात्"? उच्यते,—तद्धि "भरं भवति" भ्रियते (भृ० उ०) हि सः, योऽबलिस्तो भवति। "बिभर्तेः" वा (डुभृ० उ०) स पति॥

"धननामान्युत्तराण्यष्टाविंशतिरेव"। य एव बलवन्तो भवन्ति त एव धनं प्राप्नुवन्ति इति बलनामभ्यः 'उत्तराणि धननामानि'। कियन्ति पुनस्तानि? 'अष्टाविंशतिरेव' (२८)। बलनामान्युत्तराण्यष्टाविंशतिः इमान्यष्टाविंशतिरेवेत्येवशब्दः। कतमानि पुनस्तानि? "मघम्, रेक्णः, रिक्थम्, वेदः"—इत्येवम्प्रभृतीनि। रिच्यत इति रेक्णः। अतिरिच्यमानमेतद्दिवैव तिष्ठति म्रियमाणस्येति रिक्थम्। विद्यते लभ्यते एव इति वेदः। इत्येवमादीनि॥

आह,—"धनं कस्मात्"? उच्यते,—"धिनोतीति सतः" सत इति कारकावधारणम्, धिनोतिस्तर्पणार्थः ॥

"गोनामान्युत्तराणि नव"। गवां नामानि 'गोनामानि' प्रकृतेभ्यो धननामभ्यः, गाव एव हि प्रकृष्टं धनमिति धननामभ्यः 'उत्तराणि, गोनामानि। कियन्ति पुनस्तानि? 'नव' (९)। कतमानि पुनस्तानि? "अघ्न्या, उस्रा, उस्रिया"—इत्येवमादीनि। अघ्न्या अहन्तव्या भवति। इत्येवमादि निर्वचनम्। उक्तनिर्वचनं हि गोशब्दः, अतो गौः कस्मात् इति न ब्रवीति ॥

"क्रुध्यतिकर्माणः उत्तरे धातवो दश"। धनार्थमेव हि गवार्थं च क्रोधो भवतीति गोनामभ्यः 'उत्तरे' क्रुध्यर्थाः समाम्नाताः। कतमे पुनस्ते? इति। "रेळते, हेळते"—इत्येवमादयः ॥

क्रुध्यर्थसम्बन्धेनैव "क्रोधनामान्युत्तराणि"। कियन्ति पुनस्तानि? "एकादश" (११)। कतमानि पुनस्तानि? "हेडः, हरः, हृणिः, त्यजः" इत्येवमादीनि। हे अरे इत्यनेनाविष्टो भवतीति हेडः। नीचैरनेन नरकं प्रति ह्रियते इति हरः। नीचैरनेन ह्रियते नरकं प्रतीति हृणिः। त्यजत्यनेनाविष्टो धर्मं जहातीति त्यजः। इत्येवमादि ॥

"गतिकर्माण उत्तरे धातवो द्वाविंशशतम्" (१२२)। क्रुद्धा एव सन्तः सुतरां गच्छन्तीति क्रोधनामभ्यः 'उत्तरे' 'गतिकर्माणः' समाम्नाताः ॥

"क्षिप्रनामान्युत्तराणि षड्विंशतिः"। गतिसम्बन्धादेव 'क्षिप्रनामानि उत्तराणि' समाम्नातानि। कियन्ति पुनस्तानि?

'षड्विंशतिः' षट् च विंशतिश्च षड्विंशतिः (२६)। कतमानि पुनस्तानि? "नु, मक्षु, द्रवत्"—इत्येवमादीनि। नुन्न इव क्षिप्रं गच्छतीति नु। मां क्षिणोति मां क्षिणोतीति सर्व एव हि क्षिप्रगामिनं मन्यन्ते इति मक्षु। द्रवत् द्रवतेः। इत्येवमादि॥

आह,—"क्षिप्रं कस्मात्"! उच्यते,—"विकर्षः" विकृष्टो विक्षिप्तोऽर्थः "संक्षिप्तः" क्षिप्रमुच्यते॥

"अन्तिकनामान्युत्तराण्येकादश"। य एव हि क्षिप्रं गच्छति, स एवाभिप्रेतार्थस्य अन्तिके समीपे भवतीति क्षिप्रनामभ्यः 'उत्तराणि' 'अन्तिकनामानि'। कियन्ति? 'एकादश' (११)। कतमानि पुनस्तानि? "तडित्, आसात्"—इत्येवमादीनि। ताड्यतेऽस्मिन् प्रदेशोऽवस्थित इति तडित् इत्युच्यते। अन्तिक-प्रदेशोपासन्नः स आसात्। इत्येवमादि योऽयम्।

आह,—"अन्तिकं कस्मात्"? उच्यते,—तद्धि "आनीतं भवति" सन्निकृष्टत्वात्॥

"संग्रामनामान्युत्तराणि षट्चत्वारिंशत्"। संग्रामस्य नामानि 'संग्रामनामानि' 'उत्तराणि' प्रकृतेभ्योऽन्तिकनामभ्यः, अन्तिकीभूतानामेव हि संग्रामो भवतीत्यन्तिकनामभ्य उत्तराणि संग्रामनामानि। कियन्ति पुनस्तानि? 'षट्चत्वारिंशत्' (४६)। कतमानि पुनस्तानि? "रणः, विवाक्, नदनुः"—इत्येवमादीनि। रमन्त्यस्मिन् शूरा इति रणः। विविधा शूराणामत्र वाग् भवतीति विवाक्। नदन्त्यस्मिन् शूरा इति नदनुः। इत्येवमादि योऽयम्॥

आह,—"संग्रामः कस्मात्" ? उच्यते,—"सङ्गमनाद्वा" सङ्गच्छन्ति हि परस्परेण तत्र योधाः। "सङ्गरणाद् वा" संगृणन्ति संशब्दायन्ते शूरा यत्र परस्परेण। "सङ्गतौ ग्रामाविति वा"। ग्राम इति सङ्घात इत्युच्यते। परस्परं विजिगीषया समागतौ तत्र भवतः॥

"तत्र" षट्चत्वारिंशत्के संग्रामनामगणे "खले"—"इत्येतस्य" नाम्नः "निगमाः" सन्दिग्धाः "भवन्ति" इतरोऽपि धान्यखल इत्युच्यते संग्रामोऽपि। तत्रैवं सति अस्यामृचि वक्ष्यमाणायां 'खले न पर्षान्'—इति व्यपदेशाद् विभागो लक्ष्यते शस्यखलसंग्रामखलयोः—॥ ३॥

अभी३ दमेकमेको अस्मि निष्षाडभी द्वा किमु त्रयः करन्ति। खले न पर्षान् प्रति हन्मि भूरि किं मा निन्दन्तिशत्रवोऽनिन्द्राः॥ अभिभवामीदमेकमेकोऽस्मि निष्पहमाणः सपत्नानभिभवामि द्वौ किं मा त्रयः कुर्वन्त्येक इता सङ्ख्या द्वौ द्रुततरा सङ्ख्या त्रयस्तीर्णतमा सङ्ख्या चत्वारश्चलिततमा सङ्ख्याष्टावश्नोतेर्नव न वननीया नावाप्ता वा दश दस्ता दृष्टार्था वा विंशतिर्द्विर्दशतः शतं दशदशतः सहस्रं सहस्वदयुतं नियुतं प्रयुतं तत्तदभ्यस्तमर्बुदो मेघो भवत्यरणमम्बु तदोऽम्बुदोऽम्बुमद्भातीति वाम्बुमद्भवतीति

चा स यथा महान् बहुर्भवति वर्पस्तदिवार्बुदम्। खले न पर्षान् प्रतिहन्मि भूरि। खल इव पर्षान् प्रतिहन्मि भूरि खल इति संग्रामनाम खलतेर्वा स्खलतेर्वायमपीतरः खल एतस्मादेव समास्कन्नो भवति। किं मा निन्दन्ति शत्र वोऽनिन्द्राः। य इन्द्रं न विदुरिन्द्रो ह्यहमस्म्यनिन्द्रा इतर इति वा। व्याप्तिकर्माण उत्तरे धातवो दश तत्र द्वे नामनी आक्षाण आश्नुवान आपान आप्नुवानो वधकर्माण उत्तरे धातवस्त्रयस्त्रिंशत् तत्र वियात इत्येतद् वियातयत इति वा वियातयेति वा। आखण्डल प्रहूयसे। आखण्डयितः। तडिदित्यन्तिकवधयोः संसृष्टकर्म ताडयतीति सतः ॥४॥

"अभीदं दमेक०—०ऽनिन्द्राः"। (ऋ० सं० ८, १, ६, २)। वैकुण्ठस्येन्द्रपुत्रस्येयमार्षम्। जगती। दशरात्रस्य नवमेऽहनि निष्केवल्ये शस्यते। आध्यात्मिको मन्त्रः। "इदं" तावत् जगत् 'एकः' एव अहम् 'अभि अस्मि' "अभिभवामि", अभिभूय च भवामि। अस्य सर्वस्याहमेकोऽधिपतिरित्यभिप्रायः। कथं पुनरभिभवाम्यहमेतत्? "एकम् एकः" निष्पात् "निष्पहमाणः" "सपत्नान्" शत्रून् निश्चयेनाधिकं वाभिभवामीत्यर्थः। सहतिरभि-भवार्थश्छन्दसि। कथम्पुनरभिभवन् सपत्नानहमस्य जगत आधिपत्ये वर्त्ते? यावदेकं तावदागत् सन्तमेक एवाभिभवामि

सपत्नम्, 'अभी इदा' "द्वौ" अप्यागतौ एक एव "अभिभवामि'। "किम्" 'उ' "नय" 'करन्ति' त्रयोऽपि युगपदागता सन्त एकाकिनोऽपि मम किं "कुर्वन्ति"? न किञ्चिदपीत्यभिप्राय। किञ्च 'खले न पर्षान्' गाह्यमाने हन्यमाने गम्यमानेऽन्ने। एक खल-शब्द उपमानम्, उपमासम्बन्धात्, यथा 'खले' खलस्थाने कर्षकेण 'पर्षान्' बहूनपि सञ्चितान् अप्रतिबन्धेन शृणुयेरन् (शृन्दीरन्), एवम् हमपि भूरीनपि शत्रूनागतान् क्षणादेव तैरप्रतिबध्यमान 'हन्मि'। तमेवम्प्रभाव सन्त मा "कि निन्दन्ति शत्रव?" नाह निन्दार्ह, स्तत्योऽहमित्यभिप्राय। अपि च "अनिन्द्रा', 'ये' माम् "इन्द्र न विदु' याथार्थ्यत, ते कथमविज्ञायैव मा निन्दन्ति? नैत-न्न्याय्यमित्यभिप्राय। "अनिन्द्रा इतर इति वा' अथवा अनिन्द्रा सन्त आत्मना कथमिन्द्र सन्त मा निन्दन्ति? न तु नामेन्द्रत्वे नैवाहमतिरिक्तस्तेभ्य, अथ कथमितरे अनिन्द्रा सन्तो न इन्द्र न्तीत्यभिप्राय॥ इति मन्त्रार्थ॥

अथैवपदनिरुक्तम्।—"एष इता सख्या" गता संख्या, अन प्राप्त्यर्थ। इत्यादिक पार्षाय गन्ता। "द्वौ द्विगुणा सख्या" एकस्या सकाशात्। "त्रयस्तीर्णतमा सख्या' द्वयो सकाशात्। प्रसङ्गानुप्रसङ्गमुच्यते,—"चत्वारश्चलिततमा सख्या" त्रिभ्य सकाशात्। "अष्टावश्नोते" ते हि सर्व सख्या व्याप्य वर्तन्ते। "नव" इति या सख्या, सा "न वननीया" न सम्भजनीया भवति, नवसङ्ख्यायुतायां हि निष्ठा न कश्चिदप्यारम्भ क्रियते॥ "दश" इति या सख्या, सा "दस्ता" दशान्त हि संख्या भवति।

"दृष्टार्था वा" दृष्टार्थैव हि दशानामुपरि पुन पुन दृश्यते सख्या । तद्यथा,—एकादशेत्येवमादि । तस्माद् दृष्टार्थदर्शनाद् दशेत्युच्यते । "विंशतिर्द्विदशत " द्वि दश विंशतिरित्युच्यते । "शत दशदशत " दशकृत्वोऽभ्यस्ता या दश, ता समुदिता शतमित्युच्यते । "सहस्र सहस्वत्" । सह इति बलनाम, तेन तद्वत् दुर्बलानामपि सहस्र समुदित बलवदेव भवति सङ्घातवलीयस्त्वात् । "अयुत नियुत प्रयुत तत्तदभ्यस्तम्" सहस्र दशकृत्वोऽभ्यस्तमयुतमा-मिश्रीभूतमयुतमित्युच्यते, अयुतमपि दशकृत्वोऽभ्यस्त नियुतमित्युच्यते, नियुतमपि दशकृत्वोऽभ्यस्त प्रयुतमित्युच्यते । अथा र्बुदशब्दविवक्षया अम्बुशब्द निर्वक्ति,—अरणशीलम् "अम्बु" तस्य दाता मेघ , स "अम्बुद " तस्य, "स यथा" उदकभाव मापद्यमान "महान् बहुर्भवति वर्षन् तदिवार्बुदम्" तदिव वर्षन् यद् बहु द्रव्यजात भवति, तदर्बुदमित्युच्यते । "खल इति सग्रामनाम' । खलतेर्वा भ्रश्यत्यर्थस्य, भ्रश्यन्ति हि योधा । "स्खलतेर्वा" हिसार्थस्य, हिस्यन्ते हि तत्र परस्परेण । "अयम-पीतर" "खल " धान्यखल "एतस्मादेव" तत्रापि हि भ्रश्यन्ति चूर्ण्यमानानि धान्यानि हिस्यन्ते वा, चूर्ण्यन्त इत्यर्थ । अथवा "समास्कन्न " असौ "भवति' विप्रकीर्णं धान्यै ॥

"व्यातिकर्माण उत्तरे धातवो दश" (१०)। सग्रामे हीतरेतर व्याप्नुवन्ति योधा इति सग्रामनामभ्य 'उत्तरे' 'व्यातिकर्माण '। कतमे पुनस्ते ? इति । "इन्वति, ननक्षे"—इत्येवमादय । "तत्र" दशके व्यातिकर्मधातुगणे एते "द्वे" "नामनी" भवत —

'आक्षाणः (३)' इति, 'आपानः (६)' इति च। तत्र, "आक्षाण आश्नुवानः" यो हि अश्नोति व्याप्नोति स आक्षाण इत्युच्यते तथा च य आप्नोति सः "आप्नुवानः" सन् "आपानः" इत्युच्यते ॥

"वधकर्माण उत्तरे धातवस्त्रयस्त्रिंशत्"। संग्रामे हीतरेतरं व्याप्य ततो घ्नन्तीति व्याप्तिकर्मभ्यः 'उत्तरे' 'वधकर्माणः' समाम्नाताः। कियन्तः? 'त्रयस्त्रिंशत्' (३३)। कतमे पुनस्ते? इति। "दम्नोति, श्नथति, ध्वरति, धूर्वति"—इत्येवमादयः "तत्र" वधकर्मधातुमध्ये "वियात इत्येतत्" नाम। तत्पुनरेवं निर्वक्तव्यम्,—"वियातयते" नानाप्रकारं यातयते यः शत्रून्, स वियातः। अथ "वा" एवमन्यथा स्यात्—"वियातय" एवमुच्यते यः स्तोतृभिः, स वियातः। 'आखण्डलः'—इत्येतदपि नामैव। निगममपि चात्र दर्शयति,—"आखण्डल प्रहूयसे"। आभिमुख्येनावस्थितो यः खण्डयति मेघान्, स आखण्डयिता, तस्य सम्बोधनम्। हे "आखण्डयितः" ॥

इरिम्बिठिर्नाम कण्वो मन्त्रद्रष्टा। तस्येयमार्षम्। गायत्री ऐन्द्री। रात्रिपर्य्यायेषु मध्यमरात्रिपर्य्याये होतुरियं शस्त्रे विनियुक्ता। "शाचिगो शाचिपूजनायं रणाय ते सुतः। आखण्डल प्रहूयसे ॥" (ऋ० सं० ६, १, २४, २)। शाचिगो इति चैकं पदम्। शचीति कर्मनाम। तस्य शच्याख्यस्य कर्मणो येयमिष्टिपशुसोमादिलक्षणा सन्ततिः, सा शाचिः। अथवा स्वार्थिक एव तद्धितः स्यात्। शच्येव शाचिः। तं प्रत्याहूयमानो यो गच्छति, स शाचिगुरिन्द्रः, तस्य सम्बोधनं

हे 'शाचिगो !' इति। तथैव शाच्यां य आगतः सन् पूज्यते स शाचिपूजनः, तस्य सम्बोधनं हे 'शाचिपूजन !'। हे 'आखण्डल' आखण्डयितः! शत्रूणां मेघानां वा। इयमस्माभिः प्रस्तुता शची यां प्रति ते नित्यमिष्टमागतं यथा च पूज्यसे त्वमागतः सन्, किञ्च एतस्याञ्च शच्यामस्मिन् कर्मणि 'अयं' 'रणाय' रमणाय 'ते' तव 'सुतः' अभिषुतः सोमो यतोऽस्माभिः त्वं 'प्रहूयसे' प्रकर्षेणादरबुद्धिं यसे आहूयसे। स एवमेतज् ज्ञात्वा अस्मदनुग्रहाय अनतीतकालमागन्तुमर्हसीत्यभिप्रायः॥

आखण्डलशब्देऽल्पतरं वक्तव्यं बहुतरं तडिच्छब्दे इति भेदतो निरुच्यते,—"तडिदित्यन्तिकवधयोः संसृष्टकर्म"। तडिदित्येतच्छब्दरूपमन्तिकाभिधायि वधाभिधायि च इत्येकमेव ह्येतदुभाभ्यामर्थाभ्यां सम्प्रयुज्यते। विद्युदपि च तडिदित्युच्यते। सा पुनः कर्त्तरि कारके "ताडयतीति सत."॥ ४॥

त्वया वयं सुवृधा ब्रह्मणस्पते स्पार्हा वसु मनुष्या ददीमहि। या नो दूरे तडितो या अरातयोऽभि सन्ति जम्भया ता अनमसः। त्वया वयं सुवर्द्धयित्रा ब्रह्मणस्पते स्पृहणीयानि वसूनि मनुष्येभ्य आददीमहि याश्च नो दूरे तडितो याश्चान्तिकेऽरातयोऽदानकर्माणो वादानप्रज्ञा वा जम्भय ता अनमसोऽम इति रूपनामाप्नोतीति सतो विद्युत्तडिद्भवतीति शाकपूणिः सा ह्यवताडयति दूराच्च

दृश्यतेऽपि त्विदमन्तिकनामैवाभिप्रेतं स्यात्। "दूरे चित् सन्तडिदिवातिरोचसे।" दूरेऽपि सन्नन्तिक इव सन्दृश्यस इति। वज्रनामान्युत्तराण्यष्टादश वज्रः कस्माद् वर्जयतीति सतस्तत्र कुत्स इत्येतत् कृन्ततेरृषिः कुत्सो भवति कर्त्ता स्तोमानामित्यौपमन्यवोऽत्राप्यस्य वधकर्मैव भवति तत्सख इन्द्रः शुष्णं जघानेत्यैश्वर्य्यकर्माण उत्तरे धातवश्चत्वार ईश्वरनामान्युत्तराणि चत्वारि तत्रेन इत्येतत् सनित ऐश्वर्य्येणेति वा सनितमनेनैश्वर्य्यमिति वा॥ ५॥

यथा त्वन्तिकनामेदं तथेयमृगुदाहरणम्,—"त्वया वयं०—० अनप्नसः"—इति (ऋ० सं० २, ६, ३०, ४)। गृत्समदस्यार्षम्। जगती। प्रवर्ग्ये विनियुक्ता। हे ब्रह्मणस्पते!" "त्वया" "वयं" 'सुवृधाः' "सुवर्द्धयित्रा" सुष्ठु वर्द्धिता अनुगृहीताः सन्तः 'वसु' "वसूनि" यानि यानि 'स्पार्हा' स्पार्हाणि 'स्पृहणीयानि" तानि तानि 'मनुष्या' "मनुष्येभ्य." तानभिभूय "आददीमहि"। किञ्च, "याश्च नो दूरे तडित." 'या नो दूरे' अध्यन्यवस्थिताः "अरातय." "याश्चान्तिके"। तडिच्छब्दस्यान्तिकाभिधायित्वम्। दूरे च अन्तिके च या अरातय'। अरातिः सेना। "अदानकर्माणः"। रातिर्दानार्थः। अस्माकमभिमतानर्थान् ददतो ये निवारयन्ति ते। 'अरातयः' "अदानप्रज्ञा." न दातव्यमस्माभिरेभ्य इत्येवं येषां प्रज्ञा ते अदानप्रज्ञा.। द्विविधा

हि शत्रवः,—दुःखसन्नाश्याः, सुखसन्नाश्याश्च, तत्र ये दुःखसन्नाश्याः ते अदानप्रज्ञाः, ये अदानकर्माणः ते सुखसन्नाश्याः। ते चोभयेऽपि दूरे चान्तिके चावस्थिता भवन्ति। "ताः" दूरान्तिकावस्थितानुभयानपि "जम्भय" निश्चेष्टान् कुरु त्वं ब्रह्मणस्पते। किञ्च, "अनप्नसः" अरूपांश्चैतान् कुरु। "अप्न इति रूपनाम"। तद्धि "आप्नोति" आश्रयम्॥

"विद्युत्०"। "सा ह्यवताडयति" अशनिरूपेण। "दूरात्" एव "च" "दृश्यते"। तस्मान्न तस्या अन्तिकनामाभिसम्बन्धोऽस्ति। "अपि त्विदम्" अपरेणोदाहरणेन "अन्तिकनामैवाभिप्रेतं स्यात्"—"दूरे चित् सन्तडिदिवातिरोचसे"। "दूरेऽपिसन्नन्तिक इव" अवस्थितः "दृश्यसे इति" अत्र दूरेऽपि सन्नन्तिक इवेति स्फुटतरमन्तिकाभिधानत्वम्, न तथा पूर्वस्मिन् मन्त्रे—'या नो दूरे तडितः' इति॥

एवमन्तिकनामत्वेन वा विद्युन्नामत्वेन वा वधनामत्वेन वा प्रकरणोपपदे अवेक्ष्य यथासम्भवं निर्वक्तव्यम्॥

"यो विश्वतः सुप्रतीकः सदृङ्ङसि दूरे चित् सन् तडिदिवातिरोचसे। रात्र्याश्चिदन्धो अति देव पश्यस्यग्ने सख्ये मा रिषामा वयं तव॥" (ऋ० सं० १, ६, ३१, २)। एषा जगती। आग्नेयी। कुत्सेन दृष्टा। महाव्रते आग्निमारुते शस्त्रे अभिप्लवस्य च षष्ठेऽहनि आग्निमारुते एव च शस्यते। 'यः' त्वं हे 'अग्ने!' 'विश्वतः' सर्वतः 'सुप्रतीकः' सुदर्शनः शोभनदर्शनः, अपिच 'सदृङ्' यतो यतो दृश्यसे ततस्ततः

समानदर्शनः तुल्य एव लक्ष्यसे। अपिच "दूरे" अपि "सन्" अतिभ्राजिष्णुत्वात् 'तडिदिव' अन्तिक इव अवस्थितः 'अतिरोचसे' अतिरोचिष्णुर्दृश्यसे। अपिच यदेतत् 'राज्याश्चित्' राज्या अपि सन् तम् 'अन्धः' अध्यानलक्षणं तमः, यत् न ध्यातुमपि शक्यते किमुत द्रष्टुम्। एतदपि 'अति' अतीत्य हे 'देव' सर्वभूतदीपयितः! 'पश्यसि' एव त्वम्, न तेऽस्माकमिव तेनान्धेनापि तमसा प्रतिबध्यते दर्शनम्। तस्य तवैवङ्गुणयुक्तस्य हे 'अग्ने!' 'वयं' 'सख्ये' सखिभावे परिचरणकर्मणि आ उत्तमादुच्छ्वासात्कृताध्यवसायाः सन्तः 'मा' केनचिद् विधिना शत्रुणा वा 'रिषाम' मास्मान् किञ्चिर्द्धिसीत् त्वदनुध्यानादेवेत्यभिप्रायः॥

"वज्रनामान्युत्तराण्यष्टादश"। यो हि हन्यते स वज्रेणेवेति वधकर्मभ्यः 'उत्तराणि' 'वज्रनामानि'। कियन्ति पुनस्तानि? अष्टादश, अष्टौ च दश च। कतमानि पुनस्तानि? "दिद्युत्, नेमिः, हेतिः"—इत्येवमादीनि, विद्युत् द्यतेर्वा द्योततेर्वा, पुनः पुनरतिशयेन वा द्यति अवखण्डयति, द्योतते दीप्यते वा सा दिद्युत्। अवनामयति खण्डयति प्रहारेणेति नेमिः। हेतिर्हन्तेः। इत्येवमादि॥

आह,—"वज्रः कस्मात्"? उच्यते,—"वर्जयति" वियोजयति प्राणैः प्राणिनः। "तत्र, कुत्स इत्येतत्" सन्देहपदम्। ऋषिरपि कुत्स इत्युच्यते। तत् पुनरेतत् यदा वज्रनाम, तदा "कृन्ततेः" कृन्त्यतेऽनेनेति "कुत्सः"। यदा पुनरेतदृष्यभिधानं,

वदा "कर्त्ता स्तोमानाम् इति" "औपमन्यवः" आचार्य्यो मन्यते। "अत्राप्यस्य वधकर्मैव" अभिप्रेतं स्यात्। अत्रापि एतद्वयी वर्त्तमानमभिधानमस्य अपेर्वधकर्मैव वधार्थसंयुक्तमेव स्यात्। किङ्कारणम्? "तत्सख इन्द्रः शुष्णं जघान इति"। तेन स्तूयमानो विवृद्धबलः शुष्णं शोषयितारं रसानामसुरं मेघं वा जघान। मेघो हि शुष्णः, तदुदये हि धान्यानि उदकग्राहनिमित्तेन शुष्यन्ति॥

"ऐश्वर्य्यकर्माण उत्तरे धातवश्चत्वारः"। घ्नतामेव हि वज्रेणायुधेनैवैश्वर्य्यं भवतीति वज्रनामभ्यः 'उत्तरे' 'ऐश्वर्य्यकर्माणः'। कतमे पुनस्ते? "इरज्यति, पत्यते, क्षियति, राजति?"—इति॥

"ईश्वरनामान्युत्तराणि चत्वारि"। ऐश्वर्य्यसम्बन्धेनैवोच्यते। कतमानि पुनस्तानि? "राष्ट्री, अर्य्यः, नियुत्वान्, इनः"। "तत्र इन इत्येतत्" अभिधानमेवं व्युत्पाद्यम्,— "सनितः" सम्भक्तः "ऐश्वर्य्येणेति वा", अथ "वा" "सनितं" सम्भक्तम् "अनेनैश्वर्य्यमिति"॥ ५॥

यत्रा सुपर्णा अमृतस्य भागमनिमेषं विदथाभिस्वरन्ति। इनो विश्वस्य भुवनस्य गोपाः स मा धीरः पाकमत्राविवेश॥

यत्र सुपर्णाः सुपतना आदित्यरश्मयोऽमृतस्य भागमुदकस्यानिमिषन्तो वेदनेनाभिस्वरन्तीति वाभिप्रयन्तीति वेश्वरः सर्वेषां भूतानां गोपायितादित्यः स मा धीरः

पाकमत्राविवेशेति धीरो धीमान् पाकः पक्तव्यो भवति विपक्वप्रज्ञ आदित्य इत्युपनिषद्वर्णो भवतीत्यधिदैवतमथाध्यात्मं यत्र सुपर्णाः सुपतनानीन्द्रियाण्यमृतस्य भागं ज्ञानस्यानिमिषन्तो वेदनेनाभिस्वरन्तीति वाभिप्रयन्तीति वेश्वरः सर्वेषामिन्द्रियाणां गोपायितात्मा स मा धीरः पाकमत्राविवेशेति धीरो धीमान् पाकः पक्तव्यो भवति विपक्वप्रज्ञ आत्मेत्यात्मगतिमाचष्टे ॥ ६ ॥

इति तृतीयाध्यायस्य द्वितीयः पादः ॥ ३, २ ॥

अधुना मन्त्रमपि व्याचष्टे यस्मिन्नेतदीश्वरनामेन इति,—"यत्रा सुपर्णा०"—इति (ऋ० सं० २, ३, १८, १)। त्रिष्टुवेषा। वैश्वदेवीये सूक्ते दीर्घतमसा दृष्टा। महाव्रते तृतीयसवने वैश्वदेवे शस्त्रे शस्यते। वैश्वदेवेषु हि सूक्तेष्वेकदेवता बहुदेवताश्च मन्त्रा भवन्ति, तदप्युपेक्षितव्यम्। "यत्र" यस्मिन् मण्डलेऽवस्थिताः "सुपर्णाः सुपतनाः आदित्यरश्मयः" ते हि शोभनमर्थमुद्दिश्य नमोविघातलक्षणं पतन्ति। अथवा शोभमानाः पतन्तीति सुपर्णाः। ते किं कुर्वन्ति ? उच्यते,—"अमृतस्य भागम्" "उदकस्य" अमरणधर्मणः 'भाग' भजनीयमंशमादाय पृथिवीलोकात् तेनान्विताः सन्तः सर्वभूतानि "अभिस्वरन्ति"। 'स्वृ शब्दोपतापयोः (भू० प०)' अभितपन्तीत्यर्थः। अथवा अभिस्वरन्त्यादित्यमण्डलम्, आभिमुख्येन रस्यान् गृहीत्वा प्रयान्ति। "अनिमिषन्त"

अनिमिषमाणा इव आदरवन्त इत्यर्थः। 'विदथा' "वेदनेन" स्वकर्माधिकारयुक्तेनान्विताः सन्तः इदमेवास्माभिः कर्त्तव्यमादा-नादिलक्षणं कर्मेति अभिस्वरन्ति। यत्रैतदेवंलक्षणं कर्म कुर्वन्त्या-दित्यरश्मयः, तत्र किम्? इति उच्यते,—"इनो विश्वस्य भुवनस्य गोपाः"। 'इनः' "ईश्वरः" इनो ह्यसावादित्यः, ऐश्वर्य्येण भवति 'विश्वस्य' 'भुवनस्य' भूतस्य "सर्वेषां भूतानां" 'गोपाः' "गोपा-यिता" भवति "आदित्यः" मण्डलान्तरपुरुषो यः तत्र मण्डलेऽ-वस्थितः। "स मा धीरः" "धीमान्" प्रति विशिष्टया बुद्ध्या-न्वितः, बुद्धिरेव हि तस्य शरीरम्। "पाकः पक्तव्यः" पक्वप्रज्ञः "विपक्वप्रज्ञः" सम्यग्दर्शनोऽनुग्राह्यतया "आविवेश" आविशतु॥

"इति" शब्दः प्रकरणप्रदर्शनार्थः,—एवमयम् "उपनिषद्वर्णो भवतीति"। यद्वा, ज्ञातमुपगतस्य सतो गर्भजन्मजरामृत्यवो निश्चयेन सीदन्ति, सा रहस्यं विद्या उपनिषदित्युच्यते। उपनि-षद्भावेन वर्ण्यत इति उपनिषद्वर्णः। "अधिदैवतम्" उक्तम्॥

"अथाध्यात्मम्" उच्यते,—अधिदैवतमध्यात्ममित्येतौ शब्दौ व्याख्यातौ। "यत्र" यस्मिन् शरीरे "सुपतनानि इन्द्रियाणि" अवस्थितानि स्वेषु स्वेषु आयतनेषु कृष्णसारादिषु किं कुर्वन्ति? उच्यते,—"अमृतस्य" अमरणधर्मणः "ज्ञानस्य" "भागम्" भजनीयं स्वं स्वं रूपादिलक्षणं। रसमादाय। 'विदथा' "वेदनेन" विज्ञानेन युक्तम् "अभिस्वरन्ति"। न हि इन्द्रियाणां चैतन्यमस्तीति तानि ह्यचेतनानि, चेतनस्य पुरुषस्य कर्तृविज्ञान-मयस्य करणानि, तदधिष्ठानास्तु देवताश्चेतनाः। तदभिप्रायेणो-

च्यते,—'विदथा' "वेदनेन" विज्ञानेनेति। किं कुर्वन्ति? "अभिस्वरन्ति" "अभिप्रयन्ति" विषयज्ञानेन पुरुषस्यापि भोक्तु· र्दुःखं कुर्वन्ति। अथवा 'अभिस्वरन्ति' बुद्धिमाभिमुख्येन विषय· विज्ञानमादाय बाह्यप्रत्ययाधानार्थं स्वरन्ति गच्छन्तीत्यर्थः। तत्र किम्? इत्युच्यते,—तत्र योऽवस्थितः "ईश्वरः" इनः, "सर्वेषा· मिन्द्रियाणां गोपायिता" यः "आत्मा" "स मा धीरः" "धीमान्" "पाकः पक्तव्यः" पक्वप्रज्ञः "विपक्वप्रज्ञः" सम्यग्द्रष्टा सर्वज्ञः। सः "अत्र" एव हि देहेऽवस्थितः बुद्ध्यधिदैवतभावेन तैजसाख्यो माम् "आविवेश" त्वनुग्राहकतया स मामत्रैवावस्थितोऽगृह्णात्वि· त्यर्थः, तदनुग्रहाद्यस्य सम्यग्दर्शनं प्रकाशते तदाशास्यत इति। "आत्मगतिमाचष्टे" एवमपास्य विज्ञानमाचष्टे मन्त्रैः।

यदुक्तं "पुण्यफले देवताध्यात्मे वा" इति, तदेवमुपपाद्यम्,— तत्र एक एव ह्यसावादित्यमण्डले चाधिदैवते चाध्यात्मे च। बुद्ध्यधिदैवताभूतः स एव तत्र तत्रोपेक्षितव्यः। तस्मादमुष्मा· दादित्यमण्डलाद् ये रश्मयः प्रसर्पन्ति ते विश्वेदेवा इति, "रश्मयो वै विश्वेदेवाः" इति ह्युक्तम्। अध्यात्मेऽपि हृदाकाशाद् यानीन्द्रियाणि प्रसर्पन्ति, त एव रश्मयः। अधिदैवते स एव विश्वेदेवा इत्युक्तम्। एवं तत्र तत्र योज्यम्, प्रकारमात्रमेतद· मुपदर्शितं भाष्यकारेणेति॥ ६॥

इति निरुक्तवृत्तौ षष्ठमाध्यायस्य (तृतीयाध्यायस्य) द्वितीयः पादः॥ ३, २॥

तृतीयः पादः ॥

बहुनामान्युत्तराणि द्वादश बहु कस्मात् प्रभवतीति सतो ह्रस्वनामान्युत्तराण्येकादश ह्रस्वो ह्रसतेर्महन्नामान्युत्तराणि पञ्चविंशतिर्महान् कस्मान् मानेनान्याञ्जहातीति शाकपूणिर्महनीयो भवतीति वा तत्र ववक्षिथ विवक्षस इत्येते वक्तेर्वा वहतेर्वा साभ्यासाद् गृहनामान्युत्तराणि द्वाविंशतिर्गृहाः कस्माद् गृह्णन्तीति सतां परिचरण कर्माणं उत्तरे धातवो दश सुखनामान्युत्तराणि विंशतिः सुखं कस्मात् सुहितं खेभ्यः खं पुनः खनते रूपनामान्युत्तराणि षोड़श रूपं रोचतेः प्रशस्यनामान्युत्तराणि दश प्रज्ञानामान्युत्तराण्येकादश सत्यनामान्युत्तराणि षट् सत्यं कस्मात् सत्सु तायते सत्प्रभवं भवन्तीति वा अष्टा उत्तराणि पेदानि पश्यतिकर्माण उत्तरे धातवश्चायतिप्रभृतीनि च नामान्यामिश्राणि नवोत्तराणि पदानि सर्वपदसमाम्नानायाथात उपमा यदतत्तत्सदृशमिति गार्ग्यस्तदासां कर्म ज्यायसा वा गुणेनप्रख्याततमेन वा कनीयांसं वा प्रख्यातं वोपमिमीतेऽथापि कनीयसा ज्यायांसम् ॥ १ ॥

"बहुनामान्युत्तराणि द्वादश। ईश्वराणामेव बहुत्वं भवतीत्यतः ईश्वरनामभ्यः 'उत्तराणि' 'बहुनामानि'। कियन्त ? द्वे च दश च 'द्वादश' (१२)। कतमानि पुनस्तानि ? "उरु, तुवि, पुरु"—इत्येवमादीनि। उरु विस्तारे, यद्धि बहु भवति, तद् विस्तीर्णं भवति। तुवि वृद्धौ, यद्धि बहु भवति, तद् वृद्धं भवतीति। पूरितमिव हि बहुना सर्वं भवतीति पुरु। इत्येवमादि युक्तं योज्यम्॥ आह,—"बहु कस्मात्" ? उच्यते—"प्रभवति" हि एतत् बहुभ्यो दीयमानम्॥

बहुनामसम्बन्धेनैव "ह्रस्वनामानि उत्तराणि"। कियन्ति ? "एकादश" (११)। कतमानि पुनस्तानि ? "कुवित्, रिहम्, ह्रस्वः"—इत्येवमादीनि। कुत्सितमिव हि तद् विज्ञायते अल्पत्वादिति कुवित्। लीढमेव हि तदल्पत्वाद् भवतीति रिहम्। "ह्रस्वः" कस्मात् ? उच्यते,—"ह्रसतेः" ह्रसितो हि भवति सः महतः सकाशात्॥

ह्रस्वसम्बन्धेनैव "महन्नामान्युत्तराणि पञ्चविंशतिः"। ह्रस्वापेक्षयैव हि महत्त्वं भवति। कियन्ति पुनस्तानि ? "पञ्चविंशतिः" (२५)। कतमानि पुनस्तानि ? "महत्, ब्रध्नः, ऋष्व."—इत्येवमादीनि। आह,—"महान् कस्मात्" ? उच्यते,—"मानेन" "अन्यान्" ह्रस्वान् "जहाति" "इति" "शाकपूणिः" आचार्यो मन्यते। अथ "वा" "मंहनीयः" पूजनीयो "भवतीति" महान्। बृहत्त्वात् बृंहणत्वाच्च ब्रध्नः ऋष्वः रैवणवान्। इत्यादि योज्यम्॥ "तत्र" तस्मिन् महन्नामके गणे "ववक्षिथ (१४),

विचक्षसे (१५)"—इत्येते आख्याते। ते पुनरुभे चर्क्रेर्वा धातोः "साभ्यासात्" ॥

य एव महान्तस्त एव गृहिणो भवन्तीति महन्नामभ्यः "उत्तराणि गृहनामानि"। कियन्ति पुनस्तानि? "द्वाविंशतिः" (२२)। कतमानि पुनस्तानि? "गयः, कृदरः, हर्म्यम्"—इत्येवमादीनि। गम्यत इति गयः। कृतदरः कृदरः। हर्म्यं हरणम्। इत्येवमादीनि॥ आह,—"गृहाः कस्मात्"? उच्यते,—ते हि यावदेव किञ्चिद्वा हियते, तत् सर्वमेव "गृह्णन्ति" दुःपूरत्वात्॥

गृहेष्वेवावस्थिताः परिचर्य्यन्ते परिचरन्तेवेति गृहनामभ्यः "उत्तरे परिचरणकर्माणः धातवः" समाम्नाताः। कियन्तः पुनस्ते? "दश" (१०)। कतमे पुनस्ते? "इरज्यति, विधेम, सपर्य्यति"—इत्येवमादयः॥

परिचर्य्यमाणानामेव हि सुखं भवतीति परिचरणकर्मभ्यः "उत्तराणि सुखनामानि"। कियन्ति पुनस्तानि? "विंशतिः" (२०)। कतमानि पुनस्तानि? "शिम्बाता, शतरा, शातपन्ता"—इत्येवमादीनि। शिम्बाता, सुखानुसम्बन्धाद्धि हृदमग्नानामिव शरीरं शीतीभवति। शतरा, शीतलतरमिव हि जलादपि सुखम्। शातपन्ता, शान्ततापमेव हि सुखम्। एवमादि। आह,—"सुखं कस्मात्"? उच्यते,—"सुहितम्" सुष्ठु हितमेतत् "खेभ्यः" इन्द्रियेभ्यः। "खं पुनः" इन्द्रियम्, "खनतेः" धातोः। अवदीर्णमेव हि तस्य कर्णायतनं भवति॥

"रूपनामान्युत्तराणि षोडश"। य एव हि सुखिनस्त एव हि

प्रायो रूपवन्तो भवन्तीति सुखनामभ्य 'उत्तराणि' 'रूपनामानि'। कियन्ति पुनस्तानि ? 'षोडश' (१६) कतमानि पुनस्तानि ? "निर्णिक्, वव्रि"—इत्येवमादीनि। निर्णिक्तमिव हि तद् भवति तैजसत्वात्। विवृणोत्याश्रयमिति वव्रि। इत्येवमादि। "रूप रोचते" दीप्यमानमिव हि तत् प्रकाशं भवति॥

"प्रशस्यनामान्युत्तराणि दश"। य एव हि रूपवन्तस्त एव प्रशस्या भवन्तीति रूपनामभ्य 'उत्तराणि' 'प्रशस्यनामानि'। कियन्ति पुनस्तानि ? 'दश' (१०)। कतमानि पुनस्तानि ? "अक्रेमा, अनेद्य, अनिन्द्य"—इत्येवमादीनि। अक्रेमा, 'क्रिमु गतिशोषणयो (दि० प०)', न क्रिम्यति गच्छत्यकीर्त्तिमित्यक्रेमा, अपाप इत्यर्थ, क्षमारहितो वा। अनेद्य, अनिन्द्यार्हः। इत्येवमादि योज्यम्॥

"प्रज्ञानामान्युत्तराण्येकादश"। य एव हि प्रज्ञावन्तस्त एव हि प्रशस्या भवन्ति, य एव हि प्रशस्यास्त एव हि प्रज्ञावन्तो भवन्तीति प्रशस्यनामभ्य 'उत्तराणि' 'प्रज्ञानामानि'। कियन्ति पुनस्तानि ? 'एकादश'। 'एकञ्च दश च एकादश (११)। कतमानि पुनस्तानि ? "केत, केतु, चेत"—इत्येवमादीनि। 'कित ज्ञाने (भ्वा० प०)', तस्य केत। केतुरपि तस्यैव॥

"सत्यनामान्युत्तराणि षट्"। य एव हि प्रज्ञावन्त, त एव हि सत्यवादिनो भवन्तीति प्रज्ञानामभ्य 'उत्तराणि' 'सत्यनामानि'। कियन्ति पुनस्तानि ? 'षट् (६)। कत मानि पुनस्तानि ? "बट्, श्रत्, सत्रा"—इत्येवमादीनि।

वद्धमिव सम्बद्धं भूतेनार्थेन भवतीति वद्। श्रवणार्हमेतद्भवतीति श्रत्। एवमादि। आह,—"सत्यं कस्मात्" ? उच्यते,—"सत्सु तायते" सत्स्वेव हि तत्तायते विस्तीर्य्यते, न हि सतां समीपे शक्यमनृतं वक्तुम्। अथ "वा" "सत्प्रभवं भवति" य एव हि सन्तस्त एव हि सत्यं वदन्ति॥

"अष्टौ" यानि "उत्तराणि पदानि" चिक्यदित्येवमादीनि, ते "पश्यतिकर्माणः" पश्यत्यर्थाः "धातवः"। "चायतिप्रभृतीनि च" तान्येव "नामानि" भवन्ति। तानि पुनरेतानि "आमिश्राणि" संसृष्टानीत्यर्थ.। तेषां प्रकरणोपपदाभ्यां विशेषावधारणं भवति। तत्र,—किञ्चिन्नाम, किञ्चिदाख्यातम्,—इत्येके मन्यन्ते। अन्ये पुनः किम्? "चिकितन् (१)", "विचर्षणिः (६)", "विश्वचर्षणिः (७)"—इत्येतानि नामानि, यान्यन्यानि परिशिष्टानि ते धातवः, तानि पुनरेतानि पूर्वाचार्य्यप्रामाण्यात् आमिश्राणि पठ्यन्ते इत्येवं मन्यन्ते॥

"नव" यानि "उत्तराणि पदानि" "हिकं, सुकं, नुकम्"—इत्येवमादीनि, आहतमित्येवमन्तानि, "सर्वपदसमाम्नानाय"। कथं नाम सर्वं चतुर्विध पदप्रकारमेतस्मिन् समाम्नाये समाम्नानं स्यादित्येवमर्थमेष्वेव हि नवसु समाम्नातेषु उभये निपातोपसर्गाः, दर्शिता भवन्ति॥

"अथात उपमाः"। 'अथ' इदानीम्, 'अतः' अनन्तरम्, 'उपमाः' भवन्ति। तद्यथा,—"इदमिव, इदं यथा, अग्निर्नये, चतुरश्चिद् ददमानान्, ब्राह्मणा व्रतचारिणः, वृक्षस्य नु ते पुरु-

तवयाः, जार आ भगम्, मेषो भूतोऽभि यन्नयः, तद्रूपः, तद्वर्णः, तद्वत्, तथा"—एताः उपमाः ॥

सामान्यलक्षणमासां ब्रवीति, — "यदतत्तत्सदृशमिति गार्ग्यः"। 'यत्' किञ्चित् अर्थजातम् 'अतत्' भवति, 'तत्' सरूपञ्च, यथा—अनग्निः खद्योतः, अग्निसरूपश्च सोऽग्निनोपमीयते—अग्निरिव खद्योत इति, एवं अतत्सरूपेण गुणेनः ॥ गुणसामान्यात् उपमीयते,—इत्येवं 'गार्ग्यः, आचार्यो मन्यते। "तदासां कर्म" स आसामुपमानानामर्थः, यदप्रसिद्धतरगुणस्य कस्यचित् प्रसिद्धतरगुणेनान्येन गुणप्रकाशनम्। क्वचित् पुनरात्मनाप्युपमानं भवत्येव।—"वायुरात्मोपमे गतिः", "तथा करोति सैन्यानि यथा कुर्य्याद् धनञ्जयः" इति। "ज्यायसा वा गुणेन, प्रख्याततमेन वा कनीयांसं वा प्रख्यातं वोपमिमीते"। 'ज्यायसा' उत्कृष्टेन 'गुणेन' यो यस्मिन् द्रव्ये उत्कृष्टो गुणः तेन, 'कनीयांसम्' अनुत्कृष्टं गुणम् 'उपमीयते'। तद्यथा,—सिंहो माणवकः। सिंहे शौर्य्यमुत्कृष्टम्, माणवकमेतेनोपमिमीते, सिंह इव माणवको विक्रान्त इति। 'प्रख्याततमेन वा' 'अप्रख्यातम्' 'उपमीयते'। प्रख्यातश्चन्द्रमा, अप्रख्यातो माणवकः, तं तेनोपमिमीते,—चन्द्र इव कान्तो माणवक इति। "अथापि" क्वचित् "कनीयसा" गुणेन "ज्यायांसम्" अपि सन्तम् उपमिमीते। तद्वेतच्छन्दस्येव द्रष्टव्यम् ॥ १ ॥

तनूत्यजेव तस्करा वनर्गू रशनाभिर्दशभिरभ्यधीताम् । तनूत्यक्तनूत्यक्ता वनर्गू वनगामिनावग्निमन्थनौ बाहू तस्कराभ्यामुपमिमीते तस्करस्तत्करोति यत् पापकमिति नैरुक्तास्तनोतेर्वा स्यात् सन्ततकर्मा भवत्यहोरात्रकर्मा वा रशनाभिर्दशभिरभ्यधीतामभ्यधातां ज्यायांस्तत्र गुणोऽभिप्रेतः ॥ २ ॥

आह,—किमुदाहरणम् ? उच्यते,—"तनू त्यजेव·धीताम् । इयं ते अग्ने नव्यसी मनीषा युक्ष्वा रथं न शुचयद्भिरङ्गैः ॥ (ऋ० सं० ७, ५, ३२, ६)। त्रितस्येयमार्षम् । त्रिष्टुप् । प्रातरनुवाकाश्विनयोः शस्यते । 'तनूत्यजा' "तनूत्यक्ता" चौर्याभिप्रायेण हर्त्तव्यं वा सर्त्तव्यं वेति कृताध्यवसायौ तस्करौ "वनर्गू वनगामिनौ" मार्गमोषकौ प्रसृतौ, ताभ्यामुपमीयते । तौ यथा उपमार्यत्वेन सुपुष्टौ भवतः, न तथा ग्रामतस्करौ । तौ यथा कश्चिदध्वगं बध्नीयातां रज्ज्वा । एवम् एतौ अस्मद्बाहू 'रशनाभिः' अङ्गुलीभिः 'दशभिः' दशसंख्यायोगिनीभिः 'अभ्यधीतां' प्रतिनिरुद्धीताम् । अभिनिरुध्य च अभिमन्थनयोक्त्रेण अधरारण्युत्तरारणीभूतं त्वां तस्कराविव कश्चिदध्वगं गाढं बध्वा सुभृशमाकर्षतः । किमर्थं पुनरेवमर्थ्यतेऽस्माभिः ? हे 'अग्ने!' 'इयं' यस्मात् 'नव्यसी' नवतरा, अन्यैः स्तोतृभिः अदृष्टपूर्वा, युष्मद्गुणैः संसृत्य विपश्चिता, 'ते' तव 'मनीषा' स्तुतिः प्रधान·

संयुक्ता। स त्वमेतज्ज्ञात्वा एवमर्थ्यमानोऽस्माभिः 'युङ्क्ष्व' योजय आत्मानमरणी प्रति। अरणिभ्यां 'शुचयद्भिः' दीप्यमानैः स्वैः 'अङ्गैः' ज्वालाख्यैः। कथम्पुनर्योजय? 'रथं न' यथा कश्चित् कुतश्चित् आजिगमिषुः शीघ्रं रथं योजयेत्, एवमेवावतरणाय त्वमाभ्यामरणीभ्यां योजयमानो यज्ञे विघ्नं मा कार्षीरित्यभिप्रायः। "सनूत्यक् तन्नूत्यक्तौ" इत्यर्थः। "वनगू वनगामिनौ" तत्र हि तयोश्चौर्य्य सिध्यति। एवमस्यामृचि "अग्निमन्थनौ" "बाहू" प्रशस्तौ "तस्कराभ्याम्" अप्रशस्ताभ्याम् "उपमिमीते" मन्त्रदृक्॥

"तस्करः" "तन्" एव "करोति" "यत्" एव "पापकम्" भवति "इति नैरुक्ता मन्यन्ते"। वैयाकरणानां पुनरन्यथापि स्यात्। स हि "सन्ततकर्मा भवति" रात्रौ ग्रामे मुष्णाति दिवा अरण्ये, एवम् "अहोरात्रकर्मा वा" एतदेतत्सन्ततकर्मत्वम्। "रशनाभिर्दशभिरभ्यधीताम्" इत्येव "तत्र" बाह्वोः "ज्यायान्" "गुणोऽभिप्रेतः" तयोः प्रशस्तत्वात्, अप्रशस्तत्वाच्च तस्करयोः कनीयान्॥ २॥

कुह स्विद्दोषा कुह वस्तोरश्विना कुहाभिपित्वं करतः कुहोषतुः। को वां शयुत्रा विधवेव देवरं मर्य्यं न योषा कृणुते सधस्थ आ। क स्विद्रात्री भवथः क्व दिवा क्वाभिप्राप्तिं कुरुथः क्व वसथः को वां शयने विधवेव देवरं

(देवरः कस्माद् द्वितीयो वर उच्यते) विधवा विधातृका भवति विधवनाद्वा विधावनाद्वेति चर्मशिरा अपि वा धव इति मनुष्यनाम तद्वियोगाद्विधवा देवरो दीव्यतिकर्मा मर्य्यो मनुष्यो मरणधर्मा योषा यौतेराकुरुते सधस्थानेऽथ निपाताः पुरस्तादेव व्याख्याता यथेति कर्मोपमा। यथा वातो यथा वनं यथा समुद्र एजति। भ्राजन्तो अग्नयो यथा। आत्मा यक्ष्मस्य नश्यति पुरा जीवगृभो यथा। आत्मानतेर्वाप्तेर्वापि वाप्त इव स्याद् यावद्व्याप्तिभूत इति। अग्निर्न ये भ्राजसा रुक्मवक्षसः। अग्निरिव ये (मरुतो भ्राजमाना रोचिष्णूरस्का) भ्राजस्वन्तो रुक्मवक्षसः ॥३॥

द्वितीयमुदाहरणमेतस्मिन्नर्थे "अथापि कनीयसा ज्याया-सम्" इति,—"कुहस्विद्दोषा" (ऋ० म० ७, ८, १८, २) इति। कक्षीवतो दुहिता घोषा नाम, तस्या इयमार्षम्। आश्विनी। जगती। प्रातरनुवाकाश्विनयोः शस्यते। हे अश्विनौ! 'कुह स्वित् दोषा' "क" नु युवां "रात्रौ" "भवथ ? 'कुह वस्तो' "क" वा "दिवा" भवथ" युवाम्? येन नापि रात्रौ अस्माकं दर्शनमुपगच्छथ, नापि दिवा। विदिति परिदेवनायाम्, ईर्ष्यायां वा। 'कुह' "क" च 'अभिपित्वम्' "अभिप्राप्ति" स्नानभोजनाद्यर्थं "कुरुथ"? 'कुह' "क" वा 'ऊषतु' "वसथ"? सर्वथा न विज्ञायते वासागमनप्रवृत्ति। किञ्च, 'को वां

शयुत्रा' कतमो युवां यजमानः शयुत्रा "शयने"? किं 'विधवा इव देवरम्' यथा विधवा मृतभर्तृका काचित् स्त्री शयने रहस्यतितरां यत्नवती देवरमुपचरति, स हि परकीयत्वात् नार्य्या दुराराध्यतरो भवति, यत्नेनोपचर्य्यते, न तथा निजो भर्त्ता। तस्मात् तेनोपमिमीते अश्विनौ। तथा 'मर्य्यं' मनुष्यं देवरम्। सैव मृतभर्तृका 'योषा' 'आ' 'कृणुते' आभिमुख्येन कुरुते। को वाम् एवम् आभिमुख्येन 'सधस्थे' "सहस्थाने" समाने सहयोगिना चात्मना कृत्वा परिचचार? येनेह नोपगतवन्तौ स्थोऽस्मद्दर्शनमिति। एवमस्यामृचि देवरेण कनीयसा ज्यायांसावश्विनावुपमीयेते, विधवया च यजमानः॥

अथैकपदनिरुक्तम्।—"विधवा विधातृका भवति"। धाता स तस्या विगत इति। "विधवनाद्वा" सा हि भर्तृमरणेन विधूता कम्पितेव भवति। "विधावनाद्वा" सा हि भर्तुरभावादनुरुध्यमाना तत्र तत्र विधावत्येव। "इति चर्मशिराः आचार्य्यो मन्यते। "अपि वा धव इति मनुष्यनाम तद्वियोगाद् विधवा। "देवरः"—इत्येष शब्दो "दीव्यतिकर्मा" दीव्यत्यर्थः, स हि भर्तुर्भ्राता, नित्यमेव तया भ्रातृभार्य्यया देवनार्थं व्रियत इति देवर इत्युच्यते। "मर्य्यः मनुष्यः" स हि "मरणधर्मा"। "योषा यौतेः" मिश्रणार्थस्य, सा हि मिश्रयत्यात्मानं पुरुषेण साकम्। "आ कुरुते सहस्थाने" आभिमुख्येन आत्मना कुरुते परिचरणाय॥

"अथ निपाताः" समाम्नाताः। यथा—"अग्निर्नये" इत्येव-

मादयः, ते चत्वारोऽवसरप्राताः। ते त्र पुनः "पुरस्तादेव व्याख्याताः" सामान्यतः, विशेषत इदानीमुदाहरणतो व्याख्यायन्ते। तत्र "यथा इति" एषा "कर्मोपमा"। किमुदाहरणम्? "यथा वातो यथा वनं यथा समुद्र एजति। एवा त्वं दशमास्य सहावेहि जरायुणा॥" इति (ऋ० सं० ४, ४, २०, ४)। सतवध्रिरात्रेयोऽपश्यत्। एषा अनुष्टुप्। गर्भानुमन्त्रणे विनियुक्ता। यथा वातवनसमुद्राः एजन्ते कम्पन्ते, एवं 'त्वं' हे 'दशमास्य' दशमाससम्भूत! गर्भ! एतस्मात् मातुरुदरात् अदुःखयन् एनाम् एजन् चलन् 'अवेहि' अर्वाङ् एहि, 'सह' 'जरायुणा' उल्वेण प्रजायस्व, मा स्थाः त्वमेतस्मिन्नुदरे इत्यभिप्रायः॥

अपरमुदाहरणम्,—"अदृश्रमस्य केतवो" विरश्मयो जनाँ अनु। भ्राजन्तो अग्नयो यथा॥" इति (ऋ० सं० १, ४, ७, ३)। प्रस्कण्वस्यार्षम्। गायत्री। सौरी सा। अनयातिरात्रो गृह्यते पृष्ठ्यस्य षष्ठेऽहनि। 'अदृश्रम्', 'अस्य' 'केतवः' रश्मयः 'वि' विविधाः दृश्यन्तेऽस्य भगवतः सूर्यस्य प्रज्ञानसतत्त्वाः, ते हि तमोऽपहत्य सर्वप्राणिनां प्रज्ञानमभिव्यञ्जयन्तीति त एव केतव इत्युच्यन्ते लक्षणया। अथवा प्रकाशसतत्त्वात्त इति साक्षादेव केतुशब्दस्तेषु स्यात्। केतुरिति विज्ञानमुच्यते, विज्ञानञ्च पुनः प्रकाशसतत्त्वाश्चैत इति केतव इत्युच्यन्ते। अथवा केतव इव सर्वतो दिशामुच्छ्रिता आदित्यमण्डले, ध्वजो हि केतुरुच्यते। के पुनस्ते? इति, 'रश्मयः'। किं कुर्वन्ति य एवमुच्छ्रिताः? इति, उच्यते,—'जनान् अनु' तिष्ठन्ति गच्छन्ति

समास्यपहन्तुमन्यांश्चोपकारान् कर्तुमोषधिपाकादीन्। कथं पुनस्तुतिष्ठन्ति? 'भ्राजन्त' दीप्यमाना। कथम्? 'अग्नयो यथा' येन प्रकारेण अग्नयो भ्राजन्ते, तथा भ्राजन्तोऽनुतिष्ठन्ति॥

अपरमुदाहरणम्,—"यदिमा वाजयन्नहमोषधीर्हस्त आदधे। आत्मा०—" इति (ऋ० सं० ८, ५, १०, १)। आथर्वणो भिषक्, तेनेयमोषधिस्तुतिर्दृष्टा। अनुष्टुप्। एतेन पुनरपतनो दीक्षितो एकविंशतिमिर्दर्भपिञ्जूलीमिश्चाभिरद्भिरभिषिच्यते। उपतापशान्त्यर्थमनेनैव सूक्तेनाग्निचयनार्थं क्षेत्र प्राप्यारण्याभिरोषधिभिरज्यते। 'यत्' 'यदा' अहम् 'इमाः' 'ओषधीः' 'हस्ते' 'आदधे' आधाय च सन्निकर्षेऽपि तिष्ठामि रोगिणः एता ओषधीः 'वाजयन्' पूजयन् स्तुवन्नित्यर्थः। अथ तदैव तदनन्तरमेव 'पुरा' एव तासामोषधीनां प्रयोगात्, अस्मात् सुनीतम् औषधिवीर्यम्, असह्य मत्वा 'आत्मा' 'यक्ष्मस्य' यक्ष्मणः 'नश्यति' रोगस्य पुनरागमनाय। कथं पुनर्नश्यति? 'जीवगृभः यथा' यथा जीवग्राहस्य, पुरैव हननात्, आहतस्यैव जीवो नश्येत् म्रियतो दैवात्, एवमात्मा रोगस्यापि पुरैवौषधिप्रयोगात् नश्यतीत्यभिप्रायः॥

निगमप्रसक्तमुच्यते,—"आत्मा अततेर्वा" सर्वमेव हि तेना-तितं भवति सर्वगत्वात्। "आप्तेर्वा" सर्वमेव हि तेन व्याप्तं भवति सर्वगतत्वादेव। "अपि वाप्त इव" स्यादिति, सर्वो कार्यकारणाय "यावद् व्याप्तिभूत इति" अपि नैवमन्यथा "स्यात्" आप्तो व्याप्त इव स्यात्। किञ्च सर्वगतत्वेऽपि सति यावन्मात्रमेव तस्य कार्यकारणसङ्घातेन व्याप्यते, तावन्मात्रभूत

एवासौ लक्ष्यते, तावन्मात्रे हि प्रदेशे तस्य चैतन्यशक्तिरभिव्यज्यते, तथायसि दर्भमुष्टिप्रक्षेपात् अग्न्यभिव्यक्तिवदिति।' सूक्ष्मेण हि स्थूलं व्याप्यते, न स्थूलेन सूक्ष्मम्, स्थूलञ्च कार्य्यकारणम् सूक्ष्म आत्मा, तस्मादिवशब्दः॥

"इदं यथा (२)", "अग्निर्नये (३)", चतुरश्चिद् ददमानात् (४)"—इत्येषः समाम्नायानुक्रमः। अग्निर्नय इत्यस्य निघण्टुतन्त्रस्य "दुर्मदासो न सुरायाम्"—इत्यनेनैव गतार्थतेति मन्यमानाः केचिदत्र निगमं नाधीयते, अपरे पुनः समाम्नायानुक्रमोऽयमिति मन्यमाना एवमेवं निगममधीयते। "अग्निर्नये भ्राजसा रुक्मवक्षसो वातासो न स्वयुजः सद्य ऊतयः। प्रज्ञातारो न ज्येष्ठाः सुनीतयः सुशर्माणो न सोमा ऋत यते॥" (ऋ० सं० ८, ३, १२, २) भार्गवस्य त्रसदस्योरियमार्षम्। मारुती। जगती। अग्निरिव ये भ्राजिष्णुतया गेचनाः, यथा केनचित् प्रकर्षेण 'रुक्मवक्षसः' रोचिष्णूरस्काः, मरुतः। किञ्च, 'वातासो न स्वयुजः सद्य ऊतयः' वाता इव स्वयुजः स्वेन स्वेनानुग्रहेणानुग्राह्याणां स्तोतॄणां योजयितारो ये ते 'स्वयुजः'। किं तेषाम्? 'सद्य ऊतयः' शीघ्रगतय इत्यर्थः। किञ्च, 'प्रज्ञातारो न ज्येष्ठाः सुनीतयः' यथा केचित् प्रकर्षेण ज्ञातारः 'सुनीतयः' स्युः, प्रशस्तया नीत्यान्विताः, एवमेतेऽपि मरुतः। बलप्रधाना हि ते इत्यतः प्रज्ञावद्भिरुपमीयन्ते। सुशर्माणो न सोमा ऋतं यते। सुखाः बन्धव इव सन्तु 'सोमाः' सोम्याः 'ऋतं यते' ऋतं यज्ञं कर्तुमिच्छते यजमानाय। ये एवङ्गुणयुक्ता मरुतो भवन्त्विति,

तान् वयम् अभिप्रेतार्थसिद्धये स्तुम इति वाक्यशेषः ॥ ३ ॥

चतुरश्चिद्ददमानाद्विभीयादा निधातोः। न दुरुक्ताय स्पृहयेत्। चतुरोऽक्षान् धारयत इति तद्यथा कितवाद् विभीयादेवमेव दुरुक्ताद् विभीयान्न दुरुक्ताय स्पृहयेत् कदाचिदा इत्याकार उपसर्गः पुरस्तादेव व्याख्यातोऽप्युपमार्थे दृश्यते। जार आ भगम्। जार इव भगमादित्योऽत्र जार उच्यते रात्रेर्जरयिता स एव भासां तथापि निगमो भवति। स्वसुर्जारः शृणोतु न इत्युषसमस्य स्वसारमाह साहचर्याद्रसहरणाद्वापि त्वयं मनुष्यजार एवाभिप्रेतः स्यात् स्त्रीभगस्तथा स्याद् भजतेरेव इति भूतोपमा। मेषो भूतो३ भियन्नयः। मेषो मिषतेस्तथा पशुः पश्यतेरग्निरिति रूपोपमा। हिरण्यरूपः स हिरण्यसन्दृगपान्नपात्सेदु हिरण्यवर्णः। हिरण्यवर्णस्येवास्य रूपं

विदित्ययमपरो निपात उपमार्थीयो भवति, पुरस्ताद्प्ययमुक्तः "दाधचिदित्युपमार्थे" इदानीं समाम्नायविशेष व्याख्यानाचसरप्राप्तस्य छान्दसमुदाहरणमस्य प्रदर्श्यते। कतमत् पुनस्तत्? इति, उच्यते,—"चतुर स्पृहयेत्"। (ऋ० सं० १, ३, २३, ४)। मित्रावरुणार्य्यमृणतृत्रे घोरपुत्र एतां गायत्रीमपश्यत्। चतुरोऽक्षान् धारयमाणात् "कितवात्" योऽन्यः कितवो "विभीयात्" किमपि यतिष्यन्ते तदन्यद्वा किञ्चिद् येन मामयं जेष्यतीति। निहितेषु न तथा भयं भवति यथा कितवस्य प्राङ् निधानात्। "एवं" सर्वदा "एव" "दुरुक्तात्" "विभीयात्" उद्विजेदित्यर्थः। तथा तथा वर्त्तेत यथा यथा दुरुक्तं न शृणुयात्, न श्रूयते। दुरुक्ते हि वरुणो देवता, तस्मात् "न दुरुक्ताय स्पृहयेत्" "कदाचित्" अपि किन्तु सूक्तमेव हि शृणुयात्, तत्र हि मित्रो देवता अर्य्यमा च॥

"ब्राह्मणा व्रतचारिणः"—इत्येतदुपरिष्टाद् व्याख्यास्यते—"संवत्सरं शशयाना (ऋ० सं० ५, ७, ३, १)"—इत्येतस्मिन् मन्त्रे, चतुर्दशेऽध्याये॥

"वृक्षस्य नु ते पुरुहूतवयाः"—इत्येतत् पुरस्ताद् व्याख्यातम्॥

"आ इत्याकार उपसर्गः" स पुनरेषः "पुरस्तादेव व्याख्यातः" —"आ इत्यर्वागर्थे" इति, "अथापि" अयमाकारः कदाचित् "उपमार्थे" अपि "दृश्यते"। तद्यथा,—"जार आ भगम्" इति। किमुक्तं भवति? जार इव भगम्"—इति। आह,—कोऽयमत्र जार उच्यते? "आदित्योऽत्र" "जारः" इति "उच्यते" अस्मिन्

मन्त्रे। स हि "रात्रेर्जरयिता" तदुदये हि रात्रिर्जीर्यते विपरणमतीत्यर्थः। "स एव भासाम्" चन्द्रादीनां या भासः ता अपि स एव उद्यन् जरयति ॥

"उदीरय पितरा जार आ भगमियक्षति हर्यतो हृत्त इष्यति। विवक्ति वह्निः स्वपस्यते मुखस्तविष्यते असुरो वेपते मती॥" (ऋ० सं० ७, ६, १०, १)। अङ्गिरःपुत्रो हविर्धानि एतया जगत्या अग्निमस्तौत्। पितृमेधे विनियुक्ता। हे भगवन्नग्ने! सर्वगतं सन्तमदोपस्थमात्मानं विशेषात्मलाभाय 'उदीरय' उद्गमयैव। अरणी पितरौ प्रति, अथवा द्यावापृथिव्यौ पितरौ स्याताम्, "द्यौर्मे पिता माता पृथिवी॥" (ऋ० सं० २, ३, २०, २)। अहोरात्रे वा, ते प्रति विशेषात्मलाभायोज्ज्वलय त्वमात्मानम्। कथञ्च पुनरुदीरय। 'जार आ भगम्' जार इव भगम्। जार आदित्यो यथा भगं भजनीयं भौममान्तरिक्षञ्च रसं स्वं वा ज्योतिरूर्ध्वमीरयति, एवं त्वमात्मानं पितरौ प्रत्युदीरय। कस्मात् पुनरेवमादरयान् ब्रवीमि। यस्मादेव यजमानः 'इयक्षति' यष्टुमिच्छति देवान्, 'हर्यतः' हवींषि प्रेप्स्यन्, न च त्वदृते शक्येऽयम्, त्वमेव 'हि प्रतिविशिष्ट' यज्ञसाधनं सर्वमन्यत्र चैवद्गुणभूतम्। किञ्च, अयं यजमानः 'हृत्तः' हृदयेन 'इष्यति' इच्छत्यात्मनोऽभिलषितान् कामान्, न च देवानिष्ट्वा शक्यान्ते प्राप्तुमिति अतो ब्रवीमि,—देवयागाय यजमानकामप्राप्तये च उदीरय त्वमात्मानमिति। किञ्च, अयमपि 'वह्नि' यज्ञवोढा होता 'स्वपस्यते' यजमानाय अभीष्टकामोपपिपादयिषया

देवतितर्पयिषया च तृप्तये जगदनुग्रहाय च ऋत्विग्भिः कर्म क्रियमाणमिच्छति 'विवक्ति' च अतो ब्रवीमि,—आत्मानमभ्युदीरय पितरौ प्रति विशेषात्मलाभाय। 'किञ्च' 'मखः' 'तचिष्यते' परिसमाप्तिं यास्यति उपक्रमादारभ्यापवर्गात्, अतो ब्रवीमि,—उदीरय त्वमात्मानमिति। किञ्च, अयमप्यध्वर्युः 'असुरः' असुमान् प्रज्ञावान् अतिकुशलः अस्मिन् यज्ञकर्मणि 'वेपतेमर्ता' मत्वा वेपते प्रोत्कम्पमानहृदय आस्ते सादरः प्रह्वीभूतः, अपि नामायमुदीरयेदात्मानं ततोऽहमेनयज्ञकर्म तनुयामिति; अतो ब्रवीमि,—उदीरय त्वमात्मानमिति। अपि वा असुरो ब्रह्मा, स हि त्रयीविद्योपजनितप्रज्ञानः। अपि वोद्गाता असुरः, स हि प्राणेनासुना तद्वान्, उद्गातृत्वस्य प्राणवृत्त्यधीनत्वाद् विशेषणम्। अपि वा यज्ञाधिदेवतैवान्वादिश्यतेऽसुर इत्यनेन तस्या आनन्तर्य्यात्। अपि वा सर्व एवैते यजमानादयोऽन्वादिश्येरन्, सर्वेषां प्रकृतत्वात्। 'असुरः' असुराः 'वेपते' वेपन्त इति, सर्व एते यजमानादयोऽसमन्तः मतिभिर्वेपन्तो प्रोत्कम्प मानहृदया आसते, युष्मदात्मोदीरणप्रतीक्षाः। अपि नाम अयमग्निरुदीरयेदात्मानं ततो नोऽभिप्रेतार्थसाफल्यं स्यादिति, अतो ब्रवीमि,—उदीरयत्त्वमात्मानमरण्यादीनां पितृणामन्यतमौ पितरौ प्रति। अपि चैतावेव पितरौ दम्पती पत्नी यजमानौ अग्न्याधेयेन नवजननसम्बन्धेन पितरः। हे भगवन्! अग्ने! तावेतौ यज्ञविपरिणामकाले एतस्मिन् प्रत्युपस्थिते देवयानेन वा पितृयानेन वा मार्गेण उदीरय उद्गमय यथाप्रार्थितफलप्राप्तये। समानमन्यद्दृक्(शो)पं पूर्वेणार्येन॥

यथा आदित्यो जारशब्देनोच्यते "तथा अपि" अयं "निगमो भवति" (अथान्येऽपि वहवः इत्यपिशब्दः),—"मातुर्दिधिषुमब्रवं स्वसुर्जारः शृणोतु नः। भ्रातेन्द्रस्य सखा मम॥" (ऋ० सं० ४, ८, २१, ५)। एषा गायत्री। भरद्वाजस्यार्षम्। "एहि वां विमुचो नपादाघृणे: (ऋ० सं० ६, ५, ६, १)"—इत्येतस्मिन् पौष्णे सूक्ते। 'मातुः दिधिषुम्' माता रात्रिरादित्यस्य, स हि भगवान् राज्या जघने प्रातरुदेति कुमार इव स्त्रियाः प्रसवकाले, तेन ज्ञायते रात्रेरेवासौ जायत इति, अतो रात्रिर्माता, तस्याः स एवं धारयिता रोद्धा, तम् 'मातुर्दिधिषु' धारयितारमहम् 'अब्रवम्' उक्तवानस्मि यन्मेऽभिप्रेतम्। स एव चादित्यः 'मम' 'सखा' समानख्यानः। यथैवाहमेतस्मिन् यज्ञे जगदनुग्राहके कर्मणि अभिप्रवृत्तः, एवमसावपि प्रकाशपाकरसादानवर्षादिलक्षणे कर्मणि जगदनुग्राहके अभिप्रवृत्तः, इत्येतस्मादावयोऽसमानख्यानत्वम्। यत एव मम समानख्यानः, अतो मध्यमस्य च 'इन्द्रस्य' 'भ्राता' उदकभागहर्त्ता अथ वा मध्यमस्यैवोदकेन भर्त्तव्यः, तेन ह्यसौ दीप्यते। स पुनः किं करोतु? यच्च पूर्वमहमब्रवं तच्च साधयतु, साम्प्रतञ्च यद् ब्रूमः, तच्च 'शृणोतु' श्रुत्वा च तदपि साधयत्वित्यभिप्रायः। 'स्वसुर्जारः' इति। अस्मिन् मन्त्रे स्वसृशब्देन मन्त्रदृक् "उषसम्" "आह"। केन पुनः सामान्येनेति? उच्यते,—"साहचर्य्यात् रसहरणाद्वा", भ्राता स्वस्रा सार्कं यात्यै नित्यमेव चरति, यथा चोषसा सार्कमादित्य इत्येतत् सामान्यम्। आदित्यो हि पूषा, "अथ

यद्रश्मिपोषं पुष्यति, तत् पूषा भवति"—इति हि वक्ष्यति। तस्मात् पूष्णः एतस्मिन् मन्त्रे जारत्वमेतत् आदित्यस्य दर्शितम्। रसहरणाद्वा उषाः स्वसादित्यस्य। भ्रातृस्वस्रोः सम्भोजनाभिप्रायसामान्यम्। "अपि त्वयं मनुष्यजार एवाभिप्रेतः स्यात्" अथादित्योऽपि मनुष्यजारः। अयमेवास्मिन् मन्त्रे "उदीरय पितरा जार आ भगम् (ऋ० सं० ७, ६, १०, १)" इत्यभिप्रेतो मन्त्रदृश', नैरुक्तानां वा स्यात्। "तथा" पुनः सति "स्त्रीभगः" एव "स्यात्"। भगः "भजतेः" सेवनार्थस्य, स हि सेव्यते मैथुनार्थिभिः पुरुषैः। जारो मनुष्यः, स हि परकीयां स्त्रियं भोगेन सार्वाङ्गिकेण निर्दयो भूत्वा जरयति विपरिणामयति, म्लानरूपां करोति, न तथा निजो भर्त्ता। तं च दृष्टान्तदर्शनेनैवोदीरय,—तथैव स्त्रियाः भग उपस्थः, पुरुषशिश्नसंयोगे आर्द्रीभवति, एवमरणियोरश्वादिहस्तानस्मान् युष्मन्निमन्थिपून् दृष्ट्वोदीरय त्वामात्मानं हे भगवन्नग्ने! इत्येवं योऽयं जारशब्दे मनुष्यविषये सति॥

"मेष इति भूतोपमा" मेष इत्येषा भूतशब्देनोपमा। "मेषो भूतोऽ भि यन्नयः (ऋ० सं० ५, ७, २४, ५)"—इत्येष निगमः। निगमप्रसक्त उच्यते,—"मिषो मिषतेः" दर्शनार्थस्य। पर्य्यायप्रसक्तमुच्यते,—"तथा पशुः पश्यतेः" इति, पश्यति ह्यसौ। "इत्था धीवन्तमद्रिवः काण्वं मेध्यातिथिम्। मेषो भूतोऽ भि यन्नयः॥" (ऋ० सं० ५, ७, २४, ५)। काण्वस्यैव मेध्यातिथेरियमार्षम्। ऐन्द्री। गायत्री। हे 'अद्रिवः' अद्रिवन्! वज्रिन्!

'इत्था' अमुना प्रकारेण 'मेषो भूतः'। इत्थमनेन शब्देन अमुनेत्येतच्छब्दपर्य्यायवाचिना अभिगमनप्रकारमेतस्मादेव मन्त्रदृग्दर्शनाद् विज्ञाय अभिनयेन मन्त्रदृग्वर्त्तमानः काण्वो मेधातिथिर्दर्शयति,—हे अद्रिवन्! एवमन्यकल्पान्तरीणमेव 'मेध्यातिथिं धीवन्त' कर्मवन्तं वा 'अभियन्' आहर्त्ता यज्ञे कर्मणि आभिमुख्येनाभ्युद्यतेर्महद्भिर्दायैः 'यन्' गच्छन्, आह्वानसमनन्तरमेव अचिन्त्यमानः 'मेषो भूतः' मेष इव किञ्चिदप्युत्तरमत्रुवन् तं गौरवावगतमित्था अनेन प्रकारेण श्रयस्त्वम् आप्तवानसि। न च तदस्माकमप्रत्यक्षम्। एतस्मादेव मन्त्रदर्शनादखिलं तद् विजानीमो वयं यतोऽतो ब्रूमः। अपवृत्ते तस्मिन् काण्वे मेध्यातिथौ सहान्यमन्वन्तरीणैरधिकारिभिरिदानीमस्य मनोरन्तरे मेधातिथिप्रापकेण कर्मणा मेधातिथिपदम्, तदहं प्राप्तवान्। सोऽहं ब्रवीमि,—याः ताः काण्वमेधातिथिद्वारेण स्तुतयः नित्याः प्रादुर्भवन्ति। एतासां प्रतत्वमपि वर्त्तते। स त्वमेताः शुश्रूषुः, हवींषि वास्मत्प्रदत्तानि प्रतिजिघृक्षुः, पूर्वकाण्वमेधातिथिवदस्मानप्यभ्येहि, किमर्थं वा नाभ्येषीत्यभिप्रायः॥

"अग्निरिति" एषा "रूपोपमा"। "हिरण्यरूपो हिरण्यवर्णः हिरण्यात् परि योनेर्निषद्या हिरण्यदा ददत्यन्नमस्मै॥" (ऋ० सं० २, ७, २२, ५)। गृत्समदस्यैयमार्षम्। त्रिष्टुप्। अपान्नपात् देवता। कुम्भेष्टकोपाधानेऽग्निचयने विनियुक्ता। 'हिरण्यरूपः' हिरण्यसमानरूपः। अपि च, 'सः' 'अपान्नपात्' मध्यस्थानो वैद्युतोऽग्निरादित्यस्य पुत्रोऽपान्नपात्, प्रावृट्काले घर्मार्त्तानां प्रजानामन्नाभि-

नीनां च 'हिरण्यसन्दृक्' हिरण्यमिव सन्दृश्यमानः मनःप्रीतिजनकः। अपि च, स एव 'हिरण्यवर्णः, हिरण्यमिव वरणीयः प्रार्थनीयो भूतानाम्। य एवङ्गुणयुक्तोऽपान्नपात्, स किं करोतु? इति,—'हिरण्ययात्, तेजोमयात् 'योनेः' आदित्यात् विनिर्गत्य 'परिनिषद्य' सर्वतो निषद्य मध्यस्थाने अभ्रजालेनान्तरिक्षलोकं व्याप्य ('हिरण्यदाः'—इत्येकं पदम् विसर्जनीयान्तम्) 'हिरण्यदाः' हिरण्यदाता। सोऽपान्नपात् परिपन्न 'ददति' ददतु 'अन्नम्' अन्नहेतुदकम् 'अस्मै' यजमानाय इति। "समुद्रादूर्मिर्मधुमाँ उदारत्" (ऋ० सं० ३, ८, १०, १)—इत्यादिष्वमुक्तं मन्यन्ते, इत्येतस्माद् दर्शनादपां पुत्र आदित्यः। "आद्दृतो अग्निमभरद् विवस्वतः" (ऋ० सं० ४, ५, १०, ४)—इत्यतश्चादित्यस्यापि वैद्युतोऽग्निः पुत्रः, इत्येवमसावपान्नपात् अपां नप्ता॥

'था'—इत्ययं चोपमाशब्दः। आह,—किमुदाहरणम्? उच्यते,—"तं प्रत्नथा पूर्वथा विश्वथेमथा ज्येष्ठतातिं बर्हिषदं स्वर्विदम्। प्रतीचीनं वृजनं दोहसे गिराशुं जयन्तमनु यासु वर्धसे॥" इति (ऋ० सं० ४, २, २३, १)। अवत्सारः पञ्चदशर्चं सूक्तमपश्यद् वैश्वदेवम्, तस्मिन् वैश्वदेवे सूक्ते प्रथमामेवैतां जगतीमपश्यत्। वैश्वदेवेषु च सूक्तेषु एकदेवता अपि मन्त्रा भवन्त्येव। याह्ये वाजपेये मनदयो शम्बे विनियुक्तोऽयम्। चरकाध्वर्यवः पुनरनया मन्थिनं गृह्णन्ति। तेषां पुनः श्रुतिः,—"प्रजापतेर्वा एते चक्षुषी यच्छुक्रामन्थिनौ, असावादित्यः शुक्रः, चन्द्रमा मन्थीत्येवं चन्द्रदैवतोऽयं मन्त्रः। अपि वा

"तस्मै सूर्याय हविरानुहोत"—इति हवनमन्त्रे सूर्यश्रवणात् सूर्यदेवतोऽयम्। शौनकस्तु दाशतये समाम्नाये मन्त्रदेवता अनुक्रममाणः "को नु वां मित्रावरुणौ (ऋ० सं० ५, ३, ६ सू०)"—इत्यत आरभ्य वैश्वदेवान्येकादशसूक्तान्यवोचत्, "तं प्रत्नथा (ऋ० सं० ५, ३, १२ सू०)"—इत्येतच्चतुर्थं सूक्तम्, तेन तन्मत्या वैश्वदेव एव मन्त्रः स्यात्। वाजसनेयिनां पुनरनया शुक्रो गृह्यते, स च सा प्रथमा संस्कृतिरित्यनेनैन्द्रेण हूयते, तेन तेषामप्ययमैन्द्र एव। नारके पुनराध्वर्य्ये श्रुतिः शुक्रामन्थिनोः, तस्मादेतावन्यदेवतौ गृह्येते। अथेन्द्राय हूयते इति तेन ज्ञायते। यद्यपि हवनमन्त्र ऐन्द्रो मन्थिनः, तथापि ग्रहणमन्त्रो नैन्द्र इति, स एव सर्वथाप्येवं दुरवधारदेवतो मन्त्रः, अनिरुक्तदेवतालिङ्गत्वात्। शण्डामर्कयोस्त्वसुरपुरोधसोः सम्मोहनार्थमनेनानिरुक्तदेवतालिङ्गेन मन्त्रेणान्यतरः शुक्रामन्थिनोर्गृह्यते। "शण्डामर्कौ वा असुराणां पुरोहितावास्ताम्"—इत्युपक्रम्य "तावेतौ शुक्रामन्थिनावागृणीयाम्"—इत्युक्त्वा "तावपनुद्यायेन्द्रायां जुहुयु"—इत्युक्तम्। तस्मात्तावनेनानिरुक्तदेवतालिङ्गेन मन्त्रेण हम्मोहते। सौम्यो वा स्यादप्ययम्, सोमो ह्युच्यते मन्थिपात्रेण शुक्रपात्रेण गृह्यमाणः, गृह्यतो वा सवदशाम्नवंसनाभिप्रायेण। हे भगवन्! सोम! तमिन्द्रं वा वैश्वदेवं गणं वा 'ज्येष्ठराजं' ज्येष्ठदीप्तिम्। अथ वा ज्येष्ठः श्रेष्ठः सर्वेषां देवानामिन्द्रः, स यस्य राजा, सोऽयं ज्येष्ठराट् वैश्वदेवगणः, तं ज्येष्ठराजम्। बर्हिष्यासृतो यज्ञभिः यः सीदति, स बर्हिषत्, तं 'बर्हिषदम्'।

स्वरिव यो दृश्यते, सः स्वर्दृक्, तं स्वर्दृशम्' सूर्यसमानदर्शनमित्यभिप्रायः। 'आशु' शीघ्रम्। 'जयन्तं' जेतव्यानसुरादीन्। तमेवङ्गुणसंयुक्तम् इन्द्रं' वैश्वदेवं सगणं हे सोम! 'यासु' क्रियासु 'अनुवर्द्धसे' पुनः पुनः संस्क्रियसे। स त्वं क्रियासु तासु तथावस्थितस्त्वं 'गिरा' स्तुत्या सहितः त्वं 'प्रतीचीनं' यज्ञाभिमुखम् इन्द्रं वैश्वदेवं वा गणम् अवस्थाप्य स्ववीर्य्येण तर्पयित्वा अस्मै यजमानाय 'वृजनं' धनं 'दोहसे' धोक्षि प्रक्षारयसि। कथं पुनः धोक्षि इन्द्रं वैश्वदेवं वा गणम्? 'प्रत्नथा' चिरन्तना इव। ये महर्षयो भृग्वादयः, तेषां यथा दुग्धवानसि, तथा अस्माकमपि धोक्षि। अपि च 'पिरवथा' ऋषिपुत्रकाणामृषीणाञ्च सर्वेषां यथा' दुग्धवानसि, तथाम्माकमपि धोक्षि। अपि च 'इमथा' यथा वर्तमानकालीनानां यजमानानां धोक्षि, तथैवाम्माकमपीति। एवमेव यथाभिमतदेवतं योज्यः॥

इमथेत्येतस्मात् प्रसक्तमुच्यते,—"अयम्" इत्यस्य शब्दस्य का व्युत्पत्तिरिति? उच्यते,—"एततर." हि आगततर आसन्नतरः "अमुष्मात्" दूरस्थात् भवति, सोऽयमित्युच्यते। "असावित्यस्य का व्युत्पत्तिरिति? उच्यते,—"असौ अस्ततर." अस्मात् क्षिप्ततर इव विप्रकृष्टत्वाद् भवति। आह,—पुनः क्षिप्ततरः? उच्यते,—"अस्मात्" एततरात्। असावित्येतस्मात् प्रसक्तमुच्यते,—"अमुथा, यथा असौ इति" असावित्यनेन शब्देनोक्तो भवति, स एवार्थः अमुथेत्यनेनाप्युक्तो भवति॥

"वदिति" एषा "सिद्धोपमा" सिद्धैवैषोपमा लोके। आह,—

कथं कृत्वा? उच्यते,—"ब्राह्मणवत्, वृषलवत्"। ब्राह्मण वदधीते, वृषलवच्चाक्रोशतीति ॥ ४ ॥

प्रियमेधवदत्रिवज्जातवेदो विरूपवत्। अङ्गिरस्वन्महिव्रत प्रस्कण्वस्य श्रुधी हवम्। प्रियमेधः प्रिया अस्य मेधा यथैतेषामृषीणामेव प्रस्कण्वस्य शृणु ह्वानं प्रस्कण्वः कण्वस्य पुत्रः कण्वप्रभवो यथा प्राग्रमर्चिषि भृगुः सम्बभूव भृगुर्भृज्यमानो न देहेऽङ्गारेष्वङ्गिरा अङ्गारा अङ्कना (अञ्चना) अत्रैव तृतीयमृच्छतेत्यूचुस्तस्मादत्रिर्न त्रय इति विखननाद्वैखानसो भरणाद्भारद्वाजो विरूपो नानारूपो महिव्रतो महाव्रत इति ॥ ५ ॥ (१७)

इति तृतीयाध्यायस्य तृतीयः पादः ॥ ३, ३ ॥

छान्दसमुदाहरणं ब्रवीति,—"प्रियमेधवत्"—इति। एषा प्रस्कण्वस्यार्षम्। अनुष्टुप्। आग्नेयी प्रातरनुवाकाश्विनयो शस्यते। हे 'जातवेद' 'महिव्रत' महाव्रत! महाकर्मन्! महद्रूपस्य भगवतो जातवेदस कर्म, हविर्वहना(ना)दिलक्षणम्, तेनैवाभिख्यातो महिव्रत! इति। यथैवाग्नृषीणां प्रियमेधादीनां श्रुतवानसि पूर्वमाह्वानम्, शृणोषि वा, एवं ममापि 'प्रस्कण्वस्य' शृणु आह्वानम्। इत्याशीः ॥ एष मन्त्रार्थः ॥

अथैकपदनिरुक्तम्।—"प्रियमेध, प्रिया अस्य मेधा" यज्ञा इत्यर्थः। यज्ञमिति वाक्यशेषः। "प्रस्कण्व, कण्वस्य पुत्र" प्रपदस्य

तद्धितार्थत्वं निराह, कण्वस्यापत्यमित्यर्थः। "यथा" प्रगतमग्रं "प्राग्रम्" इत्युच्यते, गतशब्दलोपं कृत्वा, एवमिहापि "कण्व-प्रभवः" इति वक्तव्ये भवशब्दलोपं कृत्वा व्यत्ययेन च प्रस्कण्व इत्युक्तम्। "भृगुः, भृज्यमानो न देहे" प्रजापतिना किल शुक्रमात्मीयमादाय अग्नौ हुतम्, ततः "अर्चिषि" ज्वालायां "भृगुः" नाम महर्षिः "सम्बभूव" व्यपगतेऽर्चिषि योऽङ्गारेषु सम्बभूव सोऽङ्गिरा नाम अभवत्। विग्रहप्रसक्तमुच्यते,—"अङ्गारा अङ्कनाः" ते हि यत्र निर्धीयन्ते तदङ्कितं भवति। तस्मिन्नुत्पन्ने द्वितीये "अत्रैव तृतीयमृच्छत"—"इत्यूचुः" ये पूर्वोत्पन्नाः ते। "तस्मात्" अत्रैव तृतीय इत्येतस्मादनुव्याहारात् "अत्रिः" अभवत्। अथवैवमन्यथा स्यात्,—अत्रिः प्रतिषेधार्थोऽकारः। कथम्? "न त्रयः" एवात्र, किन्तर्हि? सन्यतामेतदग्निस्थानं चतुर्थोऽप्यत्र भविष्यतीत्येवमनुव्याहारादत्रिरभवत्। व्युदूहाग्नि तस्मिन्नग्निस्थाने य उत्पन्नः सः "विखननाद् वैखानसः" एव नाम्ना अभूत्, "वभूवार्चिःषु अङ्गारेषु तत्रैव तृतीयं विखननाद् वैखानसः" इति। अनयैवानुपूर्व्येणैतानि निर्वचनान्युपपादयितुं शक्यन्ते, तस्मान्मन्त्रपाठविपर्यासेनैतानि निरुक्तानि। "विरूपो नाना-रूपः" इति प्रज्ञैव। व्रतमिति कर्मनाम। "महिव्रतो महा-व्रतः" "इति" अर्थः ॥ ७ ॥

इति निरुक्तवृत्तौ अष्टमाध्यायस्य (तृतीयाध्यायस्य)

तृतीयः पादः ॥ ३, ३ ॥

चतुर्थः पादः

अथ लुप्तोपमान्यर्थोपमानीत्याचक्षते सिंहो व्याघ्र इति पूजायां श्वा काक इति कुत्सायां काक इति शब्दानुकृति-स्तदिदं शकुनिषु बहुलं न शब्दानुकृतिर्विद्यत इत्यौप-मन्यवः काकोऽपकालयितव्यो भवति तित्तिरिस्तरणात्ति-लमात्रचित्र इति वा कपिञ्जलः कपिरिव जीर्णः कपिरिव जवत ईषत्पिङ्गलो वा कमनीयं शब्दं पिञ्जयतीति वा श्वाशुयायी शवतेर्वा स्याद्गतिकर्मणः श्वसितेर्वा सिंहः सहनाद्धिंसेर्वा (स्यात) विपरीतस्य सम्पूर्वस्य वा हन्तेः संहाय हन्तीति वा व्याघ्रो व्याघ्राणाद् व्यादाय हन्तीति वा ॥ १ ॥ (१८)

"अथ लुप्तोपमान्यर्थोपमानीत्याचक्षते"। उपमाधिकारो वर्त्तते। "यदेतत् तत्सदृशमिति"—एतदुपक्रान्तम्। तत्र शब्द-वत्यश्चोपमा भवन्ति, लुप्तोपमाशब्दाश्च। तत्र "अग्निर्न ये" इत्ये-वमादिभिः शब्दैरुपमित्सितानामर्थानां समानरूपैरर्थस्य मानं क्रियत इत्येदनुक्रान्तम्। अथ इदानीं येषु पदेषु लुप्यन्ते उपमा-शब्दा इवादयः, तान्यवसरप्राप्तानि व्याख्यास्यामः, तानि पुनरि-मानि अर्थोपमानीत्येवमाचक्षते आचार्य्याः, निरूढा क्रियते

सन्नित्यभिप्रायः। तानि च पुनरसमाम्नातान्येव निघण्टुसमाम्नाये. तेषु वक्तुरभिप्रायगता एत एवोपमाशब्दा अर्थत उपमीयन्त इत्यर्थोपमा इत्युच्यन्ते। तान्येतानि भाष्यस्य विस्तरविषयत्वात् समाम्नातान्यपि सन्ति अवसरप्राप्तानि प्रदर्श्यन्ते। तद्यथा, —"सिंहो व्याघ्र इति पूजायाम्"। यो हि पूज्यो भवति स उच्यते 'सिंहो देवदत्तः' इति। अत्र न सिंह एव देवदत्तः किन्तर्हि? सिंहगुणस्तत्र कश्चिदस्ति शौर्यादिः, अतस्तदभिधानेनोपमार्थं कृत्वोपमाशब्दानामिवादीनामन्यतममनुच्चार्यत्वेव ब्रवीति 'सिंहो देवदत्तः' इति। यत्तदनुच्चारणमुपमाशब्दस्य स एव लोप इत्युच्यते॥

"श्वा काक इति कुत्सायाम्"। यो हि लौल्यादिदोषसमन्वयेन कुत्सनीयो भवति, स एवमुच्यते,—'श्वा अयम्' इति। अत्रापि श्वेवायमिति इवशब्दस्य लोपो द्रष्टव्यः। धाष्टर्यादिदोषसमुच्चयेन यः कुत्स्यते, सः 'काकोऽयम्' इत्युच्यते। काकादिशब्दान् उदाहरणप्रसङ्गान् निर्ब्रवीति,—"काक इति शब्दानुकृतिः"। अनुकरणमनुकृतिः, शब्दस्यानुकृतिः, यादृशमेवासौ शब्दं करोति तथैवानुकृत्या तस्य नामापि भवति शब्दस्यानुकृतिः। स हि काकु इति वोच्यते, तस्मात् स काक इत्युच्यते। "तदिदम्" एवं शब्दानुकृतिहेतुकं नाम "शकुनिषु" एव तान्येषु सत्वविशेषेषु "बहुलं" प्रायेणेत्यर्थः। "न शब्दानुकृतिर्विद्यत इत्यौपमन्यवः" शकुनिष्वपि न शब्दानुकृतिहेतुकं नाम विद्यते, इत्यौपमन्यव आचार्यो मन्यते। किं कारणम्? व्यभिचारित्वात्।

श्यामा, दर्वी, पुच्छप्लवः, हंसः, इत्येवमादिष शब्दानुकरणहेतुको नामधेयप्रतिलम्भो नास्ति। शकुनिपक्षेऽपि शब्दानुकारो न विद्यते। यद्धोऽप्येवंप्रकारा अन्यक्रियार्थैर्नामभिरन्विताः शकुनयः। तत्र, यदुक्तं "तदिदं शकुनिषु बहुलम्" इति। एतदयुक्तम्। आह,—कथन्तर्हि काकस्यान्यक्रियाहेतुको नामधेयप्रतिलम्भ इति? उच्यते, —स हि "काकः अपकालयितव्यो भवति उपघातभयात्, स हि यद्यत् स्पृशति तत्तदुपहन्तीति अपकाल्यते तस्मात् काक इत्युच्यते। शकुनित्वसामान्यप्रसक्तमुच्यते,—"तित्तिरिस्तरणात्"। 'तॄ प्लवने (भू० प०)'। उत्प्लुत्यासौ गच्छति। "तिलमात्रचित्र इति वा"। अथ वा तिलमात्रचित्रः स भवतीति तित्तिरिः। "कपिञ्जलः कपिरिव जीर्णः" यादृशो हि कपिः मर्कटः, जीर्णः सवर्णतो भवति, तादृशोऽसावपि कपिञ्जल इत्युच्यते। अथ "वा" "कपिरिव जवते" कपिञ्जलः "ईषत्पिङ्गलः" इत्यर्थः। अथ "वा" "कमनीयं" प्रार्थनीयं मङ्गल्यं मधुरं वा "शब्दं" "पिञ्जयति" अभिव्यनक्तीति कपिञ्जलः। "एवमादीनि शकुनिनामधेयानि" एवमादिना प्रकारेण अशब्दानुकृतिपूर्वकत्वे सति निर्वक्तव्यानि। "श्वाशुयायी"। शु इति क्षिप्रनाम। क्षिप्रमसौ शीघ्रत्वादेतीति श्वा। "शवतेर्वा गतिकर्मणः" स हि नित्यमेव गच्छति। "श्वसितेर्वा" वधकर्मणः। "सिंहः सहनात्" अभिभवति ह्यसौ अन्यान् प्राणिविशेषान्। "सम्पूर्वस्य वा हन्तेः" उपसर्गस्येत्वेन। "संहाय हन्तीति वा" वैयाकरणानामेषा व्युत्पत्तिः। "व्याघ्रो व्याघ्राणात्" विविधमसौ जिघ्रतीति व्याघ्रः। तस्य हि घ्राणेन्द्रियं

पद भवतीति स हि घ्रन् आघ्राय हन्ति, घ्राणेन्द्रिये हि तस्य विशिष्टं ज्ञानम्। व्यादाय हन्तीति वा" स किल व्यादाय वक्त्रं विवृतं कृत्वा ततो हन्ति। अथवा "व्यादाय हन्तीति" यः किल प्रथमे ग्रहे शङ्कितः, तेन हन्तुं भवति मृगोऽन्यो वा कश्चित्, तमसावमर्याद् विकृष्य तस्मिन्नेव प्रदेशे प्रथमग्रहस्थाने आनीय ततो हन्ति। सिंहो व्याघ्रः श्वा काक इत्येवमनुक्रम्याचार्य्येणा-न्येतानि पदानि निरुक्तानि, अयमपि निर्वचनप्रकारोऽस्तीति प्रदर्शनार्थम्। सिंहव्याघ्रशब्दयोस्तु अनुलोममेव निर्वचनमनुलोम-व्यात्ययोपप्रदर्शनार्थम्, एवं हि उभे अपि प्राप्ती दर्शिते भवति(तः)॥१॥

अर्चतिकर्माण उत्तरे धातवश्चतुश्चत्वारिंशन्मेधाविना-मान्युत्तराणि चतुर्विंशतिर्मेधावी कस्मान्मेधया तद्वान् भवति मेधा मतौ धीयते स्तोतृनामान्युत्तराणि त्रयोदश यज्ञनामान्युत्तराणि पञ्चदश यज्ञः कस्मात् प्रख्यातं यज-तिकर्मेति नैरुक्ता याच्ञ्यो भवतीति वा यजुरुन्नो भवतीति वा बहुकृष्णाजिन इत्यौपमन्यवो यजूंष्येनं नयन्तीति वर्त्विङ्नामान्युत्तराण्यष्टावृत्विक् कस्मादीरण ऋग्यष्टा भवतीति शाकपूणिर्ऋतुयाजी भवतीति वा याच्ञाकर्माण उत्तरे धातवः सप्तदश दानकर्माण उत्तरे धातवो दशाध्येष-णाकर्माण उत्तरे धातवश्चत्वारः स्वपितिसस्तीति द्वौ स्वपि-

तिकर्माणो कूपनामान्युत्तराणि चतुर्दश कूपः कस्मात् कुपानं भवति कुप्यतेर्वा स्तेननामान्युत्तराणि चतुर्दशैव स्तेनः कस्मात् संस्त्यानमस्मिन् पापकमिति नैरुक्ता निर्णीतान्तर्हितनामधेयान्युत्तराणि षट् (निर्णीतं कस्मान्निर्णिक्त भवति) दूरनामान्युत्तराणि पञ्च दूरं कस्माद् द्रुतं भवति दुरयं वा पुराणनामान्युत्तराणि षट् पुराणं कस्मात् पुरा नवं भवति नवनामान्युत्तराणि षडेव नवं कस्मादानीतं भवति ॥ २ ॥ (१६)

"अर्चतिकर्माण उत्तरे धातवश्चतुश्चत्वारिंशत्"। 'अर्चतिकर्माणः' अर्चत्यर्थाः, पूजयत्यर्थाः पूजायामवश्यं भवितुं युज्यते उपमेति' उपमाशब्देभ्योऽनन्तरम् अर्चतिकर्माणः समाम्नाताः। कियन्तः पुनस्ते? 'चतुश्चत्वारिंशत्' (४४)। कतमे पुनस्ते? "अर्चति, गायति"—इत्येवमादयः। य एतेऽर्चतिकर्माणः, एतैर्हि मेधाविन एवार्चति, एत एव हि स्तोतुं शक्नुवन्ति, नेतरे अमेधसः॥

तस्मात् "मेधाविनामान्युत्तराणि चतुर्विंशतिः"। अर्चतिकर्मभ्यः 'उत्तराणि' 'मेधाविनामानि'। कियन्ति पुनस्तानि? 'चतुर्विंशतिः' (२४)। कतमानि पुनस्तानि? "विप्रः, धीरः, विप्रः"।—इत्येवमादीनि। विविधानर्थानस्य प्राप्तुं प्रातीति विप्रः। धीः प्रज्ञा, तद्वान् धीरः, रो मत्वर्थे। विगृह्य सदसि

कथयतीति विप्रः। इत्येवमादि। आह,—"मेधावी कस्मात्? उच्यते,—सहि "मेधया तद्वान् भवति"। आह,—"मेधाः"। कस्मात्? सा हि "मतौ धीयते"। मतिर्बुद्धिः, तस्यां या पुरुषशक्तिरभिव्यज्यते, सा मेधा इत्युच्यते॥

य एव मेधाविनः, त एव स्तोतुं शक्नुवन्तीति मेधाविनामभ्यः "उत्तराणि" "स्तोतृनामानि"। कियन्ति पुनस्तानि? "त्रयोदश" (१३)। कतमानि पुनस्तानि? "रेभः, जरिता, कारुः"—इत्येवमादीनि। रेभो रेभतेः स्तुत्यर्थस्य। जरिता जरतेः स्तुत्यर्थस्यैव। कारुः कर्त्ता स्तोमानाम्। इत्येवमादि योज्यम्। प्रत्यक्षवृत्तित्वादस्य शब्दस्य नोक्तं स्तोता कस्मादिति॥

यज्ञेष्वेव हि अतिशयेन देवतानां स्तुतयः प्रयुज्यन्त इति स्तोतृनामभ्यः "उत्तराणि" "यज्ञनामानि"। कियन्ति पुनस्तानि? "पञ्चदश" (१५)। कतमानि पुनस्तानि? "यज्ञः, वेनः, अध्वरः, मेधः,"—इत्येवमादीनि। आह,—"यज्ञः कस्मात्? उच्यते,—यदेतत् "प्रख्यातं यजति कर्म" लोकवेदयोः। एतदेव भावसाधनेन शब्देनोच्यते यजनं यज्ञ इति। अथ "वा" "याच्ञ्यो भवतीति" यज्ञः, याच्यते ह्यत्र, यतो वै देवानामन्नं सम्भूतम्, सममावयन्निति ह विज्ञायते, तस्माद् याचनाद् यज्ञः। अथ "वा" "यजुर्भिः" अयम् "उन्नः" संहित इव "भवति", यजुत्वादत्र यजुषाम्। "यद्गु कृष्णाजिन इत्यौपमन्यवः" यद् यदत्र दृश्यते प्रतिविशिष्टं साधनं किञ्चित्, तत् तत् कृष्णाजिनमिति यज्ञः, सोमे तावदजिनद्वयम्, यजमानेऽ-

प्यजिनद्वयम्, अवहन्यमानेषु हि हविःषु अजिनं घर्मोपार्जितं चर्मपात्रेष्वप्यजिनम्, एवं बहुकृष्णाजिनः। अथ "वा" "यज्ञं, प्येनम्" उपक्रमादारभ्यान्तं "नयन्तीति" यज्ञः। धनतिः कान्त्यर्थः, काम्यन्ते हि यज्ञाद् होमपशुस्वर्गादयः तस्मात् स येनः यज्ञ इत्युच्यते। ममेदं दास्यतीति एवं यज्वभिः अस्माद् फलं प्राप्र्यत इति मेघः। इत्येवमादि॥

यज्ञसम्बन्धेनैव "ऋत्विङ्नामानि उत्तराणि अष्टौ"। ऋत्विजां नामानि ऋत्विङ्नामानि। कियन्ति पुनस्तानि? 'अष्टौ' (८)। कतमानि पुनस्तानि? "भरताः, कुरव."—इत्येवमादीनि। भ्रियन्ते दक्षिणाभिरिति भरताः। कुर्वन्ति कर्माणीति कुरवः। इत्येवमादि। आह,—"ऋत्विक् कस्मात्"? उच्यते,—"ईरणः" ईरयिता हि संस्तुतीनां भवतीति ऋत्विक्। 'ऋग्यष्टा भवतीति शाकपूणिः" ऋग्भिर्ह्यसौ यागकारी भवतीति ऋत्विक्। "ऋतुयाजी भवतीति वा" स हि काले देवता यजतीति वा। ऋतौ याजयतीति वा, स हि काले एव याजयते, नाकाले॥

ऋत्विक्सम्बन्धेनैव "याच्ञाकर्माण उत्तरे धातवः सप्तदश" (१७)। कतमे पुनस्ते? इति। "ईमहे, यामि, मन्महे"—इत्येवमादयः॥

याच्ञासम्बन्धेनैव "दानकर्माण उत्तरे धातवो दश" (१०)। कतमे पुनस्ते? इति। "दाति, दाशति, दासति"—इत्येवमादयः॥

दानसम्बन्धेनैव "अध्येषणाकर्माण उत्तरे धातवश्चत्वारः (४)। कतमे पुनस्ते? इति। "परिस्रव, पवस्व"—इत्येव-

मादयः। सत्रहस्य दातृभिर्दातु प्रतिग्रहीतॄणां प्रार्थना, अध्येषणे-त्युच्यते॥

याच्यमानो हि सर्वोऽपि स्वपितीति अध्येषणाकर्मभ्य उत्तरौ "स्वपितिकर्माणौ"। कतमौ पुनस्तौ? "स्वपिति, सस्ति"—"इति"। स्वशब्देनैवोच्चार्य्य द्विग्रहणमवधारणार्थम्,—एतौ एव "द्वौ" निगमे न पुनस्तृतीयोऽस्तीति, अल्पत्वाद्वा द्विग्रहणम्॥

"कूपनामान्युत्तराणि चतुर्दश" कूपमेव हि आश्रित्य मर्त्तैः सुप्यते, सुप्तः कूप इव पतितो भवतीति वा, स्वपितिकर्मभ्यामनन्त-राणि कूपनामान्युच्यन्ते। कियन्ति पुनस्तानि? 'चतुर्दश' (१४)। कतमानि पुनस्तानि? "वव्रः, कातुः, खातः"—इत्येवमादीनि। व्रियते ह्यसावुदकार्थमिति वव्रः। कमुदकम-त्रेति कातुः। इत्येवमादि। आह,—"कूपः कस्मात्"? उच्यते,—"कु पानं भवति" यत्र ह्यम्भो भवति, तत्र कुत्सितं पानं भवति, साधनापेक्षत्वात्। "कुप्यतेर्वा" यत्सम्बन्धादुदकार्थिनः कुप्यन्ति॥

"स्तेननामान्युत्तराणि चतुर्दशैव"। कूपमाश्रित्य मुष्णन्ति स्तेना इत्यतः कूपनामभ्यः 'उत्तराणि' 'स्तेननामानि'। कियन्ति पुनस्तानि? 'चतुर्दशैव' (१४)। कतमानि पुनस्तानि? "तृपुः, रिपुः"—इत्येवमादीनि। परेभ्यो धनान्याहृत्यातिशयेनासावात्मानं भृत्यांश्च तर्पयतीति त्रिपुः। लिम्पत्यसावात्मानं पापेनेति रिपुः। इत्येवमादि। आह,—"स्तेनः कस्मात्"? उच्यते,—"संस्त्यानम्" संहतम् "अस्मिन्" "पापकम्" कर्म भवति "इति" एवं "नैरुक्ताः" मन्यन्ते। वैयाकरणानामन्यथापि स्यादित्यभिप्रायः॥

"निर्णीतान्तर्हितनामधेयान्युत्तराणि षट्"। निर्णीतस्य च अन्तर्हितस्य नामधेयानि 'निर्णीतान्तर्हितनामधेयानि'। 'उत्तराणि', प्रकृतेभ्यः स्तेननामभ्यः, स्तेना एव ह्यन्तर्हिता भवन्तीत्येष सम्बन्धः स्तेननाम्नामन्तर्हितनाम्नां च। कियन्ति पुनस्तानि? 'षट्' (६)। कतमानि पुनस्तानि? "निण्यम्, सस्वः, सनुत." —इत्येवमादीनि। निर्णीतमिव निण्यम्। सुप्तमिव सस्वः। सन्ततमिव सनुतः। इत्येवमादीनि॥

"दूरनामान्युत्तराणि पञ्च" (५)। अन्तर्हितं यद् भवति, दूरंच तद् भवतीत्येष सम्बन्धः। कतमानि पुनस्तानि। "आके, पराके, पराचै."—इत्येवमादीनि। आ कियतो देशात् एतद् वर्त्तते इति विज्ञातव्यमेतद् भवतीत्याके। पराके पराक्रान्ते। पराङ्मुखमश्विनं पराचैरित्येवमादि। यथैव श्रुतानि छन्दसि, तथैवैतानि समाम्नातानि। आह,—"दूरं कस्मात्"? "द्रुतं" हि सत् "भवति" अध्वनो महत्त्वात्। "दुर्यं वा" दुर्गं हि तद् गम्यते प्राप्यत इत्यर्थः॥

दूरसम्बन्धेनैव "पुराणनामान्युत्तराणि षट्" (६)। समानं हि कालाध्वनोर्महत्त्वं दूरपुराणयोः। कतमानि पुनस्तानि? "प्रत्नम्, प्रदिवः, प्रवयाः."—इत्येवमादीनि। प्राक्तनं प्रत्नम्। प्राग् द्युतिमदागीदिति प्रदिवः। प्रवृद्धवयाः प्रवयाः। इत्येवमादि। आह,—पुराणं कस्मात्"? उच्यते,—तद्धि "पुरा नवं भवति" न वर्त्तमानकाले॥

"नवनामान्युत्तराणि षडेव" (६)। पुराणसम्बन्धेनैव। कतमानि पुनस्तानि? "नवम्, नूत्नं, नूतनम्"—इत्येवमादीनि।

आह,—"नवं कस्मात्" ? उच्यते,—तद्धि सद्य एव कुतश्चित् "आनीतं भवति" ॥ २ ॥

द्विश उत्तराणि नामानि प्रपित्वेऽभीक इत्यासन्नस्य प्रपित्वे प्राप्तेऽभीकेऽभ्यक्ते । आपित्वे नः प्रपित्वे तूय मा गहि । अभीके चिदु लोककृदित्यपि निगमौ भवतः । दभ्रमर्भकमित्यल्पस्य । दभ्रं दभ्नोतेः सुदम्भं भवत्यर्भकमवहृतं भवति । उपोप मे परा मृश मा मे दभ्राणि मन्यथाः । नमो महद्भ्यो नमो अर्भकेभ्य इत्यपि निगमौ भवतः । तिरः सत इति प्राप्तस्य तिरस्तीर्णं भवति सतः संसृतं भवति । तिरश्चिदर्यया परिवर्त्तिर्यातमदाभ्या । पात्रेव भिन्दन् सत एति रक्षस इत्यपि निगमौ भवतः । त्वो नेम इत्यर्द्धस्य त्वोऽपततो नेमोऽपनीतोऽर्द्धं हरतेर्विपरीताद्धारयतेर्वा स्यादुद्धृतं भवत्यृध्नोतेर्वा स्यादृद्धतमो विभागः । पीयति त्वो अनु त्वो गृणाति । नेमे देवा नेमेऽसुरा इत्यपि निगमौ भवतः । ऋक्षाः स्तृभिरिति नक्षत्राणां नक्षत्राणि नक्षतेर्गतिकर्मणो नेमानि क्षत्राणीति च ब्राह्मणमृक्षा उदीर्णानीव ख्यायन्ते स्तृभिस्तीर्णानीव ख्यायन्ते । अमी य ऋक्षा निहितास उच्चा । पश्यन्तो द्यामिव स्तृभि-

रित्यपि निगमौ भवतः वम्रीभिरुपजिह्विका इति सीमिकानां वम्र्यो वमनात् सीमिका स्यमनादुपजिह्विका उपजिघ्र्यः। यदत्त्युपजिह्विका यद्वम्रो अतिसर्पतीत्यपि निगमौ भवत्युर्दरं कृदरमित्यावपनस्योदरमुदीर्णं भवत्यूर्जं दीर्णं वा। तमूर्दरं न पृणता यवेनेत्यपि निगमो भवति। तमूर्दरमिव पूरयति यवेन कृदरं कृतदरं भवति। समिद्धो अञ्जन् कृदरं मतीनामित्यपि निगमो भवति ॥ ३ ॥ (२०)

"द्विश उत्तराणि नामानि"। द्वे द्वे द्विश उत्तराणीति। "प्रपित्वे, अभीके"—इत्येवमादीनि। व्याख्यातानि पृथिवीनामभ्य आरभ्य एकैकार्थस्य बहूनि नामधेयानि, इदानीमेकैकस्य द्वे द्वे नामनी वाचके समाम्नायेते,—प्रपित्वे, अभीके इत्येवमादीनि, आद्यावापृथिवीनामभ्यो यावत् ॥

अधुनैवमुक्त्वा सामान्यतो विशेषेण एकैकं व्युत्पाद्य उदाहरणेन च दर्शयति। तद्यथा,—"प्रपित्वे, अभीके"—"इति" एते नामनी "आसन्नस्य" भवतः। इत्येवमादि। "प्रपित्वे प्राप्ते" इत्यर्थः। "अभीके अभ्यक्ते" आभिमुख्येनाक्तेऽ। अभ्यागते। इदानीमुदाहरणे दर्शयति,—"आपित्वे नः" "अभीके चित्"—इति निगमौ (ऋ० सं० ५, ७, २०, ३—७, २१, १) भवतः" ॥

"यथा गौरोऽअपाकृतं तृष्यन्नेत्यवेरिणम्। आपित्वे नः

प्रपित्वे तूयमागहि कण्वेषु सुसचा पिब ॥" (ऋ० सं० ५, ७, ३, ३)। ऐन्द्रयेषा। बृहती। देवातिथेः काण्वस्यार्षम्। महाव्रते बृहतीसहस्रे शस्यते। हे 'इन्द्र!' 'यथा' येन प्रकारेण 'गौरः' गौरमृगः, 'अवेरिणम्' अपगतार्णम् अपगतोदकं मरुद्देशं गत्वा 'तृष्यन्' तृषाबाध्यमानः 'अपाकृतम्' अपानीयम्, (पानयोग्यं यत्र नास्ति, स्वल्पोदकत्वात्, तत्र कृतम्, उदकेन वा कृतम् जलाशयस्थानम्) तडागमन्यद्व वा शीघ्रम् 'एति', एवं त्वमप्येतस्मिन् 'आपित्वे' आपानकाले 'प्रपित्वे' प्राप्ते 'तूयं' क्षिप्रम् 'आगहि' आगच्छ। आगत्य च य एष सोमः 'कण्वेषु' वर्त्तते, तमेभिरेव ऋत्विग्भिः 'सचा' साकं 'सु सुष्ठु सह स्थित्वा 'पिब' इति॥

"प्रोष्वस्मै पुरोरथमिन्द्राय शूषमर्चत। अभीकेचिदु लोककृत सङ्गे समत्सु वृत्रहास्माकं बोधि चोदिता नभन्तामन्यकेषां ज्याका अधि धन्वसु॥" (ऋ० सं० ८, ७, २१, १)। सुदासः पैजवनस्येयमार्षम्। अतिच्छन्दाः। सर्वपृष्ठायां मैत्रावरुणीयके देवताव्यत्यये यागे शाकरस्यैन्द्रस्य चरोर्याज्यैषा, रैवतस्य पुरोऽनुवाक्या, वाह्वच्ये पुनरियमेव षोड़शिशस्त्रे शस्यते। हे स्तोतारः! 'प्रो' प्रकर्षेण 'सु' प्रशस्ताभिः स्तुतिभिः 'अस्मै' 'इन्द्राय' तुष्ट्यर्थं 'पुरोरथम्' अग्रतो रथम् एतत् 'शूषम्' बलम् 'अर्चत' स्तुत। कस्य पुनरर्थमभिसन्धायार्चत? इति। 'अभीकेचित् उ लोककृत्' । 'अभीके' अभ्यागते एतस्मिन् 'सङ्गे' सङ्ग्रामकाले प्राप्तेऽप्येषु 'समत्सु' सम्भक्षयितृषु उद्यतायुधेषु शत्रुषु 'लोककृत्' स्थानकृत्। एषु 'वृत्रहा' शत्रुहन्ता इन्द्रो भविष्यतीति

एतमर्थमभिसन्धाय प्रार्चत अस्मै यूयमिन्द्राय पुरोरथं शूषमिति। एव मन्यान् स्तोतॄन् सम्बोध्य आत्मनापि प्रवृत्ते वक्तुम्,—हे भगवन्निन्द्र! 'अस्माकं' बोधि बुध्यस्व एताः स्तुतीः, मा परेषाम्, बुद्ध्वा चैताः 'चोदिता' अनुज्ञाता जनस्य भव। 'अन्यकेषाम्' अन्येषां 'ज्याकाः' ज्याः 'अधिधन्वसु' धनुःष्वधिरोपिताः 'नभन्ताम्' हिंस्यन्ताम्, अवततज्याधनुषो हतसर्वोद्यमा एते अस्मद्द्विषो युष्मदनुग्रहाद् भवन्त्वित्यभिप्रायः॥

"दभ्रम्, अर्भकम्"—"इति" एते "अल्पस्य" नामनी। "दभ्रं दभ्नोतेः" पधार्थस्य। तद्धि "सुदम्भं भवति" सुच्छेदं भवति, अल्पत्वात्। "अर्भकमवहृतं भवति" ह्रस्वमित्यर्थः। "उपोपमे परामृश" "नमोमहद्भ्यो नमो"—"इत्यपि निगमौ (ऋ॰ सं॰ २, १, ११, ७—१, २, २४, ३) भवतः"॥

"उपोपमे परामृश मा मे दभ्राणि मन्यथाः। सर्वाहमस्मि रोमशा गन्धारीणामिवाविका॥" (ऋ॰ सं॰ २, १, ११, ७)। भावयव्यस्येयमार्षम्। अनुष्टुप्। भावयव्यमेव सा भर्तारं तेनानुपेयमाना प्रार्थाति। हे राजन्! 'उप' गम्य 'उप' श्लिष्य च 'मे' मम 'परामृश' यः प्रदेशः पुरुषेण स्त्रियाः परामर्ष्टव्यः। किञ्च, "मा मे दभ्राणि मन्यथाः" अल्पकानि लोमानि मा मन्यथाः। जानेऽहमेतम्, यथा अलोमिकाया उपगमः प्रतिषिद्धः स्मृतौ,—"नाजातलोम्न्योपहासमिच्छेत्" इति। यतस्ते वेदयामि 'सर्वाहमस्मि रोमशा' सर्वेष्वेवावयवेषु ममोत्पन्नानि रोमाणि (येषु, स्त्रीणामुत्पद्यन्ते?)। कथञ्च पुनरहमस्मि रोमशा? 'गन्धारी

णामिवाविका' गन्धारदेशजातानामविकानां मध्ये या सुष्ठु रोमशा भवेत्, तथाहमस्मि रोमशा, नि शङ्को मामुपगच्छेत्यभिप्रायः॥ "नमो म॒हद्भ्यो॒ नमो॑ऽअर्भ॒केभ्यो॒ नमो॒ युव॑भ्यो॒ नम॑ आशि॒नेभ्यः॑। यजा॑म दे॒वान् यदि॑ श॒क्नवा॑म॒ मा ज्याय॑सः॒ शंस॒मा वृ॑क्षि देवाः॥" (ऋ० सं० १, २, २४, ३)। त्रिष्टुप्। शुनःशेपस्यार्षम्। होतृजपे विनियुक्ता। 'नमो महद्भ्यः' नमो महत्परिमाणेभ्यो देवेभ्यः। 'नमो अर्भकेभ्यः' अल्पपरिमाणेभ्यः। 'नमो युवभ्यः' यौवनवद्भ्यः। 'नम आशिनेभ्यः' व्यापिभ्यः। 'यजाम' 'देवान्' एतस्मिन्नुपस्थिते यागकाले। 'यदि' शक्नवाम'। अल्पश्रुतविज्ञाना वयम् अतएव ब्रूमो यदि शक्नवामेति। यथमीदृशाः सन्तो युष्मान् ब्रूमहे,—हे 'ज्यायसः' ज्यायांसः! देवाः! युष्माकमेव 'शंस' शंसितारं सन्तमल्पे वा महति वा कस्मिंश्चिद् दुःशस्ते 'मा वृक्षि' मा अस्मान् छिन्धि यज्ञफलात्, को हि नाम नापराध्यति? इत्यभिप्रायः॥

"तिरः, सतः"—"इति" एते "प्राप्तस्य" नामनी भवतः। अप्राप्तस्यैके अर्थयते, यथापि योज्यम्। "तिरः तीर्णं" हि सत् "भवति" दूरमध्वानम्। "सतः संसृतं भवति" एकीभूय सृतं भवति। "ति॒रश्चि॒दर्य्य॑या" "पा॒रेव॒ भिन्द॒न् स॒तः"—"इत्यपि निगमौ (ऋ० सं० ४, ४, १६, २—५, ७, ६, १) भवतः"॥

"अश्वि॑ना॒वेह ग॑च्छतं॒ नास॑त्या॒ मा॑ वि वे॑नतम्। ति॒रश्चि॒दर्य्य॑या॒ परि॑ व॒र्त्तिर्या॑त मदाभ्या॒ माध्वी॒ मम॑ श्रु॒तं हव॑म्॥" (ऋ० सं० ४, ४, १६, २)। पङ्क्तिराश्विनी। अवस्योरात्रेयस्यार्षम्।

प्रातरनुवाकाश्विनयोः शस्यते। हे 'अश्विनौ!' 'नासत्या!' वा 'गच्छतम्' युवाम् 'इह' अस्मिन् यज्ञे सोमं पातुम्। किञ्च, 'मा वि वेनतम्', मा विगतकामौ भूतम्, युवामाह्वयमानौ मया। किञ्च, 'तिरश्चिदर्य्यया' तिरोऽपि अप्राप्ते एव स्थाने यद्यवस्थितौ स्थ, तथापि 'अर्य्यया' ईश्वरस्यापि रथगत्या दैवगत्या शीघ्रया 'आयातम्' (द्विवचनं वा सावग्रहत्वात् पदस्य) किञ्च, 'परि वर्त्ति यातम्' यद्यपि क्वचिदनिवृत्तौ स्थ, तथापि परिवर्त्तनं कृत्वा आयातम्। हे 'अदाभ्या' अहिंस्यौ! अनुपहिंसितौ! अथवा अदाभ्यया अनुपहिंसितया गत्या आयातम्। हे 'माध्वी!' मधु सोममिश्रं पेयं ययोस्तौ। 'मम' 'श्रुत' शृणुतम् 'हवम्' आह्वानम्। श्रुत्वा अविलम्बमानौ शीघ्रमायातमित्यभिप्रायः॥ "इन्द्रो यातूनामभवत् पराशरो हविर्मथीनामभ्याविवासताम्। अभीदु शक्रः परशुर्यथा वनं पात्रेव भिन्दन् सत एति रक्षसः॥" (ऋ० सं० ५, ७, ६, १)। वसिष्ठस्यार्षम्। जगती। 'इन्द्रः' 'यातूनां' यातुधानानाम् 'अभवत्' 'पराशरः' पराशातयिता। कीदृशानां पुनर्यातूनामभवत् पराशातयिता? इति। उच्यते,— 'हविर्मथीनाम्' हवींषि ये मथ्नन्ति, तेषाम्। 'अभ्याविवासताम्' अभ्युद्वासयतां, यज्ञोत्सादकानामित्यर्थः। अथवा परिचर्य्यायां स्यात्, ये त्वमिन्द्र परिचरन्ति यातवः, तेषामेव पराशातयितेति। योऽयमेवंलक्षण इन्द्रः, सोऽस्मानिदानीमधि परिचर्य्यया 'अभि एति' अभ्येतु, अस्मान् प्रति। 'शक्रः' शक्तः, सर्वयातूनां पातने। 'परशुः' परशुरिव 'यथा' कश्चित् वन

मिच्छत् अभ्येयात्, यथा, 'पात्रा' पात्राणि कौलालानि लकु-टेनाप्रतिकस्यमानः 'भिन्दन्' कश्चिदभ्येयात्, एवमभ्येति 'रक्षसः' रक्षांसि भिन्दन्। 'सतः' प्रदेशात्, दूरादित्यर्थः ॥

"त्वः' नेमः"—"इति" एते नामनी "अर्द्धस्य"। "त्वः अपततः" अपेत्य ततः। "नेमः अपनीतः" अपभज्य नीतः, पृथक् कृत इत्यर्थः। "अर्द्धं हरतेर्विपरीताद्धारयतेर्वा स्यात्" "उद्धृतं" हि तत् "भवति"। "ऋध्नोतेर्वा स्यात्" "ऋद्धतमः" अभि-सम्पन्नतमः "विभागः" भवति। "पीयति त्वो अनुत्वो गृणाति"—"नेमे देवा नेमेऽसुराः"—"इत्यपि निगमौ (ऋ० सं० २, २, १६, २—य० मै० ब्रा०) भवतः ॥

"बोधा मे अस्य वचसो यविष्ठ मंहिष्ठस्य प्रभृतस्य स्वधावः। पीयति त्वो अनु त्वो गृणाति वन्दारुस्ते तन्वं वन्दे अग्ने ॥"

इति (ऋ० सं० २, २, १६, २)। त्रिष्टुप्। दीर्घतमस आर्षम्। आग्नेयी। प्रातरनुवाकाश्विनयोः शस्यते। हे भगवन्! 'अग्ने!' 'यविष्ठ' युवतम! 'बोध' बुध्यस्व 'मे' मम 'अस्य' 'वचसः' 'मंहिष्ठस्य, दातृतमस्य, पूजयितृतमस्य वा, महत्तमस्य वा 'प्रभृतस्य' प्रकृष्टैर्भगवद्गुणैः, सम्भृतस्यः हे 'स्वधावः' अन्नवन्! ये गुणा अस्य वचसः, तान् बोध। किञ्च, इदमपरं शृणु,— उभयेषां प्राजापत्यानां देवासुराणां द्विधा विभक्तानां "पीयति त्वः" हिनस्ति एकमर्द्धमसुराख्यम्, "अनु त्वः" अनु गृणात्येकमर्द्धं देवाख्यमनुप्रीतीत्यर्थः। तत्रैवं सत्युभयथा विप्रतिपन्नेषु प्राजा-पत्येषु 'वन्दारुः' वन्दनशीलः अहं, दैवं पक्षमाश्रितः, हित्वा

आसुरं, तयैतां 'तन्वं' तनूं ज्वलनदहनप्रकाशीकरणसमर्थां नित्य-कालमेव प्रातर्मध्यन्दिने, सायं च 'वन्दे' स्तौमीत्यर्थः ॥ "नेमे देवा नेमेऽसुराः"—इति ब्राह्मणवाक्यमेवेदं वाजपेये मैत्रायणीयानाम्। अर्द्धतो देवा अर्द्धतोऽसुरा आसन्नित्यर्थः ॥

"ऋक्षाः, स्तृभिः"—"इति" एते "नक्षत्राणाम्" नामनी। नक्षत्रशब्दं पर्य्यायाभिधानप्रसक्तं निर्ब्रवीति,—"नक्षत्राणि नक्षते-र्गतिकर्मणः" गत्यर्थे वर्त्तमानस्य, तानि हि नित्यमेवागच्छन्ति। "नेमानि क्षत्राणीति च ब्राह्मणम्"। नेमानि, क्षत्राणि धनानि। क्षत्रमिति धननाम। किन्तर्हि ? धनसरूपाण्येतानि, सूर्य्यरश्म्यनु-वेधात् दीप्यमानानि सन्ति हिरण्मयानीव भ्राजन्ते इति तु ब्राह्मणम्, तुशब्दार्थे चशब्दः। "ऋक्षा." "उदीर्णानीव" उदीरितानीव, केनचिदूर्द्धं गमितानीव "ख्यायन्ते" दृश्यन्त इत्यर्थः। "स्तृभिः स्तीर्णानीव" "ख्यायन्ते" दृश्यन्ते। "अमी य ऋक्षाः"—"पश्यन्तो द्यामिव स्तृभिः"—"इत्यपि निगमौ (ऋ० सं० १, २, १४, ५,—३, ५, ६, ३) भवतः" ॥

"अमी य ऋक्षा निहितास उच्चा नक्तं ददृश्रे कुहचिद् दिवेयुः। अदब्धानि वरुणस्य व्रतानि विचाकशच्चन्द्रमा नक्तमेति ॥" (ऋ० सं० १, २, १४, ५)। शुनःशेपस्यार्षम्। त्रिष्टुप्। वारुणी। वरुणाख्यः सूर्य्य उच्यते। 'अमी ये ऋक्षा.' अमूनि यानि नक्षत्राणि 'निहितासः' निहितानि 'उच्चा' उच्चैरित्यर्थः। किञ्च, तानि 'नक्तं ददृश्रे' रात्रावेवैतानि दृश्यन्ते। 'कुहचिद्दिवेयुः' न विज्ञायन्ते हि क्वचिद् दिवैतानि गच्छन्ति ? किमेतत् स्यात् ?

'अदब्धानि अनुपहिंसितानि 'वरुणस्य' आदित्यस्य एतानि 'व्रतानि' कर्माणि आश्चर्य्यभूतानि स्युः। किमन्यद्भविष्यति? स हि भगवानादित्यः, तानि कुतश्चिदानयन्निवास्तं गच्छति, पुनश्चैतानि अपनयन्निवोदेति? तद्वेवं दर्शनं वा तेषां सूर्यकृतमेव। यदपि चैतत् 'विचाकशत्' दीप्यमानः 'चन्द्रमा' 'नक्तम् एति' तदप्यस्यैव भगवतः सूर्य्यस्य कर्म, अयमेव हि चन्द्रमसि दीप्तिमादधान इवास्तं याति, पुनश्चाक्षिपन्निव चन्द्रमसो दीप्तिमुद्देति। योऽयमेवंस्वभावो वरुणः तं वयमभिप्रेतार्थसिद्धये स्तुमः, स इदं नामास्माकं करोत्विति॥ "ऋतावानं विचेतसं पश्यन्तो द्यामिव स्तृभिः। विश्वेषामध्वराणां हस्कर्त्तारं दमेदमे॥" (ऋ० सं० ३, ५, ६, ३)। गौतमपुत्रस्य वामदेवस्यार्षम्। अनुष्टुप्। आग्नेयी। 'ऋतावानं' यज्ञवन्तं 'विचेतसं' विभूतप्रज्ञानं 'विश्वेषां' सर्वेषाम् 'अध्वराणाम्' यज्ञानां 'हस्कर्त्तारं' स्पर्द्धाकर्त्तारम्, उपज्वलिते हि तस्मिन् भ्रातृव्यैः स्पर्द्धन्त इव यज्ञः, तमेवङ्गुणविशिष्टम् अग्निं 'पश्यन्तः' वयमनेकधा विहृतं 'दमेदमे' यज्ञगृहे तासु तासु क्रियासु व्यापृतं स्तुमः। किञ्च, योऽनेकधा दीप्यमानः 'द्याम् इव स्तृभिः' नक्षत्रैः पृथिवीं चित्ररूपां, वेदीं वा करोति, स नोऽभिष्टुतोऽभिप्रेतानर्थान् साधयत्वित्यभिप्रायः॥

"वम्रीभिः, उपजिह्विका"—"इति" एते "सीमिकानाम्" नामनी भवतः। या एताः पिपीलिका इत्युच्यन्ते लोके ता इमाः सीमिकाः "वम्र्योवमनात्" ता हि वमन्त्युदकं येन मृदार्द्री-

भवति। "सीमिकाः स्यमनात्" स्यमन्ति हि ता नित्यमेव गच्छन्ति इत्यभिप्रायः। "उपजिह्विकाः उपजिघ्र्याः" उपजिघ्रन्ति हि ताः, पटु ह्यासां घ्राणेन्द्रियं भवति। द्वयोरपि नाम्नोरेक एव "निगमः" —"यदत्त्युपजिह्विका (ऋ० सं० ६, ७, १२, ६)"—"इति" "भवति"॥

"यदत्त्युपजिह्विका यद्वम्रो अतिसर्पति। सर्वं तदस्तु ते घृतम्॥" (ऋ० सं० ६, ७, १२, ६)। भार्गवस्य प्रयोगस्येयमार्षम्। उक्थेऽग्नौ समिदनया हूयते। 'यत्' 'अत्ति' भक्षयति 'उपजिह्विका' अन्तरनुप्रविश्य, 'यत्' च 'अतिसर्पति' आर्द्रया मृदा परिवेष्टयन्, 'वम्रः' बहिर्न शक्नोत्यत्तुं खदिरसारादि, 'सर्वं' तदुभयजातीयमपि 'ते' तव हे भगवन्! अग्ने! 'घृतम्' अस्तु, 'ता' तत् घृतीभूतं, त्वं जुषस्व, संसेवस्व हे 'यविष्ठ' युवतम!॥

"ऊर्दरम्, कृदरम्"—"इति" एते "आवपनस्य" नामनी भवतः। उप्यते यस्मिन् यवादि धान्यं कुशूलेऽन्यत्र वा वैणवादौ कस्मिंश्चित्, तदुर्दरमिति कृदरमिति च, यदावपनमाहुः, प्राकृतेन लौकिकात्तदावपनमित्युच्यते। "ऊर्दरम्" "उद्दीर्णम्" ऊर्ध्वं हि तद् दीर्णं "भवति"। अथ "वा" "ऊर्जे" तदर्थाय "दीर्णं" भवति। ऊर्गित्यन्ननाम, तदुतये हि तच्छुषिरीभूतं भवति। "तमूर्दरं न पृणता"—"समिद्धो अञ्जन्"—इति निगमौ (ऋ० सं० २, ६, १४, ५—य० वा० सं० २१, १) भवतः॥

"अध्वर्य्यवो यो दिव्यस्य वस्वो यः पार्थिवस्य क्षम्यस्य राजा। तमूर्दरं न पृणता यवेनेन्द्रं सोमेभिस्तदपो वो अस्तु॥" (ऋ० सं० २, ६, १४, ५)। गृत्समदस्येयमार्षम्। त्रिष्टुप्। ऐन्द्री। हे 'अध्वर्य्यवः'! 'यः' इन्द्रः 'दिव्यस्य' द्युलोकाश्रयस्य, 'वस्वः' वसुनः धनस्य, 'यः' च 'पार्थिवस्य' अन्तरिक्षलोकाश्रयस्य (पृथिवीत्यन्तरिक्षनामसु पठितम्), यश्च 'क्षम्यस्य' भूम्याश्रयस्य, 'राजा' अधिपतिः, 'तम्' एवङ्गुणयुक्तम् 'इन्द्रम्' 'ऊर्दरं न' ऊर्दरमिव 'पृणत'पूरयत 'यवेन'। यथा कश्चिन्मनुष्यः ऊर्दरं पूरयेत्, तथा यूयमिन्द्रं 'सोमेभिः' सोमैः पूरयत। 'तद् अपः वः अस्तु' तद् वः कर्मास्तु, सर्वमन्यन्मुक्त्वेत्यभिप्रायः॥ "समिद्धो अञ्जन् कृदरं मतीनां घृतमग्ने मधुमत् पिन्वमानः वाजी वहन् वाजिनं जातवेदो देवानां वक्षि प्रियमा सधस्थम्॥" (य० वा० सं०२६,१)। आप्रीसूक्तम् आध्वर्य्यवेऽश्वमेधे। तत्रेयं प्रथमा आप्री। हे "अग्ने!" भगवन्!' 'समिद्धः' सन्दीप्तः, त्वम् 'अञ्जन्' गमयन्नात्मानं प्रति। 'कृदरम्' आवपनं 'मतीनां' देवानां हि सर्वेषां 'घृतम्' आवपनं मर्तानाम्, ते हि तत्र सर्वा मतीः प्रक्षिपन्ति ममेदं स्यादिति। तदेवङ्गुणयुक्तं घृतं 'मधुमत्' मधुस्वादयुक्तम् 'पिन्वमानः' पिबन्नित्यर्थः। अथवा देवान् प्रति 'वहन्' 'वाजी' आत्मना वेजनवान् बलवान्, परेभ्यो वा भयदाता। हे 'जातवेदः!' वहन्नेनमाश्वमेधिकं वाजिनमुच्यसे,—अस्माभिः 'प्रियम्' एनं 'वाजिनं' 'देवानां' 'सधस्थम्' स्थानम् समान 'आ' आभिमुख्येन, शीघ्रतरं 'वक्षि' वह प्रापयेत्यर्थः॥ ३॥

रम्भः पिनाकमिति दण्डस्य। रम्भ आरभन्त एनम्। आ त्वा रम्भं न जिव्रयो ररम्भेत्यपि निगमो भवति। आरभामहे त्वा जीर्णा इव दण्डं पिनाकं प्रतिपिनष्ट्यनेन। कृत्तिवासाः पिनाकहस्तोऽवततधन्वेत्यपि निगमो भवति। मेना ग्ना इति स्त्रीणां स्त्रियस्त्यायतेरपत्रपणकर्मणो मेना मानयन्त्येना ग्ना गच्छन्त्येनाः। अमेनांश्चिज्जनिवतश्चकर्थ। ग्नास्त्वाकृतन्तन्नपसोऽतन्वतेत्यपि निगमौ भवतः। शेपो वैतस इति पुंस्प्रजननस्य। शेपः शपतेः स्पृशतिकर्मणो वैतसो वितस्तं भवति। यस्यामुशन्तः प्रहराम शेपम्। त्रिः स्म माह्नः श्नथयो वैतसेनेत्यपि निगमौ भवतः। अयेनेत्युपदेशस्य। अया ते अग्ने समिधा विधेमेति स्त्रियाः। एनायो अग्निमिति नपुंसकस्य। एना पत्या तन्वं १ संसृजस्वेति पुंसः। सिषक्तु सचत इति सेवमानस्य स नःसिषक्तु यस्तुरः स नः सेवतां यस्तुरः। सचस्वा नः स्वस्तये। सेवस्व नः स्वस्तये। स्वस्तीत्यविनाशिनामास्तिरभिपूजितः सु अस्तीति भ्यसते रेजत इति भयवेपनयोः। यस्य शुष्माद्रोदसी अभ्यसेताम्। रेजते अग्ने पृथिवी मखेभ्य इत्यपि निगमौ भवतः।

द्यावापृथिवीनामधेयान्युत्तराणि चतुर्विंशतिस्तयोरेषाभवति ॥ ४ ॥ (२१)

"रम्भः, पिनाकम्"—"इति" एते "दण्डस्य" नामनी। "रम्भ आरम्भत एनम्" अस्खलनार्थम्। "आ त्वा रम्भं न"—"कृत्तिवासाः पिनाकहस्तः"—इति निगमौ (ऋ० सं० ६, ३, ४५, ५—य० वा० सं० ३, ६१)॥

"आ त्वा रम्भं न जिव्रयो ररम्भा शवसस्पते। उश्मसि त्वा सधस्थ आ॥" (ऋ० सं० ६, ३, ४५, ५)। काण्वस्य त्रिशोकस्यार्षम्। ऐन्द्री। गायत्री। अतिरात्रे महाव्रते च शस्यते। हे भगवन्निन्द्र! "आरभामहे" वयं "त्वा" त्वां 'रम्भं न' "दण्डमिव" "जिव्रयः" "जीर्णाः" इत्यर्थः। यथा वृद्धाः केचित् दण्डमारभेरन्नवष्टम्भार्थमेवमारभामहे त्वाम्। हे भगवन्! 'शवसस्पते' बलस्य पते! त्वं न आश्रय इत्यभिप्रायः। किञ्च, 'उश्मसि त्वा' कामयामहे त्वां नित्यमेव 'सधस्थे' समाने एव कस्मिन् स्थाने यज्ञायतनेऽवस्थितं त्वामाभिमुख्येन प्रष्टुं स्तोतुं चेत्यभिप्रायः॥ "पिनाकं" "प्रति पिनष्टयेनेन" हन्तीत्यर्थः। "एष ते रुद्र भागस्तेनावसेन परो मूजवतोऽतीहि। अवततधन्वा पिनाकहस्तः कृत्तिवासाः"। 'एष ते रुद्र भागस्तेन'—इति, त्रैयम्बकाः पुरोडाशा अनेन मन्त्रेण वृक्षे आसज्यन्ते। हे भगवन्! 'रुद्र!' 'एषः' 'ते' तव 'भागः' 'तेन' अवसेन पथ्यदनेन 'परः' परस्तात् 'मूजवतः' पर्वतात् 'अतीहि' अतिगच्छ, मा अत्रैव स्थाः। कथमुनरतीहि?

'पिनाकहस्तः' भूत्वा, 'कृत्तिवासाः' चर्मवासाः' 'अवततधन्वा' चैवमतीहि ॥

"मेनाः, ग्नाः"—"इति" एते "स्त्रीणां" नामनी। पर्य्याया-भिधानप्रसक्तमुच्यते,—"स्त्रियः स्त्यायतेरपत्रपणकर्मणः लज्जा-र्थस्य, लज्जन्त्यपि हि ताः। "मेनाः" "मानयन्त्येनाः" पुरुषा।। "ग्नाः" "गच्छन्ति" हि "एनाः" मैथुनेन धर्मेण। "अमेनांश्चित्"—"ग्नास्त्वा कृन्तन्"—"इति" "निगमौ (ऋ० सं० ४, १, २६, २—सा० वे० कौ० शा० ता० ब्रा० १, १, ८) भवतः" ॥ "आ प्रद्रव हरिवो मा विवेनः पिशङ्गराते अभि नः सचस्व। नहि त्वदिन्द्र वस्यो अन्यदस्त्यमेनांश्चिज्जनिवतश्चकर्थ ॥" (ऋ० सं० ४, १, २६, २)। अयस्योराङ्गिरसस्यार्षम्। त्रिष्टुप्। ऐन्द्री। हे 'हरिवः!' 'आ' आभिमुख्येनास्मान् 'प्र' प्रकर्षेण 'द्रव'। किञ्च, 'मा विवेनः' मा विगतकामो भूरस्मत्तः। हे 'पिशङ्गराते' शोभनदान! 'अभि सचस्व' 'नः'। किञ्च, 'नहि' 'अन्यत्' देवतान्तरं 'त्वत्' त्वत्तः प्रविविशिष्टम् 'अस्ति' यत् प्रतिपद्येमहि। हे भगवन्! 'इन्द्र!' 'वस्यो' वसुमन्! किं कारणम्? 'अमेनां-श्चित्' अभार्य्यानपि स्तोतॄन् 'जनिवत.' एव स्त्रीमत्, अत एव 'चकर्थ' करोषीत्यर्थः। यस्मात् त्वमेवंगुणविशिष्टः, तस्मात् त्वमेव स्तुम इत्यभिप्राय. ॥ "देवस्य त्वा सवितुः प्रसवेऽश्वि-नोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रतिगृह्णामि ०—०। ग्नास्त्वा कृन्तन्नपसोऽतन्वत वयित्र्योऽवयन् ग्नास्त्वा नयतु देवि दक्षिणे बृहस्पतये वासस्तेनामृतत्वमशीय वयोदात्रे मयोमयो मह्यं

प्रतिग्रहीत्रे ०—०। क इदं कस्मा अदात् कामः कामायादात् कामो दाता कामः प्रतिग्रहीता कामः समुद्रमाविशत् कामेन त्वा प्रतिगृह्णामि कामैतत्ते॥" वासःप्रतिग्रहणमन्त्रेऽनुषङ्ग एषः, मैत्रायणीयके, *ताण्ड्यब्राह्मणे (सा० कौ० शा० १, १, ८)* च, अन्यास्वपि शाखासु च। तद्वास उच्यते,—हे 'वासः!' 'सवितुः' आदित्यस्य 'प्रसवे' अभ्यनुज्ञातः अहं त्वां "प्रतिगृह्णामि"। 'अश्विनोः' देवयोः बाहुभ्यां प्रतिगृह्णामि। नैताभ्यामेव 'बाहुभ्याम्' अपिच 'पूष्णः' देवस्य 'हस्ताभ्याम्' प्रतिगृह्णामि। किञ्च, 'ग्नास्त्वा कृन्तन्' स्त्रीभिस्त्वं कर्त्तितः, तन्तुकरणाभिप्रायेण। 'अपसः' अल्पकाः, अनुपजातपुंस्त्वाः, जननायासमर्थाः, कुविन्दपुत्रकाः त्वाम् 'अतन्वत'। ते हि कुविन्दानां परिकर्म 'धियः' धीमत्यः, बुद्धिमत्यः, कुशलाः, वयित्र्यः त्वाम् 'अवयन्' कुविन्दस्त्रियः कृतवत्यः। तदेवमभिनिष्पन्नं त्वां 'मह्य' 'बृहस्पतये' बार्हस्पत्य आत्मन्यवस्थिताय 'वरुणः' देवताविशेषः 'ददाति' उदकपूर्वकं त्वं दीयसे। सोऽहम् एवङ्गुणयुक्तः त्वां प्रतिगृह्य 'अमृतत्वम्' अमृतभाव यथाभिलषितमेव 'अशीय' अश्नुयाम्। त्वं प्रतिगृह्यमाणं वासः, तव प्रसादात् मैवमेतन् स्यात्,—अमृतभावान्मम मा खण्डनं कार्षीरित्यभिप्रायः। किञ्च, 'मयः' सुखं 'दात्रे' 'भूयात्' भवतु। 'मयः' सुखं 'मह्य' 'प्रतिग्रहीत्रे' च। किञ्च, 'कः' प्रजापतिरयं 'कस्मै' प्रजापतये एव 'अदात्' ददाति। योऽप्ययं ददाति सोऽप्ययं दाता, अयमपि प्रजापतिरेवेत्यभिप्रायः। वक्ष्यति हि,—"क ईयते तुज्यते कः"—इति (ऋ० सं०

१, ६, ८, २) किञ्च, कामः कामायैव अदात् तद्ददाति। पुण्यं भविष्यतीत्यनेन कामेन दाता ददाति, आच्छादनं भविष्यति इति इतरः प्रतिगृह्णाति। एवं कामो दाता, कामः प्रतिग्रहीता। स एव काम उच्यते,—हे काम! 'एतत् ते वासः' सकामो भव इति॥

"शेपः, वैतसः"—"इति" एते नामनी "पुंस्प्रजननस्य"। "शेपः शपतेः" "स्पृशतिकर्मणः" स्पृशत्यर्थस्य, स्पृश्यते हि तेन स्त्री। "वैतसो वितस्तं भवति"। उपक्षीणं तद् भवति प्रागनुस्मरणात् स्त्रियाः। "यस्यामुशन्तः"—"त्रिः स्म माह्नः"—"इति" "निगमौ (ऋ० सं० ८, ३, २७, २—८, ५, १, ५) भवतः॥"

"तां पूषञ्छिवतमामेरयस्व यस्यां बीजं मनुष्या३ वपन्ति। या न ऊरू उशती विश्रयाते यस्यामुशन्तः प्रहराम शेपम्॥" (ऋ० सं० ८, ३, २७, २)। सूर्याया आर्षम्। कन्याप्रथमोपगमे विनियोगः। हे भगवन्! 'पूषन्!' 'ईरयस्व' तां योनिम्, 'यस्यां' योनौ 'बीजं' शुक्रम् 'मनुष्याः वपन्ति'। त्वत्कृतयोनिपोषे बीजमेतस्यामर्थवत् स्यात्, त्वदधीनो हि योनिपोष इत्यभिप्रायः। 'या' इयम् 'नः' अस्माकम् 'ऊरू' 'उशती' कामयमाना स्त्री 'विश्रयाते' नानाप्रकारमाश्रयते। तस्या या योनि, ताम् 'ईरयस्व' 'उद्गमय' बीजग्रहणाय सुपुष्टां कुरुष्व। 'यस्यां' योनौ 'उशन्तः' पुत्रजन्मकामयमानाः 'प्रहराम' प्रक्षिपेम इमं 'शेपम्'॥ "त्रिः स्म माह्नः श्नथयो वैतसेनोत स्म मेऽव्यत्यै पृणासि। पुरूरवोऽनु ते केतमायं राजा मे वीर तन्व १

स्तदासीः ॥" (ऋ० सं० ८, ५, १, ५)। उर्वश्या आर्षम्। त्रिष्टुप्। सा पुरूरवसामागाच्छेत्युक्ता सती अनयर्चा पुरूरवसं प्रत्यब्रवीत्। हे 'पुरूरवः!' 'त्रिः स्म माह्नः' त्रिरह्नो माम् 'श्नथयः' अताड़यः त्वम् 'वैतसेन' शिश्नदण्डेन पूर्वम्। 'उत स्म मे' अपि च यावान् कश्चिदभिलाषो मम मनस्यासीत् तं सर्वमेव त्वम् 'अव्यत्यै' 'पृणासि' व्यतिपूरितवानेवासि। अतस्तवाहम् 'अनु आयम्' अनुगतवती। 'केतम्' चेतसा अनुकूला तवाहमभवमित्यर्थः। किञ्च, हे 'वीर!' तदा तथानुकूलायाः सत्याः 'राजा' ईश्वरः त्वम्, अस्याः 'तन्वः' मच्छरीरस्य 'तदा आसीः' तदानीं त्वम्, सम्प्रति न तथा वर्त्तसे, यथा पूर्वम्, अतस्त्वयेदानीं नाहं समेष्ये इत्यभिप्रायः॥

"अया, एना"—"इति" एते नामनी "उपदेशस्य"। स पुनरुपदेशः स्त्रीपुन्नपुंसकेषु भिन्नो भवति, अतस्त्रिष्वपि प्रदर्श्यते॥

तत्र, 'अया ते अग्ने समिधा विधेम प्रति स्तोमं शस्यमानं गृभाय। दहाशसो रक्षसः पाह्यस्मान् द्रुहो निदो मित्रमहो अवद्यात्॥" इति (ऋ० सं० ३, ४, २५, ५)। "स्त्रियाः" उपदेशः। वामदेवस्यार्षम्। त्रिष्टुप्। रक्षोघ्ने कर्मणि विनियोगः। भगवन्! 'अग्ने!' 'अया' अनया 'समिधा' 'ते' तव 'विधेम' परिचर्यां कुर्मः। स त्वमेवमस्माभिः परिचर्य्यमाणः शृणु यत् कुरुष्व 'प्रतिगृभाय' प्रतिगृहाण इमं 'स्तोमं' स्तोत्रम्, अस्माभिः 'शस्यमानम्' उच्चार्य्यमाणम्। 'दह' एतान् 'अशसः' अशस्तन् अस्तोतॄन्, आत्मनः 'द्रुहः' च दोग्धॄन्, अस्मा-

कम्। एतान् 'रक्षसः' राक्षसान् 'निदः' निन्दितृंश्च। किञ्च, 'पाहि'. रक्ष अस्मान्, हे 'मित्रमहः' मित्राणां पूजयितः! 'अवद्यात्' अवन्दनीयात् कर्मणः, पापादित्यर्थः॥ "एना वो अग्निं नमसोर्जोनपातमाहुवे। प्रियं चेतिष्ठमरतिं स्वध्वरं विश्वस्य दूतममृतम्॥" (ऋ० सं० ५, २, २१, १)। इति "नपुंसकस्य" उपदेशः। वसिष्ठस्यार्षम्। बृहती। प्रातरनुवाकाश्विनयोः शस्यते। 'एना वः' अनेन युष्माकं 'नमसा' अन्नेन अभ्युद्यतेन 'ऊर्जोनपातम्' अपां पौत्रम्, अथवा अन्नानां पौत्रम्, आहुतिभ्यः आपः, अद्भ्यः अग्निः, एतया प्रणालिकया अन्नस्य पौत्रोऽग्निः। तम् ऊर्जोनपातम् 'अग्निम्' 'आहुवे'। किंलक्षणम्, 'प्रियम्' इष्टम्, देवानाञ्च 'चेतिष्ठम्' अतिशयेन चेतनावन्तम्, 'अरतिम्' अलमतिं पर्य्याप्तमतिम्, 'स्वध्वरं' शोभनयज्ञम्, 'विश्वस्य' यजमानगणस्य, एष योऽधिकृतः कर्मणि, 'तस्य 'दूतम्' 'अमृतम्' अमरणधर्माणम्। हे ऋत्विग्यजमानाः! तं वः आशासमृद्धये अहमाह्वये। स चाहूतो देवान् प्रति दौत्यं करिष्यतीत्यभिप्रायः॥ "एना पत्या तन्वं१ संसृजस्व (ऋ० सं० ८, ३, २५, २)"—"इति" "पुंसः" उपदेशः। "इह प्रियं प्रजया ते समृध्यतामस्मिन् गृहे गार्हपत्याय जागृहि। एना पत्या तन्वं१ सं सृजस्वाधा जिव्री विदथ मा वदाथः॥" (ऋ० सं० ८, ३, २५, २)। इति सूर्य्याया आर्षम्। जगती। वधूरनया गृहान् प्रवेश्यते, सोच्यते। हे वधु! 'इह' एव 'अस्मिन् गृहे' 'प्रजया' युक्तायाः सत्याः 'ते' तव यत् 'प्रियं' तत् 'समृध्य-

ताम्'। किञ्च, अस्मिन् गृहे त्वं 'गार्हपत्याय जागृहि' गृहपति-भावाय अवहिता भवेत्यर्थः। किञ्च, 'एना पत्या' अनेन भर्त्रा सह 'तन्वं' तनु' 'संसृजस्व' मिश्रीकुरु। अथैवं सौमनस्ये वर्त्तमानौ 'जिव्री' जर्णौ यावत् तावत् अवियुज्यमानौ परस्परेण 'विदथं' यज्ञम् 'आ' आभिमुख्येनावस्थितौ सन्तौ यज्ञसम्बन्धीनि वचांसि वदतम् इत्याशीः॥

"ए॒ना वो॑ अ॒ग्निं नम॑सा" "ए॒ना पत्या"—इति समानेऽप्येनाशब्दे स्वरान्ते एकस्मिन्नुपपदविशेषादेकस्य नपुंसकविषयत्वमेकस्य पुरुषविषयत्वम्। एकत्र नम इत्युपपदम्, एकत्र पतिशब्दः॥

"सिषक्तु, सचते"—"इति" एते नामनी "सेवमानस्य"। "स॒नः॑ सिषक्तु"—"सच॑स्वा नः"—इति निगमौ (ऋ० सं० १, १, ३४, २—१, १, २, ४) भवतः॥

"यो रे॒वान् यो अ॑मीव॒हा व॑सु॒वित् पु॑ष्टि॒वर्द्ध॑नः। स नः॑ सिषक्तु यस्तु॒रः॥" (१, १, ३४, २)। मेधातिथिरार्षम्। अग्न्युपस्थाने विनियुक्ता। "सोमान॑ स्वरणम् (ऋ० सं० १, १, ३४, १)"—इत्यस्या ब्राह्मणस्पत्याया इयमनन्तरा, तेनेयमपि ब्राह्मणस्पत्यैवस्यात्। उक्तश्चाहरकाणां ब्राह्मणस्पत्याभिरग्निमुपतिष्ठेतेति। हे भगवन्! ब्रह्मणस्पते! 'यः' 'रेवान्' रयिमान्, धनवान्, 'अमीवहा' रोगहा, 'वसुवित्' च वसुनो धनस्य अपूर्वस्यापि लब्धा, यश्च 'पुष्टिवर्द्धनः' धनपोषस्य वर्द्धयिता, 'सः' 'नः' अस्मान् 'सिषक्तु' "सेवताम्"। पुनः युष्मत्प्रसादात् 'यः'

'तुरः' तूर्णकारी पटुरित्यर्थः ॥ "स नः पितेव सूनवेऽग्ने सूपायनो भव। सचस्वा नः स्वस्तये॥" (ऋ० सं० १, १, २, ४)। मधुच्छन्दस आर्षम्। अग्न्युपस्थाने विनियोगः। हे भगवन्! 'अग्ने!' यं त्वां वयं परिचराम, 'सः' 'नः' अस्माकं 'सूनवे' पुत्राय 'सूपायन.' सूपगमनः सूपचारः 'भव' सूपचीर्णश्च 'सचस्व' 'न.' 'स्वस्तये' स्वस्त्ययनाय। निगमप्रसक्तमुच्यते,—"स्वस्तीति" एतत् "अविनाशिनाम" अविनाशिनः अर्थस्य नाम। अन्ये त्वधीयते,—"अविनाशनाम" इति। तेषाम् अविनाशस्यैव नाम। तत्त्वमुक्तम्, अधुना व्युत्पत्तिं ब्रवीति—"अस्ति." अयम् "अभिपूजित" सुपूर्व. सन्नुच्यते "सु अस्ति"—"इति" ॥

"भ्यसते, रेजते"—"इति" एते नामनी "भयवेपनयोः। "यस्य शुष्माद्रोदसी"—"रेजते अग्ने पृथिवी"—"इति" "निगमौ (ऋ० सं० २, ६, ७, १—५, १, ८, ४) भवत" ॥

"यो जात एव प्रथमो मनस्वान् देवो देवान् क्रतुना पर्यभूषत्। यस्य शुष्माद्रोदसी अभ्यसेतां नृम्णस्य मह्ना स जनास इन्द्रः॥" (ऋ० सं० २, ६, ७, १)। उपरिष्टाद् व्याख्येयः॥ "प्र चित्रमर्कं गृणते तुराय मारुताय स्वतवसे भरध्वम्। ये सहांसि सहसा सहन्ते रेजते अग्ने पृथिवी मखेभ्यः॥" (ऋ० सं० ५, १, ८, ४)। भरद्वाजस्येयमार्षम्। त्रिष्टुप्। चातुर्मास्ये वैश्वदेवे पर्वणि याज्या। "अग्निमारुतीं पृश्निमालभेत वृष्टिकाम" —इत्यस्य पशो' पडर्चे चेयम्। हे स्तोतार.! 'चित्रम् अर्कम्' चायनीयं स्तोमं 'गृणते' स्तुवते, स्तनयित्नुशब्देन एतत् जगत्

उपशब्दायते। 'तुराय' त्वरमाणाय 'स्वतवसे' स्वात्मबलावष्टम्भिने 'मारुताय' गणाय। कीदृशानां पुनर्मरुतां गणाय 'प्रभरध्वम्'? इति,—ये मरुतः 'सहसा' स्वेन बलेन 'सहांसि' परेषां बलानि 'सहन्ते' अभिभवन्ति, 'रेजते' बिभेति, कम्पते वा। केभ्यः मरुद्भ्यः? 'पृथिवीमखेभ्यः' महद्भ्य इत्यर्थः। य एवङ्गुणयुक्ता मरुतः, तेषां यो गणः, तस्मै प्रभरध्वम् चित्रमर्कम्। अग्नये मारुताय च गणायेति स्तोतॄन् सम्बोध्य ततोऽग्निं ब्रवीति,—हे भगवन्नग्ने! शृणु त्वमप्येतमर्कमेवङ्गुणयुक्तैर्मरुद्भिः सह॥

"द्यावापृथिवीनामधेयानि" एभ्यः "उत्तराणि" द्विसम्बन्धेनैवोच्यन्ते। कियन्ति पुनस्तानि? "चतुर्विंशतिः" (२४)। कतमानि पुनस्तानि? "स्वधे, पुरन्धी"—इत्येवमादीनि। सर्वस्यास्य भूतग्रामस्य धारयित्र्यौ स्वधे। पुरन्धी, पुरु बहूनि धारयित्र्यौ। इत्येवमादि योज्यम्॥

द्विवचनेन युक्तानि द्यावापृथिव्योर्नामानि, "तयोः" साहचर्य्याख्यायिका "एषा" ऋक् "भवति" (साहचर्य्ये हि सति द्विवचनयोग उपपन्नरूपो भवति नाम्नाम्),—॥ ४॥

कतरा पूर्वा कतरापरायोः कथा जाते कवयः को विवेद। विश्वं त्मना बिभृतो यद्ध नाम विवर्तेते अहनी चक्रियेव॥ कतरा पूर्वा कतरापरैनयोः कथं जाते कवयः क एने विजानाति सर्वमात्मना बिभृतो यद्धैनयोः कर्म

विवर्त्तेते चैनयोरहनी अहोरात्रे चक्रयुक्ते इवेति द्यावापृथिव्योर्महिमानमाचष्ट आचष्टे ॥ ५ (२२)॥

इति तृतीयाध्यायस्य चतुर्थः पादः ॥ ३, ४ ॥

"कतरा पूर्वा कतरा" ०—इति (ऋ० सं० २, ५, २, १)। अगस्त्यस्यार्षम्। त्रिष्टुप्। पृष्ठ्याभिप्लवयोः षष्ठेऽहनि महाव्रते च तृतीय सवने वैश्वदेवे शस्त्रे शस्यते। स्वयमेव तावद्वितर्कयन्नुत्पन्नसंशयो मन्त्रदृग् ब्रवीति,—'कतरा' अनयोः द्यावापृथिव्योः 'पूर्वा'? 'कतरा' तु 'अपरा'? न हि पौर्वापर्य्यमनयोः स्फुटं लक्षयितुं शक्यते। 'कथा' केन प्रकारेण एते 'जाते' स्याताम्? किं पौर्वापर्य्येण, उत युगपद् भवेताम्? अपि तावत् हे 'कवयः!' 'कः विवेद' 'कश्चिदपि विस्पष्टं' जानाति? अहं त्वेतावच्छ्रुयादागमाद् वक्तुम्,—तस्मादुद्भूतस्य हिरण्मयस्याण्डस्यैते शकले इति। एवं ह्याह ते,—"अण्डकपाले रजतञ्च सुवर्णं चाभवताम्, तद्यत् रजतं, सेयं पृथिवी, यत् सुवर्णं, सा द्यौः।"—इति। तेन ज्ञायते युगपदेवैते स्यातामिति। किञ्च, 'विश्वं' सर्वं 'त्मना' आत्मनैव 'बिभृतः' धारयतः। 'यद्ध नाम' यदर्थमनयोर्नाम नमनम्, यस्माद् भूतग्रामधारणार्थम् एतेन विपरिणामत्वेन, तत् सर्वमेते बिभृतः। किञ्च, 'विवर्त्तेते' 'च' विपर्य्ययेण वर्त्तेते च 'एतयोः' एव अन्तर्भूते अहनी "अहोरात्रे" 'चक्रियेव' "चक्रयुक्ते इव" चक्रयुगलमिव अवियोगेन संयुक्ते, सम्बद्धे इत्यर्थः॥

मन्त्रव्याख्यानेन गतार्थमेतद्भाष्यमिति ॥

"द्यावापृथिव्योर्महिमानमाचष्टे"—इति। एतदनेन मन्त्रेण द्यावापृथिव्योर्महिमानं महाभाग्यं मन्त्रदृगाचष्टे ॥ ५ ॥

एवमेतन्नैघण्टुकं प्रकरणं समाप्तम्, अतःपरमैकपदिकं भवति। यस्यायमादिः,—"एकार्थमनेकशब्दमिति"—इति ॥

इति निरुक्तवृत्तौ अष्टमाध्यायस्य चतुर्थः पादः ॥ ३, ४ ॥

ऋज्वर्थायां निरुक्तवृत्तौ जम्बूमार्गाश्रमवासिन आचार्य-भगवद्दुर्गस्य कृतौ अष्टमोऽध्यायः (तृतीयोऽध्यायः) समाप्तः ॥ ३ ॥

---

१ २ ३ ४ ५ ६
(कमनामानिपरिपद्यन्नहिग्रभायशासद्वह्विरभ्रातेवनजा-
७ ८ ९ १० ११ १२
मयेमनुष्यनामानितद्यदशावनिभ्योऽभीदन्त्वयावयंयत्रासुप-
१३ १४ १५ १६ १७ १८
र्णावहुनामानितनूत्यजेकुहस्विचतुरश्चित्प्रियमेधवदथलुप्तोप-
१९२० २१ २२
मान्यर्चतिद्वियोरम्भःकतरापूर्वा द्वाविंशतिः ॥)

इति निरुक्ते पूर्वषट्के तृतीयोऽध्यायः ॥ ३ ॥

(नैघण्टुकं काण्डं समाप्तम्।)

